CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

11·3

अमर

श्योर सीरीज

न्यायसिद्धान्तमुक्तावली
(प्रत्यक्षखण्ड)

भारतीय विद्या संस्थान
सी. २७/५९, जगतगंज, वाराणसी-२२१००२

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

ublic Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-Mo

Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation,

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust, Funding IKS-MoE-Gra

न्यायसिद्धान्तमुक्तावली

(प्रत्यक्षखण्डः)

सम्पादक :
डॉ. राजेश कुमार शास्त्री

प्रकाशक :
भारतीय विद्या संस्थान
सी० २७/५९, जगतगंज
वाराणसी-२२१००२

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

© प्रकाशक :
भारतीय विद्या संस्थान
प्रकाशक एवं पुस्तक विक्रेता
सी० २७/५९, जगतगंज, वाराणसी-२२१००२
☎ : (०५४२) २२०१६५५

मुद्रक :
प्रभा प्रेस, चौकाघाट, वाराणसी
मो० : ०९८३८९२७०९५

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

न्यायसिद्धान्तमुक्तावल्यां (प्रत्यक्षखण्डम्)
वस्तुनिष्ठाः प्रश्नाः तेषामुत्तराणि च

प्रश्नः १—न्यायसिद्धान्तमुक्तावलीं कः अरचयत्?
उत्तरम्—श्रीविश्वनाथपञ्चाननभट्टाचार्यः।
प्रश्नः २—अस्य पिता कः आसीत्?
उत्तरम्—विद्यानिवासभट्टाचार्यः।
प्रश्नः ३—अयं कस्मिन् काले कस्मिन् देशे च जनिम् अलभत?
उत्तरम्—१६५६ शालिवाहनशके बङ्गदेशे जनिम् अलभत।
प्रश्नः ४—अस्य तार्किकस्य कतिग्रन्थाः सन्ति?
उत्तरम्—सप्त (७) ग्रन्थाः।
प्रश्नः ५—ते ग्रन्थाः के सन्ति?
उत्तरम्—(१) भाषापरिच्छेदः (कारिकावली), (२) न्यायसिद्धान्तमुक्तावली (भाषापरिच्छेदटीका) (३) मांसतत्त्वविवेकः (४) न्यायसूत्रवृत्तिः (५) सर्वार्थतत्त्वावलोकः (६) न्यायतत्त्वबोधिनी (७) पिङ्गलप्रकाशश्च।
प्रश्नः ६—सम्प्रति कियन्तः ग्रन्थाः मुद्रिताः समुपलभ्यन्ते?
उत्तरम्—आदिमाश्चत्वारो ग्रन्थाः।
प्रश्नः ७—न्यायसिद्धान्तमुक्तावल्याः किं नामकं व्याख्यानं सर्वत्र लब्धप्रचारं समुपलभ्यते?
उत्तरम्—दिनकरीनामकं व्याख्यानम्।
प्रश्नः ८—न्यायसिद्धान्तमुक्तावल्याः मङ्गलाचरणे तार्किकोऽयं कं स्तौति?
उत्तरम्—श्रीकृष्णम्।
प्रश्नः ९—लीलाताण्डवपण्डितः कः?
उत्तरम्—शङ्करः।
प्रश्नः १०—शङ्करः किं कुर्यात्?
उत्तरम्—श्रोतॄणां वक्तॄणाञ्च कल्याणं कुर्यात्।
प्रश्नः ११—न्यायसिद्धान्तमुक्तावल्यां सर्वप्रथमं किं वर्णयति ग्रन्थकारः?
उत्तरम्—शाब्दबोधे व्यापारं निरूपयति।
प्रश्नः १२—शाब्दबोधे करणं किमस्ति?
उत्तरम्—पदस्य ज्ञानं करणमस्ति।
प्रश्नः १३—व्यापारः कः अस्ति?
उत्तरम्—पदार्थज्ञानम्।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

). In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

प्रश्नः १४–अत्र सहकारिणी का विद्यते?
उत्तरम्–शक्तिधीः।
प्रश्नः १५–शक्तिधीः इति शब्दस्य कोऽर्थः?
उत्तरम्–पदप्रकारार्थविशेष्यकेश्वरेच्छात्मिका शक्तिज्ञानरूपा।
प्रश्नः १६–अत्र फलं किम्?
उत्तरम्–शाब्दबोधः।
प्रश्नः १७–वृत्तित्वम् किम्?
उत्तरम्–शाब्दबोधानुकूलसम्बन्धत्वम्।
प्रश्नः १८–वृत्तिः का?
उत्तरम्–शक्तिलक्षणान्यतरसम्बन्धः वृत्तिः।
प्रश्नः १९–द्वारं किम्?
उत्तरम्–व्यापारो नाम द्वारम्।
प्रश्नः २०–शक्तिग्रहस्य कोऽर्थः?
उत्तरम्–शक्तेः सङ्केतस्य ग्रहणम् इति शक्तिग्रहः अथवा अभिधादिशक्तीनां ग्रहणम्।
प्रश्नः २१–केषां सान्निध्यतः शाब्दबोधः जायते?
उत्तरम्–व्याकरणात्, उपमानात्, कोशात्, आप्तवाक्यात्, व्यवहारतः, वाक्यशेषात्, विवृत्तेः सिद्धपदस्य सान्निध्यतः च।
प्रश्नः २२–एते कतिसङ्ख्याकाः सन्ति?
उत्तरम्–अष्टसंख्याकाः सन्ति।
प्रश्नः २३–अत्र वृद्धाः के सन्ति?
उत्तरम्–ज्ञानवृद्धाः इति।
प्रश्नः २४–व्याकरणं किम्?
उत्तरम्–व्याकरणम् इन्द्रादिभिः प्रणीतमष्टसङ्ख्याकं शब्दशास्त्रम्।
प्रश्नः २५–उपमानं किम्?
उत्तरम्–उपमानं सादृश्यज्ञापकम्।
प्रश्नः २६–कोशः कः?
उत्तरम्–अमरकोशादिः।
प्रश्नः २७–आप्तवाक्यं किम्?
उत्तरम्–आप्तवाक्यं आप्तजनयथार्थवचनम्।
प्रश्नः २८–व्यवहारः कः?
उत्तरम्–लोककृत्याकृत्याचारः।

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रश्नः २९—वाक्यशेषः कः?
उत्तरम्—वाक्यस्य शेषः पदग्रामार्थवादाद्यात्मकः।
प्रश्नः ३०—विवृत्तिः का?
उत्तरम्—पर्यायादिकम् विवृत्तिः।
प्रश्नः ३१—सिद्धपदस्य सान्निध्यम् किम्?
उत्तरम्—प्रसिद्धपदस्य सन्निधिः।
प्रश्नः ३२—शाब्दबोधे कतिहेतवः?
उत्तरम्—चत्वारः हेतवः।
प्रश्नः ३३—ते हेतवः के?
उत्तरम्—(१) आसक्तिः (२) योग्यता (३) आकाङ्क्षा (४) तात्पर्यज्ञानम् च।
प्रश्नः ३४—अत्र आसत्तिः का?
उत्तरम्—आसत्तिः पदसमूहनिष्ठाः। सा चाव्यवधानेन प्रयुक्तसन्निधिस्वरूपा।
प्रश्नः ३५—तत्र योग्यता का?
उत्तरम्—योग्यता चार्थनिष्ठा चैकार्थेऽपरार्थस्वरूपा।
प्रश्नः ३६—आकाङ्क्षा का?
उत्तरम्—आकाङ्क्षा पदनिष्ठा सा चैकपदस्य यत्पदविरहप्रयोज्यजनकत्वाभाववत्वं तत्पदे तत्पदवत्वस्वरूपा।
प्रश्नः ३७—तात्पर्यं किम्?
उत्तरम्—तात्पर्यं शब्दनिष्ठम् तत्प्रतीतीच्छयोच्चारितत्वरूपम्।
प्रश्नः ३८—आकाङ्क्षा कतिविधा? सा च का?
उत्तरम्—आकाङ्क्षा द्विविधा-(१) उत्थिताकाङ्क्षा (२) उत्थाप्याकाङ्क्षा च।
प्रश्नः ३९—विधातः कः?
उत्तरम्—विशिष्टो धातः विधातः।
प्रश्नः ४०—मङ्गलं कति विधम्?
उत्तरम्—मङ्गलं त्रिविधम्-नमस्कारात्कम्, आशीर्वादात्मकं वस्तुनिर्देशात्कम् च।
प्रश्नः ४१—कतिपदार्थः कानि च तेषां नामानि?
उत्तरम्—सप्तपदार्थाः द्रव्य-गुण कर्म-सामान्य-विशेष-समवायऽभावाः।
प्रश्नः ४२—कति गुणाः सन्ति?
उत्तरम्—चतुर्विंशतिः (२४)।
प्रश्नः ४३—कर्मणः किं लक्षणम्?
उत्तरम्—चलनात्मकं कर्म।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रश्नः ४४—तर्कस्य किं लक्षणम्?
उत्तरम्—व्याप्यारोपेण व्यापकारोपस्तर्कः।
प्रश्नः ४५—न्यायशास्त्रे कः बालः?
उत्तरम्—अधीतव्याकरणकाव्यकोशोऽनधीतन्यायशास्त्रो बालः।
प्रश्नः ४६—न्यायः इति शब्दस्य का व्युत्पत्तिः?
उत्तरम्—नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः।
प्रश्नः ४७—कर्माणि कियन्ति सन्ति? कानि च तानि?
उत्तरम्—पञ्च कर्माणि सन्ति। उत्क्षेपणाऽपक्षेपणा-ऽऽकुञ्चन-प्रसारण-गमनानि।
प्रश्नः ४८—सामान्यं कति विधम्?
उत्तरम्—परमपरञ्चेति द्विविधम्।
प्रश्नः ४९—अभावः कतिविधः के च ते?
उत्तरम्—शीतस्पर्शवत्य आपः। ताः द्विविधाः नित्या अनित्याश्च।
प्रश्नः ५१—कतिविधः समवायः?
उत्तरम्—एक एव।
प्रश्नः ५२—पृथिव्याः किं लक्षणम्?
उत्तरम्—गन्धवती पृथिवी।
प्रश्नः ५३—तेजसः किं लक्षणं तस्य च कति भेदाः?
उत्तरम्—उष्णस्पर्शवत्तेजः। तच्च द्विविधम् नित्यमनित्यञ्च।
प्रश्नः ५४—वायोः किं लक्षणं तस्य च कतिभेदाः?
उत्तरम्—रूपरहितस्पर्शवान् वायुः। स द्विविधः नित्योऽनित्यश्च।
प्रश्नः ५५—आकाशस्य किं लक्षणं कतिविधं च तत्?
उत्तरम्—शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यञ्च।
प्रश्नः ५६—कालस्य किं लक्षणं कतिविधश्च सः।
उत्तरम्—अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।
प्रश्नः ५७—आत्मनः किं लक्षणं कतिविधश्च सः?
उत्तरम्—ज्ञानाधिकरणमात्मा। सः द्विविधः जीवात्मा परमात्मा च।
प्रश्नः ५८—अत्यन्ताभावस्य किं लक्षणम्?
उत्तरम्—त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः।
प्रश्नः ५९—प्रध्वंसाभावस्य किं लक्षणम्?
उत्तरम्—सादिरनन्तः प्रध्वंसः। उत्पत्तेः पूर्वं कार्यस्य।
प्रश्नः ६०—प्रागभावस्य किं लक्षणम्?

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

उत्तरम्—अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य।

प्रश्नः ६१—समवायस्य किं लक्षणम्?

उत्तरम्—नित्यसम्बन्धः समवायः।

प्रश्नः ६२—विशेषाणां किं लक्षणम्?

उत्तरम्—नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।

प्रश्नः ६३—सामान्यस्य किं लक्षणम्?

उत्तरम्—नित्यमेकमनेकानुगतं सामान्यम्।

प्रश्नः ६४—कारणस्य किं लक्षणम्?

उत्तरम्—कार्यनियतपूर्ववृत्तिः कारणम्।

प्रश्नः ६५—कार्यस्य किं लक्षणम्?

उत्तरम्—कार्यं प्रागभावप्रतियोगि।

प्रश्नः ६६—प्रत्यक्षप्रमाणस्य किं लक्षणम्?

उत्तरम्—तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्।

प्रश्नः ६७—प्रत्यक्षज्ञानलक्षणं किं कतिविधञ्च तत्?

उत्तरम्—इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधम् निर्विकल्पकं सविकल्पकञ्चेति।

प्रश्नः ६८—नवद्रव्याणि के?

उत्तरम्—क्षित्याप्तेजोमरुद्व्योमकालदिग्देहिनो मनः।

प्रश्नः ६९—किं नाम सादृश्यम्? अस्योदाहरणं लिखत?

उत्तरम्—सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्र इव मुखम्।

प्रश्नः ७०—सङ्कर कः?

उत्तरम्—परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः सङ्करः।

प्रश्नः ७१—ग्रन्थकारः वायुं कथं लक्षयति?

उत्तरम्—अपाकतेजोऽनुष्णाशीतस्पर्शस्तु पवने मतः।

प्रश्नः ७२—ग्रन्थकारदिशा विषयः कः?

उत्तरम्—प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।

प्रश्नः ७३—कालः कः?

उत्तरम्—जन्यानां जनकः कालो जगतामाश्रयो मतः।

प्रश्नः ७४—दिशः किं लक्षणम्?

उत्तरम्—दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grar

प्रश्नः ७५—आत्मानं कथं निरूपयति ग्रन्थकारः?
उत्तरम्—आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्।
प्रश्नः ७६—कति अनुभूतयः ताश्च काः?
उत्तरम्—प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दी च चतस्रः अनुभूतयः।
प्रश्नः ७७—तत्र अनुमितिः का?
उत्तरम्—व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः।
प्रश्नः ७८—तत्र उपमितिः का?
उत्तरम्—सादृश्यज्ञानकरणकं ज्ञानमुपमितिः।
प्रश्नः ७९—शाब्दबोधः कः?
उत्तरम्—पदज्ञानकरणकं ज्ञानं शाब्दबोधः।
प्रश्नः ८०—तत्र प्रत्यक्षं कतिविधम्?
उत्तरम्—घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रोत्रं मानसमिति षड्विधं प्रत्यक्षम्।
प्रश्नः ८१—अलौकिकव्यापारः कति विधः?
उत्तरम्—अलौकिकव्यापारः त्रिविधः-(१) सामान्यलक्षणः, (२) ज्ञानलक्षणः (३) योगजश्च।
प्रश्नः ८२—सामान्यज्ञानं किम्?
उत्तरम्—आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते।
प्रश्नः ८३—ज्ञानलक्षणः कः?
उत्तरम्—विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।
प्रश्नः ८४—योगजः कः?
उत्तरम्—योगाभ्यासजनितो धर्मविशेषः श्रुतिस्मृतिपुराणादिप्रतिपाद्यः इत्यर्थः।
प्रश्नः ८५—योगजः कतिविधः?
उत्तरम्—योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
प्रश्नः ८६—कार्यरूपा पृथिवी कति विधा?
उत्तरम्—सा कार्यरूपा पृथिवी त्रिधा शरीरेन्द्रियविषयभेदात्।
प्रश्नः ८७—देहं कति विधम्?
उत्तरम्—देहं द्विविधम् योनिजम् अयोनिजम् च।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

न्यायसिद्धान्तमुक्तावल्यां लघूत्तरीयाः प्रश्नाः तेषामुत्तराणि च

प्रश्नः १—न्यायसिद्धान्तमुक्तावल्याः रचयितुः परिचयः नातिविस्तरेण देयः?

उत्तरम्—तर्कशास्त्रस्य सर्वोपादेयतामाकलय्य तर्कशास्त्रमधिजिगांसूनां कृते महामहोपाध्यायविश्वनाथपञ्चाननभट्टाचार्यमहोदयैर्न्यायसिद्धान्तमुक्तावलीनामा रुचिरो ग्रन्थो निरमीयत। अयं च महामहोपाध्यायविश्वनाथपञ्चाननभट्टाचार्यः रत्नाकरविद्यावाचस्पतेः पौत्रः, विद्यानिवासभट्आचार्यस्य पुत्रः, रुद्रन्यायवाचस्पतेः नारायणभट्टाचार्यस्य च भ्राता १५५६ शालिवाहनशके बङ्गदेशे प्रख्याततार्किको बभूव। एतस्यैव ज्येष्ठपितृव्यो वासुदेवसार्वभौम आसीद्यस्य शिष्यास्तत्त्वचिन्तामणिदीधितिकारो रघुनाथ तार्किकशिरोमणिः, स्मृतितत्त्वस्य कर्ता महामहोपाध्यायरघुनन्दनभट्टाचार्यः, श्रीगौराङ्गमहाप्रभुः, तान्त्रिककृष्णानन्दश्च बभूवुः। श्रीविश्वनाथञ्चाननभट्टाचार्यकृताः ग्रन्थास्त्विमे—

(१) भाषापरिच्छेदः (कारिकावली), (२) न्यायसिद्धान्तमुक्तावली (भाषापरिच्छेदटीका), (३) मांसतत्त्वविवेकः, (४) न्यायसूत्रवृत्तिः, (५) सर्वार्थतत्त्वालोकः, (६) न्यायतन्त्रबोधिनी, (७) पिङ्गलप्रकाशश्च। एषु आदिमाश्चत्वारो ग्रन्थाः मुद्रिता इदानीमुपलभ्यन्ते इति।

प्रश्नः २—न्यायसिद्धान्तमुक्तावल्याः मङ्गलश्लोकं विलिख्य तस्य व्याख्या कार्या?

उत्तरम्—चूणामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः।।

प्रसङ्गः—विघ्नविघाताय ग्रन्थस्य निर्विघ्नसमाप्तिः स्यात् ग्रन्थस्य प्रचारः प्रसारश्च सर्वत्र भवेत् एतदर्थं ग्रन्थकारः मङ्गलमाचरति चूड़ामणीकृतेति। अत्र ग्रन्थकारः भगवन्तम् आशुतोषं निवेदयति यत् सः शङ्करः कल्याणाय जगतः स्यात्।

अन्वयः—चूणामणीकृतविधुः वलयीकृतवासुकिः लीलाताण्डवपण्डितः भवः भव्याय भवतु।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

व्याख्या—चूणामणीकृतविधुः=न चूडामणिरचूडामणिः, अचूडामणिश्चूडामणिः सम्पद्यमानस्तथा कृत इति चूडामणीकृतो विधुर्येन सः चूणामणीकृतविधुः। वलयीकृतवासुकिः=अवलयो वलयः सम्पद्यमानस्तथा कृत इति वलयीकृतो वासुकिर्येन स वलयीकृतवासुकिः। लीलाताण्डवपण्डितः=लीलया ताण्डवं लीलाताण्डवं तत्र पण्डितः लीलाताण्डवपण्डितः। भवः=भवति जगदस्मादिति भवः शङ्करः। भव्याय=कल्याणाय। भवतु=अस्तु।

प्रश्नः ३—न्यायसिद्धान्तमुक्तावल्याः मङ्गलश्लोकं विलिख्य तस्य व्याख्या कार्या?

उत्तरम्—विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—

नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय।।

प्रसङ्गः—श्लोकेऽस्मिन् ग्रन्थकारः श्रीविश्वनाथपञ्चाननभट्टाचार्यः कृष्णं स्तौति।

अन्वयः—नूतनजलधररुचये गोपवधूटीदुकूलचौराय संसारमहीरुहस्य बीजाय तस्मै कृष्णाय नमः।

व्याख्या—नूतनजलधररुचये=नूतनो यो जलधरो मेघो नूतनजलधरः, नूतनजलधरस्य रुचिरिव रुचिर्यस्य सः नूतनजलधररुचिस्तस्मै। यथा मेघो वृष्ट्या जनतां मोदयति तथा कृष्णोऽपि भक्तमनोरथपूर्त्या भक्तान् मोदयतीति आशयः। गोवधूटीदुकूलचौराय=गोपानां वधूट्यस्तासां दुकूलानि तेषां चौरस्तस्मै, गा इन्द्रियाणि पान्तीति गोपा जीवास्तेषां वधूट्योऽविद्यास्ता एव दुकूलानि स्वरूपाच्छादकत्वात् तेषां चौरस्तस्मै इति वा, कृष्णो यथा गोपीदुकूलचौर्यं कृतवान् तथा मदीयाज्ञानचौर्यमपि करोत्वित्यभिप्रायः। संसार एव महीरुहो वृक्षः तस्य बीजाय यः संसारस्यैवोत्पादकस्तस्य मदीयमनोरथसम्पादने कियानायास इत्यभिप्रायः। कृष्णाय=दुःखं कृषतीति कृष्णस्तस्मै दुःखापहर्त्रे नमः।

प्रश्नः ४—ईश्वरसिद्धिप्रकारं ग्रन्थानुसारं समालोच्यताम्?

उत्तरम्—ननु मूले 'तस्मै कृष्णाय नमः' इत्यनेन कस्यापि नमस्कार्यत्वमुक्तम्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तच्चायुक्तम्, तत्रैव प्रमाणाभावात्। न च तत्र प्रत्यक्षं प्रमाणमिति वाच्यम्, 'रूपमत्रापि कारणं द्रव्याध्यक्षे, इति वक्ष्यमाणप्रकारेणेश्वरस्यारूपिद्रव्यत्वेन चाक्षुषस्पार्शनप्रत्यक्षयोरभावात्। भवन्मते तस्य द्रव्यत्वे शब्दग्रन्थरसग्राहकाणां श्रोत्रघ्राणरसनेन्द्रियाणां तत्राप्रसक्तेश्च एवं तत्र बाह्येन्द्रियाणां प्रमाणत्वाभावः। नापि मानसं तत्प्रत्यक्षं नैयायिकनये सर्वात्मनां विभुत्वेन सर्वात्मनः संयोगस्य सत्त्वात् सर्वेषां सर्वज्ञत्वापत्त्या विलक्षणात्ममनः संयोगस्यैव ज्ञानादिकं प्रति हेतुभावस्य सिद्धतया परात्मवत्तेन तस्य ज्ञानाभावात्। नापि तत्रानुमानं प्रमाणव्याप्यादिज्ञाने प्रत्यक्षोपजीविनस्तस्य तदप्रसक्ताप्रसक्तेः। एवमुपमानमपि न तत्र मानम्, सादृश्यबुद्धेरभावात्। नापि 'द्यावाभूमी जनयन्नित्यादि श्रुतिस्तत्र मानमीश्वरोक्तत्वेन तस्याः प्रामाण्यात्, तत्र संदेहे श्रुतिप्रामाण्यस्यापि तत्राभावात्, एवञ्चतर्विधप्रमाणाभावेनेश्वरो नास्त्येवेति चेन्न, अनुमानस्यैव तत्र प्रामाण्यात्। तथाहि-यैत्यत्कार्यं तत्तत्कर्तृजन्यमिति व्याप्तिग्रहे 'क्षित्यङ्कुरादिककार्यं कर्तृजन्यं कार्यत्वात् घटादिवदित्यनुमानेन तेषां कर्तृजन्यत्वसिद्धौ सत्कर्तृत्वस्यास्मदादावसम्भवेन तत्कर्तृत्वेन तत्सिद्धिः, तथा चोक्तम्–

'जगतां यदि नो कर्त्ता कुलालेन विना घटः।
चित्रकारं विना चित्रं स्वत इव भवेत् तदा।।'

प्रश्नः ५—असमवायिकारणं कस्य साधर्म्यम्?

उत्तरम्—मूले 'गुणकर्ममात्रवृत्तिज्ञेयमर्थंप्यसमवायिहेतुत्वम्' इत्युक्तम्, तत्र मात्रपदस्य कात्स्न्यार्थकतया यावतां गुणकर्मणासमवायिकारणत्वमायातं तच्चायुक्तम्, आत्मविशेषगुणानां सर्वत्रासमवायिकारणाभावस्य प्राङ्निरूपितत्वादिति चेन्न, साधर्म्यस्य वैधर्म्ये, गुणकर्मपदस्य तद्भिन्ने लक्षणायामसमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यमित्यर्थे तात्पर्येण दोषात्। ननु साधर्म्यप्रकरणे वैधर्म्यकथनमयुक्तं गुणकर्मणोस्तद्भिन्ने लक्षणाप्ययुक्तेति चेन्न, असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्। असमवायिकारणे गुणकर्मणी, तद्वृत्तिः सत्ताभिन्नजातिः गुणत्वकर्मत्वरूपा तद्वत्वं गुणादीनाम्। सत्ताभिन्नद्रव्यत्वरूपजातिमादाय द्रव्येऽतिव्याप्तिवारणाय वृत्त्यन्तम्। सत्तामादाय तत्रैवातिव्याप्तिवारणाय सत्ताभिन्नेति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

द्रव्यगुणान्यतरत्वरूपधर्ममादाय तत्रैवातिव्याप्तिवारणाय जातिपदम्। नन्वेवं कालिकसंबन्धेनासमवायिकरणे गुणादौ वर्तमाना सत्ताभिन्ना द्रव्यत्वजातिरस्तीति तामादाय पुनस्तत्रातिव्याप्तिरिति चेन्न, वृत्तित्वस्य समवायेन विवक्षितत्वात्। यद्यप्यसमवायिकारणसमवेतसत्ताभिन्नजातिरगुणत्वादिरूपा, सा च कालिकेन द्रव्येऽप्यस्ति; तथाप्यसमवायिकारणसमवेतसत्ताभिन्नजातेरपि समवायेनाधिकरण्यस्य विवक्षान्न दोषः।

प्रश्नः ६—क्षितिर्जलं तथा तेज इत्यादिकारिका व्याख्येया?

उत्तरम्—पृथिव्यप्तेजावायुमनसां परत्वापरत्वमूर्तत्वक्रियावेगत्वं साधर्म्यम्। ननु मूले क्रियापदस्य सत्त्वात् 'धात्वर्थो हि क्रिया ज्ञेयो भाव इत्यभिधीयते' ननु यत्र घटादौ परत्वन्नोत्पन्नं तत्रातिव्याप्तिः, न च द्रव्योत्पत्तिद्वितीयक्षणे गुणोत्पत्त्यङ्गीकारेण गुणान्तरस्येव तत्र परत्वादेरुत्पत्तिर्नोचितैवेति वाच्यम्, यतः दैशिककालिकपरत्वयोरपेक्षाबुद्धिजन्यत्वेनापेक्षाबुद्धिरेव यत्र नोत्पन्नो सुतरां तत्र तयोरभावस्तथा च तत्रायाप्तिरिति चेन्न परत्वापरत्वसमवायाधिकरणद्रव्यत्वस्याप्यजातिमत्वस्य ग्रहणेनादोषात्। यत्र घटादौ परत्वादिकमुत्पन्नं स परत्वाद्यधिकरणं तद्वृत्तिद्रव्यत्वव्याप्यजातिः पृथिवीत्वं तद्वत्वं तस्यापि, आत्मन्यतिव्याप्तिवारणाय परत्वादिसामानाधिकरणेति, तत्रैवं सत्तां गृहीत्वातिव्याप्तिवारणार्थं द्रव्यत्वव्याप्येति जातेर्विशेषणम्। नन्वेवं द्रव्यत्वव्याप्यजातित्वं द्रव्यत्वेऽपि तादृशजातिमत्वमाकाशेऽतिव्याप्तमिति चेन्न, द्रव्यत्वान्यद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्। मूर्तत्वञ्चापकृष्टपरिमाणवत्त्वम्। नन्वेवं परमाणुपरिमाणस्य कुतोऽप्यकृष्टत्वाभावात्तत्राव्याप्तिरिति चेन्न। अविभुवृत्तिपरिमाणवत्वमित्यर्थेनादोषात्। एवं कर्मत्वमपि कर्मसमानाधिकरणद्रव्यत्वव्याप्य जातिमत्वम्। एवं वेगवत्त्वमपि बोध्यमिति दिक्।

प्रश्नः ७—रूपत्वादिकं केषां साधर्म्यम्?

उत्तरम्—'रूपत्वद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः' इत्युक्तम्, तेन पृथ्व्यप्तेजसां रूपवत्वं द्रवत्ववत्वं प्रत्यक्षविषयत्वञ्च साधर्म्यम्। ननु चक्षुरादौ भर्जनकपालस्थवह्नेरुष्मणश्च रूपत्वन्नास्ति, सहसा तेषां रूपवत्वाभ्युपगमे तु चाक्षुषप्रत्यक्षापत्तिस्तेषां स्यादिति चेन्न। चक्षुरादिकं रूपवत् 'तेजस्त्वात्'

ajGuru Math, Shivala, Varanasi Collection. Equipment Heritage Foundation. Gangao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रदीपवदित्यनुमानेन तेषां रूपवत्वेऽपि तदीयरूपस्यानुद्भूतत्वेन प्रत्यक्षाभावात्। एवं वाय्वानीतः पार्थिवादिभागो रूपवान् पृथ्वीत्वाद् घटादिवत्-इत्याद्यनुमानेन वाय्वानीतपृथ्वीजलतेजोभागानां रूपवत्वं बोध्यम्। ननु घटादौ पिण्डीभूते सुवर्णे द्रव्यत्वमव्याप्तिमिति चेन्न, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणेनादोषात्। द्रवत्ववद् घृतं तद्वृत्तिद्रव्यत्वव्याप्यजातिः पृथिवीत्वं तद्वत्वं घटादावेवं द्रुतसुवर्णमादाय तत्र समन्वयः। ननु प्रत्यक्षविषयत्वं परमाण्वादेर्नास्ति तत्र महत्त्वाभावात् इति तत्राव्याप्तिः, रूपादौ चातिव्याप्तिस्तेषां प्रत्यक्षाविषयत्वादिति चेन्न। चाक्षुषलौकिकप्रत्यक्षविषवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य ग्रहणेनादोषात्। चाक्षुषलौकिकप्रत्यक्षविषयो घटादिस्तद्वृत्तिर्द्रव्यत्वव्याप्यजातिः पृथिवीत्वं तद्वत्वपरमाण्वादौ। घटो वायुमानमित्यत्र वाय्वंशे ज्ञानलक्षणप्रत्यासत्या घटविशेष्यकचाक्षुषविषवायुवृत्तिद्रव्यत्वव्याप्यवायुत्वजातिमादाय वायावतिव्याप्ति-वारणाय लौकिकेति। द्रव्यत्वव्याप्येत्यत्र द्रव्यत्वान्यद्रव्यत्वव्याप्यत्वं विवक्षितम्, तेन तद्व्याप्यद्रव्यत्वजातिमादाय तत्रैवातिव्याप्तिरिति ध्येयम्।

प्रश्नः ८—भेदप्रभेदप्रदर्शनपुरस्सरं सोपपत्तिकं निरूप्य पृथिवीत्वजातौ मानमुपस्थाप्यताम्?

उत्तरम्—कारिकायां नानारूपवतीमतेत्युक्तम्—तदयुक्तम्। तस्याः नानारूपत्वलक्षणाङ्गीकारे नैकरूपाभावो यत्र तत्राव्याप्तेरिति चेन्न, रूपद्वयवद्-वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य तेन ग्रहणेनादोषात्। तथाहि वैशेषिकाः पृथिवीपरमाणौ प्रथमं रूपनाशं तदनन्तरं रूपान्तरोत्पत्तिञ्च मन्यन्ते, न त्ववयविन्यवेयवेनावष्टब्धे तस्मिन् तेजप्रवेशासम्भवात् प्रवेशे वा घटादौ छिद्रप्रसङ्गात्, तथा च तेजः क्रियया परमाण्वन्तभङ्गे पाकेन परमाणौ रूपान्तरोत्पत्तौ पुनर्घटोत्पत्तिः सोऽयमिति प्रत्यभिज्ञातुं सादृश्यादिति तेषां राद्धान्तः। नैयायिकाः तु अवयविन्यवयवे उभयत्रापि पाकमिच्छन्ति, तथा चाद्यमते परमाणुगृहीत्वा, द्वितीये घटादिकमादाय लक्षणसमन्वयः। जलत्वजातिमादाय जलेऽतिव्याप्तिवारणाय वृत्त्यन्तम् द्रव्यत्वव्याप्य जलपृथ्व्यन्तरत्वमादाय तत्रैवातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। नन्वेवमपेक्षा-बुद्धिविशेषविषयत्वरूपघटितत्वेन निरूक्तलक्षणे गौरवमिति चेद्रूपनाशवद्वृत्तिद्रव्यत्व-व्याप्यजातिमत्त्वमेव तदिति गृहाण; समन्वयपदकृत्ये पूर्ववज्ज्ञेये।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रश्नः ९—परमाणुसद्भावे का युक्तिः इति लिखत?

उत्तरम्—निरूक्तरीत्याऽवयविनः सिद्धौ तदवयवानामनन्तत्वेऽनन्तावयवत्वेन मेरुसर्षपयोः साम्यप्रसङ्गात् द्वयगुणकस्य सावयवारब्धत्वेन महत्त्वापत्तिप्रसङ्गाच्च, क्वचिद्विश्रान्तिकल्पनाया विश्रामावधेर्नित्यत्वं सिद्धम्, न च तस्यानित्यत्वमेव किन्नति वाच्यम्, तथा सत्यसमवेतभावकार्योत्पत्तिप्रसङ्गे कार्यकारणभावव्यस्थोच्छेदप्रसङ्गात्। ननु तस्य नित्यत्वसिद्धावप्यणुत्वे किम्मानमिति चेत्, महत्वपरिमाणतारतम्यस्यं गगनादौ विश्रान्तिवदणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तेत्वाभ्युपगमे तद्विश्रामाश्रये परमाणुत्वसिद्धिः। न च त्रसरेणावेव विश्रामः किन्नेति वाच्यम् त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानेन तस्य सावयवत्वात्, हेतौ चाक्षुषपदमात्मनि व्यभिचारवारणाय, घटाभावे तद्वारणाय द्रव्यपदम्। न चोक्तानुमितौ चाक्षुषद्रव्यत्वमस्तु सावयवत्वं मास्त्विति युक्तम्, यतः चाक्षुषद्रव्यत्वं यदि सावयवत्वव्यभिचारि स्यात्तदा सावयवत्वव्याप्यानेकद्रव्यत्वव्याप्यापकृष्टमहत्त्वव्याप्यं न स्यात्, यतः सावयवत्वव्यानेकद्रव्यत्वव्याप्यापकृष्टमहत्त्वव्यापारयमतो न व्यभिचारोत्यनुकूलतर्कसद्भावात्। ननु तर्हि द्वयणुक एव विश्रामोऽस्त्विति चेन्न, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तस्यापि सावयवत्वात्, नन्वेवं द्वयणुकावयवाः सावयवद्रव्यारम्भकत्वात्कपालवदित्यनुमानेन परमाणुनामपि सावयत्वं सिद्धम् इति चेन्न, तथा सत्यनवस्थाप्रसङ्गे निरुक्तदोषापत्त्या तस्यानित्यत्वस्वीकारात्। इत्थञ्च परमाणोर्नित्यत्वं चरमावयवत्वञ्च सिद्धम्।

प्रश्नः १०—पृथिव्याः विषयः कः तत्वञ्च किम् इति यथाग्रन्थं लिखत?

उत्तरम्—द्वयणुकादिब्रह्माण्डान्तरूपा पृथिवीविषय इत्युक्तम्। तत्र तद्विषयत्वं न जातिः, सामान्यादावपि तत्सत्त्वात्, किन्तु सुखदुःखान्यतरसाक्षात्काररूपोपभोगसाधनत्वं तत्। ननु साक्षादुपभोगसाधनत्वं द्वयणुकादावव्याप्तम्, साक्षात्परम्परासाधारण्यविवक्षायां परमाणवति व्याप्तम्, तथा च द्वयणुकादिब्रह्माण्डान्त इति ग्रन्थविरोध इति चेन्नं, परमाणोरपि विषयत्वेन साक्षात्परम्परासाधारण-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

भोगसाधनत्वस्य विवक्षितत्वात्। न च मूलग्रन्थविरोधः, कार्यरूपपृथिव्या एव प्रकारत्रयेण विभागात्। कार्यपृथिवीविषयपरत्वेन मूलग्रन्थस्य सत्त्वादेव सर्वस्यादृष्टाधीनत्वं तट्टीकायामुक्तं तत्र कार्यपदन्तु नोपादेयमेव। ननु कार्यमात्रम्प्रत्यदृष्टस्य समवायसम्बन्धेन हेतुत्वे समवायसम्बन्धेन घटाद्यधिकरणे कपालादौ समवायेन तत्रादृष्टभावाद्व्यभिचारः, न च स्वसमवायिसंयोगेनादृष्टस्य तत्र हेतुतेति वाच्यम्, उक्तसम्बन्धेन शब्दरूपकार्याधिकरणे गगनेऽदृष्टसमवाय्यात्मसंयोगाभावेन तत्र व्यभिचारादिति चेन्न, स्वरुपवायिसंयुक्तसंयोगेन तस्य हेतुत्वाङ्गीकारात्। स्वमदृष्टम्, तत्समवाय्यात्मा तत्संयुक्तो वाय्वादिस्तस्य संयोगो गगने, वस्तुस्त्वदृष्टस्य न कार्यमात्रम्प्रति हेतुता साक्षात्, किन्तु तत्सामग्रयेव तत्कार्यजनिका, तथा च सामग्रीसम्पादकत्वेन परम्परया तदुपयोगः, क्वचित्तु मेघसंचारादौ साक्षाद् एव हेतुः। तदुक्तम् 'यत्कार्यं यद्दृष्टाधीनं तत्तदुपभोगं साक्षात्परम्परया वा जनयत्येवेति। नन्वेवं सर्वस्यैव विषयत्वे शरीरादिभेदेन तस्यास्त्रैविध्यन्न स्यादिति चेन्न। शरीरेन्द्रियभिन्नत्वं सत्युपभोगसाधनत्वं विषयत्वमिति स्वीकारादिति शम्।

प्रश्नः ११—चक्षुषस्तैजसत्वे का युक्तिरिति यथाग्रन्थं लिखत?

उत्तरम्—'इन्द्रियं नयनमिति' मूलम, एतेन चक्षुरिन्द्रियस्य तैजसत्वमुक्तम्। ननु तत्र किम्मानम् इति चेत्, चक्षुःतैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत् दृष्टान्तस्य प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणायाद्य परकीयेति, चक्षुषः परकीयरूपव्यञ्जकत्वादसिद्धिवारणाय स्पर्शादिति, उक्तरीत्या परकीयरूपव्यञ्जकजले व्यभिचारवारणाय हेतो सत्यन्तम्, गगनादौ व्यभिचारवारणाय विशेष्यदलम्, घटादेः स्वीयरूपव्यञ्जकत्वात् तत्र व्यभिचारवारणाय द्वितीयपरकीयेति, चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीत्यपि पूरणीयम्। विशेष्यदले रूपपदानुपादाने विशेषणदले स्पर्शादिपदेन पञ्चानामपि स्पर्शरूपसगन्धशब्दानां ग्रहणे हेत्वप्रसिद्धिः तद्व्यावृत्तये केषाञ्चिदेव तत्रत्यादिपदेन ग्रहणे गन्धेतरस्य तत्त्वे कुङ्कुमगन्धादिव्यञ्जकगोधृतादौ व्यभिचारो रूपतरस्यादिशब्देन ग्रहणे प्रमाणाभावोऽपि च घटादेः परकीयस्पर्शाद्यव्यञ्जकत्वेन

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

परकीय आत्मनो गुणो ज्ञानं तस्य च विषयतयाव्यञ्जकत्वाद् घटादौ व्यभिचारोऽतो रूपपदम्। वस्तुतस्तु प्रथमं परकीयत्र देयमेव, किन्तु द्रव्यत्वे सति परकीयरूपव्यञ्जकत्वादित्येव हेतुः। न च प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वाद् दृष्टान्तसिद्धिः, इदानीं प्रभाया दृष्टान्तत्वादिति शिवम्।

प्रश्नः १३—योगजसन्निकर्षः कतिविधस्तस्य कुत्र पदार्थेऽन्तर्भावः इत्यावान्तरप्रश्नः समाधेयः?

उत्तरम्—अत्रायभिसन्धिः-योगिभिरहङ्कारोपादानकत्वमिन्द्रियाणां मन्यतेऽहंकारस्य च व्यापकत्वादेशान्तरेऽपि सत्त्वं ततो योगीन्द्रियाणां सर्वत्रैव सत्वात् सर्वत्र सर्वदा प्रत्यक्षं, न च वाच्यं योगिवत् सर्वेषां सर्ववस्तुभानप्रसङ्ग इति, योगिनां योगमहिम्ना सत्वाविर्भावेन तमोनिरासेन तत्संभवेऽपि तद्वितरेषां तमोबाहुल्यप्रतिबन्धकवशात् तयाभानासम्भवात्। उक्तं हि योगभाष्ये-'कार्येन्द्रियप्रकृतयश्च स्वं एवं विकारमनुगृहणन्त्यापूरेण धर्मादिनिमित्तमपेक्षमाणा' इति। स्वमते चेन्द्रियाणाम्भौतिकत्वाद् देशान्तरेऽसत्वात्तत्रत्यपदार्थानाम्भानाप्रसक्तिरतो योगजोऽपि सन्निकर्षोऽङ्गीक्रियते तार्किकैः, स च चित्तवृत्तिनिरोधात्मकयोगभ्यासजनितो धर्मविशेषरूपः-श्रुतिपुराणादिप्रतिपाद्यः सोऽपि युक्तयुञ्जानयोगिद्वैविध्याद् युकतयुञ्जानरूपो द्विविधः। तत्र मनोजन्यधर्माश्च संयोगो द्रव्यप्रत्यक्षे कारणम्; द्रव्यत्वादिप्रत्यक्षे तदाश्रयसंयुक्तसमवायः, रूपत्वादिप्रत्यक्षे च तदाश्रयसंयुक्तसमवेतसमवाय इत्यादि, यद्यपि न योगमात्रः सन्निकर्षस्तथापि तद्घटितत्वात्तेन शब्देन व्यवह्रियते सामान्यलक्षणादिव, तथा चोक्तम् 'योगजो द्विविधो प्रोक्तो युक्तयुञ्जानभेदतः' इति। तत्र युक्तयोगिनो ध्यानाद्यभावेऽपि युक्तरूपयोगतो धर्मेण सन्निकर्षेण विषयभानं भवति, युञ्जानयोगिनो ध्यानादिसचिवेन युञ्जानसन्निकर्षेण सर्वविषयभानं तदप्युक्तम्-

'युक्तस्य सर्वदा भानं चिन्तोसहकृताऽपर' इति योगजसन्निकर्षस्य योगमाहात्म्यलक्ष्यत्वाद्यागादिभिरदष्ट इव योगजन्योऽदृष्ट धर्मरूप एवेति गुणेऽन्तर्भावो न पदार्थान्तरमिति सिद्धम्।

❖

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

विषयानुक्रमणिका

क्र०सं०	प्रश्नाः	पृष्ठाङ्काः
१.	"ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिम्प्रति कारण"-मिति ग्रन्थोत्थाने किं कारणम्?	१
	अथवा—मङ्गलस्य सफलत्वानुमानं कीदृशम्?	
	अथवा—अर्वाचीनप्राचीनयो: को मतभेद:? का विघ्नस्य चावश्यकता।	
२.	ईश्वरसत्तायां दिनकरीकारेण किं मानमुपस्थापितमिति सम्यगालोच्यताम्?	
	अथवा—ईश्वरसिद्धिप्रकारं ग्रन्थानुसारं समालोच्यताम्?	३
३.	शक्तेः सप्तपदार्थातिरिक्तत्वं कया युक्त्या, कस्य मतम्, कथं च तन्निराकरणम्, क्व च न्यायनये तस्य अन्तर्भाव:?	
	अथवा—शक्तिसादृश्ययो: पदार्थान्तरत्वं निरस्यताम्?	४
४.	द्रव्यत्वजातौ किं मानमिति, किं बीजम्?	
	अथवा—द्रव्यत्वजातिसिद्धिप्रकार: क:?	६
५.	तमसो दशमद्रव्यत्वं निराक्रियताम्?	७
६.	प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं जातिलक्षणं व्याख्यायताम्?	
	अथवा—जातिबाधका: के? कानि च तेषामुदाहरणानि?	८
७.	एतदुक्तजातिबाधकानि परिष्कृत्य तदुदाहरणानि निरूप्यत्ताम्?	९
८.	किं स्वरूपो विशेषपदार्थस्य, तदङ्गीकारश्च कथम्?	१०
९.	समवायस्य सपदकृत्यं लक्षणं किम्? सिद्धिप्रकार:? समवायस्वीकारे का युक्ति:?	११
१०.	सलक्षणोदाहरमभावसामान्यविशेषं प्रदर्श्य तस्याधिकरणरूपत्वेऽनुपपत्तिः सोदाहरणं प्रदर्शयत?	१३
११.	द्रव्यादिपञ्चानामनेकत्वं समवायित्वञ्च साधर्म्यमवादि तथा गुणादे: गुणशून्यत्वं क्रियारहितत्वञ्च साधर्म्यमवादि, तत्र सर्वत्र साधर्म्यस्वरूपं तथा प्रतिपाद्यताम् यथा क्वापि दोषो न प्रसज्येत?	१५
१२.	गुणादीनां किं साधर्म्यं तदतिप्रसक्तिश्च कथमुत्पत्तिकालीनघटादौ, तदानीं तेषां किमिति निर्गुणत्वम्, तदुद्धारश्च कीदृश:?	१६

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

१३. "परिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्" इति कारिकांशो व्याख्येय:?
अथवा—किन्नाम पारिमाण्डल्यं कथङ्कारं तस्य कारणत्वम्? १७
१४. संलक्षणोदाहरणं सामान्यविशेषं कारणं निरूपणीयम्। १८
१५. कियन्त: केऽन्यथासिद्धा उच्यन्तान्ते समासत:? १९
१६. गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वम्" इति कारिकांशो व्याख्येय:?
अथवा—असमवायिकारणं कस्य साधर्म्यम्? २१
१७. आश्रितत्वं कस्य साधर्म्यं तस्य समवायेन ग्रहे समवायाभावयोरव्याप्ति:—वृत्तित्वसामान्यविवक्षायां नित्यद्रव्येष्वतिव्याप्तिरिति परिहरणीया? २२
१८. क्षितिर्जलं तथा तेज इत्यादि कारिका व्याख्येया? २३
१९. पृथिव्यादिपञ्चभूतानां केषां साधर्म्यं तन्निरूप्यताम्? २३
२०. "अथाकाशशरीरिणाम् अव्याप्यवृत्ति: क्षणिको विशेषगुण इष्यते" इति कारिका सम्यक् समालोच्यताम्? २४
२१. रूपवत्वादिकं केषां साधर्म्यम्? २६
२२. पाषाणादीनां पार्थिवत्वमनुमानप्रणाल्या ग्रन्थदिशा संसाधनीयम्?
अथवा—निर्दुष्टं पृथिव्या: लक्षणं किम्? २७
२३. भेदप्रभेदप्रदर्शनपुरस्सरं सोपपत्तिकं निरूप्य पृथिवीत्वजातौ मानमुपस्थाप्यताम्? २९
२४. परमाणुसमूहस्य घटादिरूपत्वे को दोष:? २९
२५. परमाणुसाधनरीति: का?
अथवा—परमाणुसद्भावे का युक्ति:? ३१
२६. सपदकृत्यं शरीरलक्षणं किम्? मानवशरीराणां पार्थिवत्वे किं मानम्? सति पार्थिवमात्रे कथं पञ्चभौतिकत्वव्यवहार:? वृक्षादीनां च शरीरत्वे किं मानम्? ३२
२७. घ्राणेन्द्रियस्य पार्थिवत्वं संसाध्य तत्साधकहेतुघटकपदव्यावृत्तिरभिधीयताम्? ३३
२८. पृथिव्या विषय: क: तत्त्वञ्च किम्? ३४
२९. कथन्तावत्परमाणुसाधारणं जलत्वं सिध्यति? ३५

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

०. वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलाविति कारिका व्याख्येया?
अथवा—जले शुक्ल एव वर्णः, मधुर एव रसः, शीत एव स्पर्श
इति त्रितयमेव सम्यक् प्रतिपाद्यताम्? ३६

१. "उष्णस्पर्शस्तेजस्तु स्याद्रूपं शुक्लभास्वरम्, नैमित्तिकद्रवत्वन्तु
नित्यतादि च पूर्ववदि" ति कारिका व्याख्येया? ३८

२. हेतुघटकपदोपादानफलमुपपादयता चाक्षुषस्तैजसत्वं प्रसाध्य
प्रमाणदृष्टान्तत्वपक्षे द्वितीयपरकीयपदप्रयोजनमभिधीयताम्?
अथवा—चक्षुषस्तैजसत्वे का युक्तिः? ३८

३. पीतिमाश्रयस्याद्रुतत्वपक्षे द्रुतत्वकल्पे च सुवर्णस्य तेजसत्वं
प्रसाध्य हेतुघटकपदव्यावृत्तिः का? इति समीक्ष्यताम्?
अथवा—सुवर्णस्य तैजसत्वे किं स्वरूपमनुमानम्? ३९

४. किं तावद् वायोर्लक्षणम्, तत्साधकानुमानश्च किम्? तद्भेदाश्च के?
त्वगिन्द्रियस्य वायवीत्वं कथमिति सर्वं निरूप्यताम्? ४०

५. विशेषणासिद्धि-विशेष्यासिद्धिनिराकरणपूर्वकं गगनसाधकानुमान-
प्रणाली कीदृशी? ४१

६. कालस्य किं लक्षणम्, तस्य सद्भावे किं मानम्, कथं तस्यैकत्वे
क्षणदिनादिव्यवहारश्च? ४३

७. दिशः सद्भावे किम्मानम्, तस्या एकत्वे प्राच्यादिभेदव्यवहारः
कथमिति निरूप्यताम्? ४५

८. ईश्वरसाधारणमात्मजातिं प्रसाध्यात्मसद्भावे किम्मानमिति
निरूप्यताम्? ४५

९. मानवशरीराणां पार्थिवत्वे किं मानम्? कथं पाञ्चभौतिकत्व-
व्यवहार इति समीक्ष्यताम्?
अथवा—शरीरस्य कर्तृत्वे किं दूषणम्? ४७

०. इन्द्रियात्मवादं निराकृत्य मनसश्चैतन्यं खण्डय?
अथवा—बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति प्राच्यन-
व्यमतेन विविच्यताम्? ४८

१. आत्मनः क्षणिकविज्ञानरूपत्वे को दोषः?
अथवा—आत्मजातिसाधनप्रणाली कीदृशी?
अथवा—क्षणिकविज्ञानवादि-बौद्धानां मतमुपन्यस्य निराक्रियताम्? ४९

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

४२. आत्मनो नित्यविज्ञानरूपत्वं कुतो न? ५

४३. आत्मनिरूपणप्रस्तावे सांख्यमतं कथां युत्त्या निरस्तं विश्वनाथेन? ५

४४. बुद्धि: कतिविधा, अनुभूतिश्च कतिविधा, कानि च तस्याः करणानि? प्रत्यक्षलक्षणं च सोदाहरणं सभेदं प्रदर्शयत? ५

४५. कियतां पदार्थानाञ्चाक्षुपप्रत्यक्षन्तत्र चोद्भूतरूपस्य कारणता ुपगमे का क्षतिः? ५५

४६. बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षसामान्यम्प्रति किं कारणमत्र च प्राच्यनव्यमतेन विविच्यताम्? ५६

४७. "त्वचो योगो मनसा ज्ञानकारणम्" इति कारिकांशो व्याख्यायताम्? ५

४८. निर्विकल्पकज्ञानस्यावश्यकता का? तस्य किं स्वरूपम्? तस्य किं लक्षणम्? तत्प्रत्यक्षं भवति न वा? तत्स्वीकारे का युक्तिरिति विविच्यताम्? ५८

४९. षड्विधप्रत्यक्षे महत्त्वस्य केन सम्बन्धेन हेतुत्वमिति विविच्यताम्? ५

५०. इन्द्रियत्वं कथन्न जातिः? किं च तस्य सपदकृत्यं लक्षणम्? ५

५१. षोढा सन्निकर्षाः सोदाहरणा निरस्यन्ताम्? ६

५२. पृथिवीपरमाणुनीले नीलत्वस्य पार्थिवपरमाणौ पृथिवीत्वस्य वायौ तदीयस्पर्शादौ सत्तायाः पृष्ठत आलोकसंयोगेऽग्रतश्चक्षुः संयोगे घटस्य चाक्षुषप्रत्यक्षं कुतो न? ६१

५३. समवायसन्निकर्षसद्भावे का युक्तिः? ६२

५४. वैशेषिकमते समवायप्रत्यक्षाऽभावं कथं कथञ्च मतान्तरे तत्प्रत्यक्षम्? ६३

५५. अभावप्रत्यक्षे चरमसन्निकर्षे सङ्गमय्य तत्प्रत्यक्षे योग्यानुपलब्धेर्हेतुत्वं कथं का च सा? ६

५६. अलौकिकसन्निकर्षः कतिविधस्तदस्वीकारे कानुपपत्तिः? ६

५७. सामान्यलक्षणज्ञानलक्षणप्रत्यासत्योः को भेदोऽन्तरेणापरस्या-गतार्थत्वं कुतो नेत्यवान्तरप्रश्नः? ६

५८. योगजसन्निकर्षः कतिविधस्तस्य कुत्र पदार्थेऽन्तर्भाव इत्यवान्तरप्रश्नः? ६

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

॥ श्रीगणेशाय नमः ॥

न्यायसिद्धान्तमुक्तावली

प्रत्यक्षखण्डः

प्रश्नः १-"ननु मङ्गलं नं विघ्नध्वंसं प्रति न वा समाप्तिम्प्रति कारण" मिति ग्रन्थोत्थाने किं कारणम्?

अथवा-मङ्गलस्य सफलत्वानुमानं कीदृशम्?

अथवा-अर्वाचीनप्राचीननयोः को मतभेदः? का विघ्नस्य च्चावश्यकता?

उत्तरम्-अथ कारिकावल्यां नूतनेत्यादिना भगवत्कृष्णनमस्काररूपं मङ्गलमाचरितम्, तन्न युक्तम्, तस्य निष्फलत्वात्, न कुर्यान्निष्फलं कर्मेत्यभियुक्तोक्त्या निष्फलानुष्ठानस्य निषिध्यमानत्वात्। न च समाप्तिरेव तत्फलमिति वाच्यम्, कार्यकारणभावनियामकान्वयव्यतिरेकव्यभिचारात्—तथा हि तत्सत्त्वे तदितरयावत्कारणसत्त्वे तत्समन्वयः तदभावे व्यतिरेक इत्यनयोराकारः, तौ च दंडघटयोर्दृष्टौ न तु मंगलसमाप्त्योः, कादम्बर्यादौ मंगलकलापसत्त्वेऽपि समाप्त्यभावात्-किरणावल्यादौ तदभावेऽपि तद्दर्शनात्—तथा च मंगलं फलसामान्याभाववत् फलविशेषशून्यत्वात्, पारिमाण्डल्यवत्—तथा च मंगलं फलसामान्याभाववत् फलविशेषशून्यत्वात्, पारिमाण्डल्यवत्—अत एव मङ्गलं कर्तव्यताकभाववत् फलसामान्यशून्यत्वात् निष्प्रयोजनजलताडनवत्, इति चेन्न, मंगलं सफलम्, अविगीतशिष्टाचारविषयत्वात्, दर्शपौर्णमासादिवत्—इत्यनुमानेन तस्य फलत्वसिद्धेः, श्येनयागादौ व्यभिचारवारणाय अविगीतेति, फलसाधनतांशे भ्रमरहितत्वं शिष्टत्वम्—तेन व्युत्क्रमकृतदशादिर्निष्फलत्वेऽपि न व्यभिचार नन्वेवं सामान्यतस्तस्य फलवत्त्वसिद्धावपि विशेषतः समाप्तिरेव तत्फलमिति कथं लभ्यते, गंगास्नानादिवददृष्टार्थकतैव किं न स्यादिति। [illegible] दृष्टसम्भवाद् एव तत्कल्पनात्। ननु तर्हि विश्वजिन्न्यायात् स्वर्ग एवेष्ट कल्प्यतामिति, चेन्न, तदनुपस्थितत्वात्—समाप्तिफलस्योपस्थितत्वाच्च, एवञ्च परिशेषानुमानेन सा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

तत्फलमिति कल्प्यते, अत्रायं प्रयोगः—मंगलं समाप्तिफलकं समाप्त्यन्याफलक सति सफलत्वात्-यद्यदन्याफलकत्वे सति सफलं तत्तत्फलकम्, यथा घट जलाहरणादिकं तथा चेदम्—तस्मात्तथा, नन्वेवमसत्यपि मंगले नास्तिकग्रन्थ समाप्तिदर्शनेन व्यतिरेकव्यभिचार इति चेन्न, ताम्प्रति तस्य कारणत्वनिर्ण तत्रापि जन्मान्तरीयतत्कल्पनात्—न चैवं कादम्बर्यादावन्वयव्यभिचारज्ञा मत्तज्जनकताग्रहविरोधि स्यादेवति वाच्यम्—"सति विरोधे बलवता दुर्ब बाध्यते" इति न्यायेन मंगलापेक्षया विघ्नस्य प्राबल्यात्, तदपेक्षया तेषामाधिक्याच ननु तथापि तत्र विघ्नध्वंसो माभूत्, तत्र समाप्तौ मंगलस्य कारणत्वेन तत्सत्व सा किमिति नेति चेन्न, यागेन स्वर्गे साध्येऽपूर्वं इव विघ्नध्वंसस्य तदव्यापारत्व तदभावेन तस्या अभावात्—अथैवं मंगलस्य स्मृतिरूपत्वेन समवायेनात्मनिष्ठत्व समाप्तेश्च चरमवर्णध्वंसरूपाया आकाशनिष्ठत्वाद् वैय्यधिकरण्येन कथंकारं त कार्यकारणभाव इति चेन्न, स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेन समा प्रति तस्य कारणत्वस्वीकारेणादोषादिति प्राचीनमतम्।

अथ विघ्नध्वंसस्य तद्व्यापारं वदतः प्राचीनमतेऽपि तस्य मङ्ग कार्यत्वमापतितम्, व्यापारस्य तज्जन्यत्वे सति तज्जन्यजनकत्वरूपत्वात् वि मे निवर्ततामिति कामनया तत्र प्रवृत्तेश्च, विघ्नध्वंस एव तत्फलम्-नन्वेवं समाप्तिर्नियतकारणानियम्येति चेन्न, बुद्धिप्रतिभादेस्तत्कारणत्वात्। ननु ध्व प्रति प्रतियोगिनः कारणत्वाद् विघ्नात्यन्ताभाववत् पुरुषेण कृते मंगले व्यभिचार विघ्नस्यैवाभावादिति चेन्न, तत्कृतमंगले निष्फलत्वस्यैवेष्टतत्-न च तस्य निष्फल प्रवृत्तिरेव कथमिति वाच्यम्। तदाशङ्कयैव तदाचरणात्। ननु प्रव प्रतिनिश्चयात्मकज्ञानस्य कारणत्वेन सैवानुपपन्नेति चेन्न, मंगलप्रवृत्तौ तज्ज्ञानमा प्रवर्तकत्वात्, यद्यपि विघ्नसंदेहे तदाचरणमयुक्तं तथाप्यत्र तादृशशिष्टाचारेण प्रवृत्तिः, ननु निर्विघ्नपुरुषाचरितमंगलेऽन्वयव्यभिचारेण तद्ध्वंसं प्रति कारणताबाधितत्वं बाधितार्थबोधकत्वेन "विघ्नध्वंसकामो मंगलमाचरेत्" वेदस्याप्रामाण्यापत्तिरिति चेन्न, सति विघ्ने तद्ध्वंसस्य तद्बोधि प्रतियोगिरूपकारणाभावेन दुरितध्वंसरूपकार्यानुपपत्त्या तस्याप्रामाण्याभावात्,

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रति प्रतियोगिनः कारणत्वादेव पापभ्रान्त्याऽनुष्ठितप्रायश्चित्तस्य वैफल्येऽपि न तद्बोधकवेदाप्रामाण्यम्, न च विघ्नध्वंसत्वावच्छिन्नं प्रति न मङ्गलस्य कारणता, "सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः" इत्यादिना तत्पाठस्यापि तद्ध्वंसजनकताबोधनात् प्रायश्चित्तभोगादिना तद्ध्वंसे व्यभिचाराच्चेति साम्प्रतम्, मङ्गलस्य स्वाव्यवहितोत्तरक्षणोत्पत्तिकसम्बन्धेन मङ्गलविशिष्टविघ्नध्वंसत्वस्य कार्यतावच्छेदकत्वेनादोषात्। ननु यदि मङ्गलस्य विघ्नध्वंस एव फलं तर्हि समाप्तिकामस्य तत्र प्रवृत्तिर्न स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वात्तत्र प्रवृत्तिर्वाच्या तदेव न सम्भवति विघ्नात्यन्ताभावस्थले व्यभिचारेण तद्ध्वंसस्य समाप्तिसाधनत्वाभावादिति चेन्न, तत्र विघ्नात्यन्ताभावस्यैव समाप्तिं प्रति कारणत्वात्। न चैवमननुगम इति वाच्यम्—विघ्नसंसर्गाभावत्वस्यानुगमकस्य सत्वात्। ननु तथापि मङ्गलमन्तरेण समाप्तौ विघ्नध्वंसाभाववति समाप्तेर्दर्शनाद् व्यतिरेकव्यभिचार इति चेन्न, नास्तिकादिग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसकल्पनेनाव्यभिचारात्। ननूभयकल्पने गौरवमिति चेत्तत्रापि विघ्नात्यन्ताभावत्वेनैव समाप्तिकल्पने गौरवाभावात्-इति नव्याः।

प्रश्नः २-ईश्वरसत्तायां दिनकरीकारेण किं मानमुपस्थापितमिति सम्यगालोच्यताम्?

अथवा--ईश्वरसिद्धिप्रकारं ग्रन्थानुसारं समालोच्यताम्?

उत्तरम्—ननु मूले "तस्मै कृष्णाय नमः" इत्यनेन कृष्णस्य नमस्कार्यत्वमुक्तम्, तच्चायुक्तम्, तत्रैव प्रमाणाभावात्। न च तत्र प्रत्यक्षं प्रमाणमिति वाच्यम्, "रूपमत्रापि कारणं द्रव्याध्यक्षे" इति वक्ष्यमाणप्रकारेणेश्वरस्यारूपि द्रव्यत्वेन चाक्षुषस्पार्शनप्रत्यक्षयोरभावात्। भवन्मते तस्य द्रव्यत्वेन शब्दगन्धरसग्राहकाणां श्रोत्रघ्राणरसनेन्द्रियाणां तत्राप्रसक्तेश्च, एवं तत्र बाह्येन्द्रियाणां प्रमाणत्वाभावः। नापि मानसं तत्प्रत्यक्षं नैयायिकनये सर्वात्मनां विभुत्वेन सर्वात्मनः संयोगस्य सत्वात् सर्वेषां सर्वज्ञत्वापत्त्या विलक्षणात्ममनःसंयोगस्यैव ज्ञानादिकं प्रति हेतुभावस्य सिद्धतया परात्मवत्तेन तस्य ज्ञानाभावात्। नापि तत्रानुमानं प्रमाणं व्याप्यादिज्ञाने प्रत्यक्षोपजीविनस्तस्य तदप्रसक्तावप्रसक्तेः। एवमुपमानमपि न तत्र

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

मानम्, सादृश्यबुद्धेरभावात्। नापि "द्यावाभूमी जनयन्नि" त्यादि श्रुतिस्तत्र मानमीश्वरोक्तत्वेन तस्याः प्रामाण्यात्, तत्र संदेहे श्रुतिप्रामाण्यस्यापि तत्राभावात्, एवञ्चतुर्विधप्रमाणाभावेनेश्वरो नास्त्येवेति चेन्न, अनुमानस्यैव तत्र प्रमाण्यात्। तथा हि-यद्यत्कार्यं तत्तत्कर्तृजन्यमिति व्याप्तिग्रहे "क्षित्यङ्कुरादिककार्यं कर्तृजन्यं कार्यत्वाद् घटादिवदित्यनुमानेन तेषां कर्तृजन्यत्वसिद्धौ तत्कर्तृत्वस्यास्मदादावसम्भवेन तत्कर्तृत्वेन तत्सिद्धिः, तथा चोक्तम्—

"जगतां यदि नो कर्त्ता कुलालेन विना घटः।
चित्रकारं विना चित्रं स्वत इव भवेत् तदा।।" इति।

नन्वत्र क्षितित्वस्य पक्षतावच्छेदकत्वेऽङ्कुरपदं व्यर्थं तस्यापि क्षितित्वात्, अपि च क्षितित्वसामानाधिकरण्येनानुमितौ घटादौ सिद्धसाधनम्। अवच्छेदकावच्छेदेन तत्त्वे परमाणौ बाधः, जन्यक्षितित्वस्य तत्त्वे परनये सर्वस्य जन्यत्वात् तत्पदव्यावर्त्याप्रसिद्धिरिति चेन्न, कार्यत्वस्यैव पक्षतावच्छेदकत्वेनादोषात्। हेतुपक्षतावच्छेदकयोरैक्यन्तु न शङ्क्यम्, प्रागभावप्रतियोगित्वरूपकार्यत्वस्य हेतुत्वेन, स्वरूपसम्बन्धविशेषरूपस्य तस्य तदवच्छेदकत्वेन च तयोर्भेदात्। अत्रानुमितौ कृतिजन्यत्वमेव साध्यम्, कार्यमात्रं प्रति कृतेर्हेतुत्वेन कारणतावच्छेदके लाघवात्। अथ कार्यत्वमिति सोपाधिको हेतुः, उपाधिश्च शरीरजन्यत्वम्, दृष्टान्तान्तर्भाविण साध्यव्यापकत्वं, पक्षान्तर्भाविण च साधनाव्यापकत्वं, तथा च प्रकृतोपाध्यभावेन प्रकृतसाध्याभावसिद्धिर्जाता। तथा हि; क्षित्यङ्कुरादिकं कृत्यजन्यं शरीराजन्यत्वा-दाकाशवदिति प्रयोगे शरीराजन्यत्वहेतुः सत्प्रतिपक्ष इति चेन्न, त्वन्मते व्यभिचारशङ्कानिवर्तकतर्कशून्यत्वरूपानुकूलतर्काभावात्। ननु तवाप्येष दोष इति चेन्न, कृतित्वेन कार्यत्वेन कार्यकारणभावस्यैव तत्त्वात्। एवञ्च निरुक्तानुमानेनेश्वरसिद्धे तत्प्रोक्तत्वेन श्रुतिप्रामाण्यनिश्चयात्सापि तत्र प्रमाणम्। तदुक्तं मूले द्यावेत्यादिना उक्तानुमानञ्चोपलक्षणमन्यस्यापि।

प्रश्नः ३-शक्तेः सप्तपदार्थातिरिक्तत्वं कया युक्त्या, कस्य मतम्, कथं च तन्निराकरणम्, क्व च न्यायनये तस्य अन्तर्भावः?

अथवा-शक्तिसादृश्ययोः पदार्थान्तरत्वं निरस्यताम्?

उत्तरम्—अत्रायमभिसन्धिः-भाषापरिच्छेदे द्रव्यादयः सप्तपदार्था उक्ताः

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तदयुक्तं, शक्तिसादृश्ययोरपि पदार्थन्तरत्वात्। न च शक्तिसत्वे मानाभावः, अन्यथानुपपत्त्या तत्सिद्धः, तथा हि मण्यादिसमवधाने वह्निना दाहवारणाय मण्यादेः कारणताविघटकत्वरूपप्रतिबन्धकत्वं वाच्यम्, तच्च वह्निनिष्ठदाहानुकूल-शक्तिरूपकारणविघटकत्वेनैव सिध्यत्येवञ्चोभयत्रापि कारणत्वं सिद्धम्। न च क्लृप्तेषु पदार्थेष्वन्तर्भावान्न सा पदार्थान्तरमिति साम्प्रतम्। शक्तिर्न द्रव्यगुणकर्मा तमरूपा तदन्यतमवृत्तित्वात् नापि सामान्याद्यन्यतमरूपा, उत्पत्तिमत्वे सति विनाशित्वात्, नाप्यभावरूपा-भावत्त्वेन प्रतीयमानत्वात्। ननु वह्नौ यदि सा शक्तिरस्ति, तर्हि मण्यादिसमवधाने कुतो न दाह इति चेन्न, तेन तस्या ध्वंसात्। ननु मण्यादेस्तन्नाशकत्वे सत्युतेजके प्रतिबन्धकमण्यादावपसारिते वा दाहानापत्तिरिति चेन्न, उत्तेजकमण्याद्यपसारणाभ्यां तजजननादिति चेन्न, अतिरिक्तशक्तित-द्ध्वंसतत्प्रागभावकल्पनायां गौरवाल्लाघवात्; दाहत्वावच्छिन्नं प्रति मण्यभावविशिष्टवह्नित्वेन कारणतायां मण्यादिसमवधानकाले दाहाभावोपपत्तेः शक्तेरकल्पनात्। न चैवं विशेषणविशेष्यभावे विनिगमकाभावेन वह्निविशिष्टमण्यभावस्यापि कारणत्वसिद्धेः, तवापि गौरवं तुल्यमेवेति शङ्क्यम् . वह्निमण्यभावयोः पृथक्कारणत्वै त्वत्कल्पितशक्त्यपेक्षया गौरवाभावात्। वह्निमण्यभावयोर्हेतुत्वापेक्षया पृथगेकस्याः शक्तेः हेतुता युक्ता लाघवादिति चेन्न, मण्यभावदिर्हेतुत्वकल्पनेनैव मणिसमवधानदशायां दाहवारणसम्भवे नानाशक्तितत्प्रागभावध्वंसकल्पनस्य शक्तिमण्यपसारणयोः कार्यकारणभावकल्पनस्य चायुक्तत्वात्। नन्वेवमुत्तेजकसद्भावे प्रतिबन्धकमणिसत्वेऽपि कथं दाहो मण्यभावरूपकारणाभावादिति चेन्न, उत्तेजकाभावविशिष्टमणेः प्रतिबन्धकत्व-स्वीकारेणोत्तेजकसमवधानकालेऽपि विशिष्टाभावस्य सत्वेन दाहे बाधकाभावात्। विशिष्टाभावस्त्रिधा-विशेषणविशेष्योभयाभावप्रयुक्तभेदात्। तत्रोत्तेजकप्रतिबन्धकवह्नीनां समधाने आद्यः, वह्निमात्रसत्वे द्वितीयः, वह्न्युत्तेजकसत्वे तृतीयः। प्रतिबन्धकवह्निमात्रसमवधाने दाहाभावः, प्रतिबन्धकमण्यभाव-रूपकारणाभावात्। तस्मात् शक्तिर्नातिरिक्तः पदार्थः।.

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

नन्वेवं सादृश्यमतिरिक्तः पदार्थः षड्भावानन्तर्भूतत्वे सत्यभावानन्तर्भूतत्वात् न च विशेषणासिद्धिः, सादृश्यं षड्भावान्तर्भूतम्-सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात् इत्यनुमानेन तत्परिहारात्-सत्यन्तनिवेशेन सामान्यत्वेन व्यभिचारः नन्वेवं प्रमेयत्वे व्यभिचार इति चेन्न, व्यतिरेकित्वे सति सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वेन तत्परिहारात्। यदि सादृश्यं द्रव्यादावन्तरभूतमेव तदा द्रव्यादेः सामान्यावृत्तित्वेन यथा गोत्वं, तथाश्वत्वमिति प्रतीतिर्न स्यात्। न चास्तु तस्यान्तर्भावोऽभावे, भावत्वेन प्रतीयमानत्वातस्मादतिरिक्तन्तदिति चेन्न, यतः चन्द्रवन्मुखमित्यादौ चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्वं मुखे चन्द्रसादृश्यं प्रतीयते, तत्र भेदस्यान्योन्याभावे आह्लादकत्वस्य सुखरूपस्य गुणेऽन्तर्भावेणावशिष्टस्य तस्याभावेन पदार्थान्तराभाव इति।

प्रश्नः ४-द्रवत्वजातौ किं मानमिति, किं बीजम्?
अथवा--द्रव्यत्वजातिसिद्धिप्रकारः कः?

उत्तरम्—अथ मूले 'द्रव्यं गुण' इत्यत्र द्रव्यमित्येकवचनान्तनिर्देशेन 'मनोद्रव्याणि' इत्यत्र बहुवचनेन द्रव्यत्वजातिरभिमता ग्रन्थकारस्य, अन्यथा "जात्याख्याणाम्" इति तादृशपर्यायेण प्रयोगौ न सिध्येताम्, युक्तरञ्चैतद् द्रव्यत्वजातिमद्द्रव्यलक्षणे जातिरूपस्य तस्य शक्यतावच्छेदकत्वे लाघवात्, तथा च तस्य जातित्वे किम्मानम्। न च घटत्वादाविवानुगतप्रतीतिरेव मानमिति साम्प्रतम्। नैयायिकानां घृतजत्वादौ तत्प्रतीतावपि ग्रामीणानां तादृशप्रतीत्यभावात्, ननु घटादिकं विहाय घृतजत्वादौ तदभावकधनमसङ्गतं तेषां घटाद्यपेक्षयाऽप्रसिद्धत्वादिति चेन्न। अनुगतप्रतीत्यभावे बीजाभावं सूचयितुं, घृताद्युपादानात्, अनुगताकृतिव्यङ्ग्या मनुष्यत्वादि जातिर्नहि, नवद्रव्येष्वनुगताकृतिः काचित्संभवति, घृतादावेकत्रापि कठिनत्वद्रवत्ययोरनियतत्वात्, तथा चाभिमतापि द्रव्यत्वजातिरनुगतप्रतीत्या न सिध्यतीति चेन्न। यतो गुणे गुणोत्पत्तिवारणाय कार्यमात्रं प्रति द्रव्यस्यैव समवायिकारणतावाच्याकार्यतावच्छेदकः सम्बन्धः समवायः, कारणतावच्छेदकस्तादात्म्यम्, कार्यत्वञ्च ध्वंसवारणाय भावत्वे सति प्रागभावप्रतियोगित्वरूपम्, तथा च प्रयोगः, समवायसम्बन्धावच्छिन्नकार्यत्वा-

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant

वच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना या नवद्रव्यनिष्ठा कारणता, सा यत्किञ्चिद्धर्मावच्छिन्ना घटनिष्ठकार्यतानिरूपितदण्डत्वावच्छिन्नदण्डनिष्ठकारणतावत्। एवञ्च पदार्थत्वस्य गुणादावतिप्रसक्ततया पृथिवीत्वादेश्च न्यूनवृत्तितया यावद्द्रव्यसाधारणमन्यूनानतिप्रसक्तं द्रव्यत्वमेव तदवच्छेदकं वाच्यम्, तथा च तदवच्छेदकतया तत्सिद्धिः। न च तस्यास्तस्यावच्छेदकत्वमस्तु, द्रव्यत्वं जातिरेवेत्यत्र किम्मानमिति वाच्यम्। कार्यतावच्छेदकतया कारणतावच्छेदकतया प्रतिबन्ध्यतावच्छेदकतया प्रतिबन्धकतावच्छेदकतया च सिद्धधर्मस्यासति बाधके जातित्वमिति तार्किकसिद्धान्तेन प्रकृते प्रतिबन्धकाभावात्तत्सिद्धिः। न च समवायेन नीलादिगुणं प्रति स्वाश्रयसमवेतद्रव्यत्वसम्बन्धेन नीलादेर्हेतुत्वे स्वीकृते न तदापत्तिः, किञ्च कार्यत्वच्छिन्नं प्रति द्रव्यत्वावच्छिन्नस्य न सामान्यतः कारणता, सूत्रादिनापि घटाद्युत्पत्तिप्रसङ्गात्, किन्तु तत्तत्कार्यं प्रति तत्तत्कारणं भिन्नमेव, अपि च कार्यत्वच्छिन्ना कार्यतापि न सम्भवति, तयोरैक्येन स्वस्य स्वावच्छेदकत्वासम्भवात्। तथा चाहुः-"नहि सुशिक्षितोऽपि नटः स्वस्कन्धमारोढुमर्हति" इति, एवञ्च नोक्तविधया सा सिध्यतीति चेन्न। संयोगत्वावच्छिन्नकार्यतानिरूपित-जनकतावच्छेदकतया तत्सिद्धेः। ननु कालाकाशयोः संयोगस्य नित्यतया तत्र चोक्तरूपकार्यत्वस्यासत्त्वेनातिप्रसक्ततया न संयोगत्वं तदवच्छेदकमिति चेन्न, नित्यसंयोगानङ्गीकारात्, विभागत्वावच्छिन्नकार्यतास्वीकारेणादोषाच्च। अनुमानप्रयोगस्तु पूर्ववद्बोध्यमिति सर्वं निरवद्यम्।

प्रश्नः ५-तमसो दशमद्रव्यत्वं निराक्रियताम्?

उत्तरम्—ननु दशमद्रव्यस्य तमसः सत्वान्नवद्रव्याणीत्ययुक्तमिति। न च तत्र मानाभावेन नोक्तमिति वाच्यम्। चक्षुरिन्द्रियरूपप्रमाणेन तद्ग्रहणात्। ननु तमसः सिद्धावपि गुणादावेव तदाधिक्यशङ्का कुतो न क्रियत इति चेन्न, "तमो द्रव्यं रूपवत्वाद्" घटवदित्यनुमानेन तस्य द्रव्यत्वसिद्धेः, तत्रैव तच्छङ्काया युक्तत्वात्। न चानुमानेन रूपसिद्धावपि प्रत्यक्षतस् तत्र गृह्यत इति वाच्यम्, नीलं तम इति प्रत्यक्षस्य सत्वात्। ननु नीलं नभ इव सा प्रतीतिर्भ्रम इति चेन्न, चलतीति प्रतीतेरभ्रमत्वात्। न चैवं तत्सिद्धावपि क्लृप्तेष्वन्तर्भाव इति वाच्यम्,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

तेष्वनन्तर्भावात्। तथा हि तमो न पृथिवी भवितुमर्हति, गन्धशून्यत्वात्, जलादिवत्, नापि जलतेजसी, नीलरूपवत्वात्, पक्वजम्बूफलवत्; नापि वाय्वादिषु, तेषु रूपाभावात्, तमसो रूपवत्वात्। न च द्रव्यनिष्ठलौकिकविषयतासम्बन्धेन चाक्षुषप्रत्यक्षं प्रति समवायेनालोकसंयोगस्य हेतुत्वात्तमसि तदभावेन। द्रव्यत्वमिति वाच्यम्। अनुभवेन तत्सिद्धौ तत्प्रत्यक्षे तन्निरपेक्षचक्षुषः कारणत्वकल्पनात्। ततश्च दशमं द्रव्यं तमः। तदुक्तम्—

तमः खलु चलं नीलं परापरविभागवत्।
प्र्सि द्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति।।इति।

चेन्न तेजोऽभावरूपतत्स्वीकारेणोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात्। न च तमोऽभावस्तेज एव किन्नेति चेन्न, प्रत्यक्षानुभूयमानोष्णस्पर्शं प्रत्यभावरूपस्य तस्य कारणत्वानुपपत्तेः। ननु तेजोऽभावस्य तमस्त्वे तेजस्त्र्यणुकसत्वे, चक्षुरादितेजस्सत्वे, हिरण्यादितेजः सत्वे च कथं तमःप्रतीतिरित्ति चेन्न। प्रकृष्ट-महत्त्वोद्भूतानभिभूतरूपतेजस्त्वावच्छिन्नाभावरूपस्वीकारेणादोषात्। ननु तमसः तथात्वे रूपवत्ताप्रतीति कथमिति चेन्न तत्प्रतीतेर्भ्रमत्वात्। ननु तत्प्रतीतेर्भ्रान्तित्वेऽपि चलतीति प्रत्यक्षसिद्धकर्मवत्वहेतुना तस्यातिरिक्तद्रव्यत्वं सेत्स्यतीति चेन्न, तस्या अन्योपाधिकत्वात् द्रव्येऽन्योपाधिप्रतीतेरभावात्। ननु प्रतीतेर्भ्रमत्वं तत्रैव यत्रोत्तरकाले बाधोऽत्र तदभाव इति चेन्न, अभावातिरिक्ततत्स्वीकारे पार्थिवपरमाण्वादिवत् तस्यापि परमाण्वादि स्वीकारे गौरवेणाभावेऽन्तर्भाव-स्यैवौचित्यादिति शिवम्।

प्रश्नः ६ - प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं जातिलक्षणं व्याख्यायताम्?

उत्तरम्—अत्रायमभिसन्धिः-कारिकायाम् "सामान्यं द्विविधं प्रोक्तम्" इत्युक्तं तदयुक्तम्, विशेषबुद्धौ सामान्यज्ञानस्य हेतुत्वेन सामान्यतः सामान्यज्ञानमन्तरा तद्भेदग्रहासम्भवात्। किञ्च "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्" इत्यभियुक्तोक्त्या तल्लक्षणाभावेऽन्यभेदव्यवहारयोरप्रसक्तिश्चातूष्टीकाकृता नित्यत्वे सत्यनेकसमवेतत्वमित्युक्तम्। तत्र संयोगविभागादीनामनेकसमवे-तत्वात्तत्रातिव्याप्ति-वारणाय सत्यन्तम्, जलपरमाणुरूपादावतिव्याप्तिवारणाय विशेष्यदलम्। ननु तत्र नित्यत्वे सति समवेतत्वमित्युक्तयैव दोषाभावेऽनेकपदं व्यर्थमेवेति चेन्न।

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

गगनपरिमाणादीनां नित्यत्वाद्गुणत्वेन गगनादौ समवेतत्वाच्च तद्भावे तत्रातिव्याप्तेः। ननु लक्षणेऽनेकपदस्यैकत्वावच्छिन्नप्रतियोगिताक-भेदवत्त्वमित्यर्थेऽसंभवः, सर्वत्रैवैकत्वसंख्याया अव्यभिचारादिति चेन्न, स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्वैतदुभयसम्बन्धेन भेदविशिष्टमनेकत्वमिति स्वीकारेणादोषात्। नन्वेवं नित्यत्वे सत्यनेकवृत्तित्वमित्येवोच्यताम्, समवायसम्बन्धावच्छिन्नवृत्तित्वबोधकसमवेतपदं व्यर्थमिति चेच्छृणु, वृत्तिताया विशेषसम्बन्धानियाम्यत्वे घटात्यन्ताभावादीनां नित्यत्वादनेकाधिकरणवृत्तित्वाच्च तत्रातिव्याप्तिवारणाय तत्। नन्वेवं नित्यसंयोगेऽतिव्यातिरिति चेन्न, तदनङ्गीकारात् तुल्यन्यायेन नित्यसंयोगवन्नित्यविभागसिद्ध्यापत्तेश्च ननु नित्यविभागाश्रयाभावान्न स इति चेन्न, कदापि परस्परासंयुक्तपरमाण्वोस्तत्संभवात्, ननु संयोगानन्तरमेव विभागप्रतीत्या तादृशपरमाण्वोः कदापि विभागप्रतीत्या कथं नित्यविभागाङ्गीकार इति चेन्न; क्रियानन्तरमेव संयोगप्रतीत्या नित्येषु तदप्रतीत्या नित्यसंयोगस्याप्यसम्भवात्। ननु विभागस्य नित्यत्वे संयोगनाशको गुणो विभाग इति लक्षणस्य तत्राव्याप्तिरिति चेन्न, नित्यविभागनङ्गीकर्त्तुरेव तल्लक्षणाभ्युपगमात्, इदानीं विभागत्वजातेरेव तल्लक्षणत्वसम्भवात्, तस्मान्न नित्यसंयोगोऽत एव 'अप्राप्तयोऽस्तु या प्राप्तिः सैव संयोग ईरितः' इति वक्ष्यमाणतल्लक्षणं संगच्छत इति सर्वं चतुरस्रम्।

प्रश्नः ७-एतदुक्तजातिबाधकानि परिष्कृत्य तदुदाहरणानि निरूप्यताम्?

अथवा–जातिबाधकाः के, कानि च तेषामुदाहरणानि?

उत्तरम्–अथ जातिलक्षणेऽनेकसमवेतत्वमुक्तम्—तथा चाकाशत्वरूपजातावव्याप्तिः, आकाशस्यैकत्वादिति चेन्न, तस्या अलक्ष्यत्वात्। ननु निःसामान्यत्वे सति विशेषान्यत्वे सति समवेतत्वमित्येव तल्लक्षणं तच्चाकाशेऽपि गतमिति कथं तस्या अलक्ष्यत्वमिति, रूपादावतिव्याप्तिवारणायाद्यं सत्यन्तं, विशेषे तद्वारणाय द्वितीयम्, रूपध्वंसादौ तद्वारणाय विशेष्यदलम् इति चेन्न, बहुवृत्त्यैकधर्मस्य सामान्यत्वेन प्रसिद्ध्यैकव्यक्तौ जातेरनङ्गीकारात्। तथा चाहुः द्रव्यकिरणवल्या-मुदयनाचार्याः—

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

). In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः।। इति।

तत्र, व्यक्तेरभेदः, एकव्यक्तिव्यक्तिकत्वमाकाशत्वादेर्जातित्वे बाधकम्। तुल्यत्वञ्चान्यूनानतिरिक्ताश्रयकत्वम्, स्वभिन्नजातिसमनियतत्वमिति यावत्। तच्च घटत्वकलशत्वादीनां जातिभेदे बाधकम्, एवञ्च घटत्वकलशत्वद्वयं न जातिद्वयम्। परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः संकरः, स च भूतत्व-मूर्तत्वयोर्जातित्वे बाधकः। भूतत्वं विहाय मूर्तत्वस्य मनसि वर्तमानत्वात्, मूर्तत्वं विहाय भूतत्वस्य गगने सत्वात्, तयोश्च पृथिव्यादि चतुष्टये सत्वात्। अनवस्था नामाप्रामाणिकानन्तपदार्थकल्पनाविश्रान्त्यभावः, सा च जातेर्जातिमत्व-बाधिका। न च जातेर्जातिमत्वे व्यक्तेरभेद इत्येव बाधकः, जातेरेकत्वात्तत्र जात्यन्तरायोगादिति चेन्न। यतो निखिलजातिष्वेकं वैजात्यं तद्वैजात्यं तदाश्रयजातिषु पुनर्वैजात्यमित्येवमनवस्था। रूपस्य लक्षणस्य स्वतो व्यावर्तकत्वस्य हानिः विशेषस्य जातिमत्वे बाधिका। सामान्याश्रयस्य सामान्यरूपेणैव भेदकत्वनियमात्, तत्र तत्स्वीकारे तयैव तद्व्यावर्तकत्वे तत्स्वरूपहानिः। असम्बन्धश्च प्रतियोगितानुयोगितान्यतरसम्बन्धेन समवायाभावः। स च समवायाभावयोर्जातिमत्त्वे बाधकः। अत्रायं भावः-यथा घटादिः 'समवायेन स्वसमवायिकारणे तिष्ठति, नैवं समवायः कुत्रचित्समवायेन तिष्ठति नापि तत्र पदार्थान्तरं समवायेन, समवायस्य समवायेन वृत्तावनवस्थाप्रसंगात्। अभावोऽपि स्वरूपसम्बन्धेनैवान्यत्र वर्तते, न तु समवायेन, नापि तत्र पदार्थान्तरं समवायेन तिष्ठत्यतः तयोर्वृत्तिधर्मस्थजातित्वाभावं इति शिवम्।

प्रश्नः ८-किं स्वरूपो विशेषपदार्थस्य, तदङ्गीकारश्च कथम्?

उत्तरम्—अत्रेदमाकूतम् मूले 'अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः' इत्युक्तम् तदर्थश्चान्ते व्यावर्तकानामवसाने वर्तते इत्यन्त्यः, नित्यद्रव्यवृत्तिः, नित्यद्रव्य परमाण्वाकाशादि तद्वृत्तिः, विशेष इति-तथा चान्त्यत्वे सति नित्यद्रव्यवृत्तित्वमिति तल्लक्षणं सम्पन्नम्। ननूक्तव्युत्पत्त्यान्त्यत्वं स्वतो व्यावर्तकत्वमेव, तथा च तदेव तल्लक्षणमस्तु, विशेष्यदलं निरर्थकमिति। न च

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

समवायव्यावृत्त्यर्थे तदिति वाच्यम्, तस्यापि परमाण्वादिनित्यद्रव्यवृत्तित्वात्। न च वृत्तित्व समवेतत्वमेव विवक्षितं तेन तत्रातिव्याप्त्यभाव इति वाच्यम्। तावतापि नित्यपदव्यावर्त्यालाभाच्चेन्न, स्वतो व्यावृत्तत्वमात्रस्यैव तल्लक्षणत्वेन विशेष्यांशस्य तस्यानकथनपरत्वात्। एवञ्च स्वतो व्यावृत्तत्वमेव विशेषत्वम्। नन्वीदृशविशेषपदार्थः किमर्थः स्वीक्रियत इति चेत्, यद्यप्ययं घटः अस्माद् घटाद्भिन्नो भिन्नावयवारब्धात्, एवं घटावयवेऽपि तेनैव हेतुना भेदः सिध्यति, द्व्यणुकेऽपि तेनैव हेतुना द्व्यणुकान्तराद्भेद, परमाणौ तु परमाण्वन्तराद्भेदो न सिध्यति, तत्रारम्भकावयवान्तराभावात् तत्राभेदे द्व्यणुकादाप्यभेदे घटयोरप्यभेदः स्यादतः परमाणुवृत्तिविशेषपदार्थः स्वीक्रियते, तेनैव च परमाण्वोर्भेदसिद्धौ घटाविपर्यन्तो भेदः सिध्यति, न च परमाणुविशेषयोर्मध्ये, विशेषान्तराभावेन तयोरेवाभेदः, तत्र विशेषान्तरस्वीकारे चानवस्था स्यादिति चेन्न। तस्य स्वतो व्यावृत्तस्योक्तत्वात्। तत्त्वञ्च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसजातीयेतरभेदानुमित्यविषयत्वम्। विशेषेऽपि स्वलिङ्गकस्वसजातीयविशेषान्तरभेदानुमितिविषयात्वात्असम्भवोऽतः स्वभिन्नलिङ्गकस्वसजातीयविशेषान्तरभेदानुमितिविषयत्वात्असम्भवोऽतः स्वभिन्नलिङ्गकेति, घटो विशेषाद्भिन्नः कपालसमवेतत्वात् इत्यत्र विशेषभिन्नलिङ्गत्वात्पुनरसम्भवोऽतो लक्षणे स्वविशेष्यकेतिसाजात्यं पदार्थविभाजकोपाधिसत्त्वेन, तेन द्रव्यादेरपि प्रमेयत्वेन विशेषजातीयत्वेऽपि नातिव्याप्तिः, स्वपक्षत्वेनाभिमतं घटादि-तद्भिन्नं लिङ्गं स्वावयवारब्धत्वं तज्जन्या स्वसमानजातीयेतरभेदानुमितिः, अत्र घटो घटान्तराद्भिन्न इति—तदनुमितिविषयत्वं घस्याविषयत्वं विशेषस्येति समन्वयः। नव्यास्तु नित्यद्रव्येष्वेव स्वतोव्यावृत्तत्वमङ्गीकृत्य विशेषन्नाद्रियन्ते इति।

प्रश्नः ९-समवायस्य सपदकृत्यं लक्षणं किम्? सिद्धिप्रकारः कः? समवायस्वीकारे का युक्तिः?

उत्तरम्—

> **"घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।**
> **तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः।।"**

इत्यत्र घटकपालपदमवयवाक्यविनोरुपलक्षणम्, तत्रत्यचकारश्च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

नित्यद्रव्यविशेषयोः समुच्चायकः, तथा चावयवावयविनोः, गुणगुणिनोः क्रियाक्रियावतोः, जातिव्यक्त्योः नित्यद्रव्यविशेषयोश्च सम्बन्धः समवाय इति लब्धम्। समवायत्वञ्च नित्यत्वे सति सम्बन्धत्वम्, संयोगाकाशयोरतिव्याप्तिवारणाय क्रमेण दलद्वयम्। नित्यसंयोगेऽतिव्याप्तिस्तु न शङ्क्या, तदनङ्गीकारात्। ननु समवायस्य सम्बन्धत्वे मानाभाव इति चेन्न, अनुमानस्यैव मानत्वात्। तथा हि रूपवान् घटः, क्रियावान् घट इत्याकारिका विशिष्टबुद्धिः विशेषण-विशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, या या विशिष्टबुद्धिः विशेषण-विशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, या या विशिष्टबुद्धिः सा सैतत्त्रयविषया, यथा दण्डीपुरुष इति विशिष्टबुद्धिस्तथा चेयं तस्मात्तथा। ननूक्तानुमानेन सम्बन्धमात्रसिद्धिः, स च संयोग एव किन्नेति चेन्न, द्रव्ययोरेव संयोग इति नियमेन तस्यासम्भवात्। न चायुतसिद्धयोः स्वरूपसम्बन्ध इति मीमांसक-सिद्धान्तान्निरुक्तानुमानेन स्वरूपसम्बन्ध एव तत्रास्त्विति चेन्न, तथा सति सिद्धसाधनप्रसंगात्। ननु सिद्धमपि पदार्थमनुमानेन साधयन्ति तर्करसिक इत्यभियुक्तोक्तेर्नैव तत्सिद्धिस्तव दोषावहेति वाच्यम्, "गणनाथं प्रकुर्वाणं रचयामास वानरम्" इति लौकिकानामाभाणकेनार्थान्तरापत्तेः। ननूक्तरीत्या समवायसिद्धावपि दोषद्वयेनोद्धारस्तत्सिद्धावेवकिंविनिगमकमिति चेन्न। अनन्तस्वरूपाणां सम्बन्धत्वकल्पनापेक्षया क्षित्यङ्कुरादिकर्तृत्वेनैकेश्वरसिद्धिवत्तेनानुमानेन नित्यैकसमवायसिद्धेः। ननु तस्यैकत्वे सम्बन्धसत्तया सम्बन्धिसत्ताकल्पनेन रूपवान् वायुरिति बुद्धेः प्रमात्वप्रसङ्ग इति चेन्न, तस्यैकत्वेऽपि रूपनिरूपितत्व-विशिष्टसमवायस्यैव तद्वत्ताबुद्धेर्नियामकत्वेन वायौ रूपाभावेन तादृशबुद्धेः प्रमात्वाभावात्।। ननु विशिष्टं शुद्धान्नातिरिच्यते इति सिद्धान्तात्, विशिष्टसमवायोऽपि वायौ विद्यत इति चेन्न, रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया एव रूपसम्बन्धत्वात्तस्य च वायावभावात्। नन्वेवं भूतलादावभावस्य "वैशिष्ट्य" सम्बन्धान्तरं सिद्ध्येदिति चेन्न, विकल्पासहत्वात्। न च घटानयनकाले तत्र घटाभावस्य नष्टत्वात्, न तादृशबुद्धिरप्रसङ्ग इति वाच्यम्, घटानयने घटाभावनाशे तदभाववति देशेऽपि घटाभावबुद्धेः प्रसङ्गात्। न द्वितीयः, तदनित्यत्वे

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

स्वरूपसम्बन्धवत्तस्य नानात्वे ततोऽवैलक्षण्यात्। ननु त्वन्मतेऽपि पाके न रक्ते घटे श्यामरूपसमवायसत्त्वात्, श्यामरूपवत्ता धीप्रसङ्ग इति चेन्न, दत्तोत्तरत्वात्। नन्वभावस्थले वैशिष्ट्यानङ्गीकारे तत्र कः सम्बन्ध इति चेत्स्वरूपमिति गृहाण। ननु स्वरूपस्यानुयोगिप्रतियोग्यन्तररूपत्वेन तवाभावस्य नित्यतया भूतलस्य च सत्वाद्वैशिष्ट्यानित्योक्तस्थल इव त्वयापि स दोषो दुरुधर इति चेन्न। घटाभाववद्भूतलमिति ज्ञानकालीनो यत्र भूतले घटाभावबुद्धिस्तद्भूतलादिकं यस्य यस्याभावस्य बुद्धिः, तस्य तस्येतादृशसम्बन्धस्वीकारेणादोषात्।

वस्तुतस्तु समवायसम्बन्धेन घटादिकार्यम्प्रति तादात्म्येन कपालादे कारणत्वस्य सिद्धतया कार्यतावच्छेदकसम्बन्धविधया समवायः सिध्यति। न च स्वरूपसम्बन्ध एव तत्र कार्यतावच्छेदकोऽस्त्विति शङ्क्यम्, तथा सति यत्समवेतं कार्यमुत्पद्यते, तत्समवायिकारणमिति व्यवस्योच्छेदप्रसंगात्। न च तत्र यत्सम्बद्धमित्येव वाच्यमिति साम्प्रतम्। कपालसम्बद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्व-प्रसङ्गात्। इष्टापत्तौ समवायिकारणनाशे कार्यनाशस्य ध्रौव्यात्, कपालनाशं घटध्वंसस्यापि ध्वंसापत्तेः, तस्यापीष्टत्वे पुनर्घटोन्मज्जनापत्तेः।

प्रश्नः १०-सलक्षणोदाहरणमभावसामान्यविशेषं प्रदर्श्य तस्याधिकरणरूपत्वेऽनुपपत्तिः सोदाहरणं प्रदर्शयत?

उत्तरम्—अत्रायभिप्रायः—न तावदभावत्वं भावभिन्नत्वम्, भावस्याभाव-भिन्नत्वेऽन्योन्याश्रयात्; किन्तु द्रव्यादिषट्कान्योन्याभाववत्त्वरूपम्। न चैवं द्रव्यादावतिव्याप्तिस्तत्रापि परस्परभेदस्य सत्वादिति चेन्न। द्रव्यादीनां षट्को योऽन्योन्याभावत्सद्वत्वमित्यर्थस्वीकारे द्रव्यं नेत्यारभ्य समवायो नेत्यन्तं द्रव्यादि षटकप्रतियोगिकोऽन्योन्याभावोऽभावसामान्ये, एवेत्यदोषात्। वस्तुत इदमप्ययुक्तप्रभावसामान्यलक्षणेऽन्योन्याभावस्य वक्ष्यमाणतल्लक्षणेऽभावसामान्यस्य प्रविष्टत्वेनान्योन्याश्रयाद्, नापि नञ्पदजन्यप्रतीतिविम्बत्वं प्रागभावदावव्याप्तेः। नापि प्रतियोगिताज्ञानाधिकरणान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसताभावरूपः, आत्माश्रयात्। किन्त्वभावत्वमखण्डोपाधिः। स चाभावो द्विधा— संसर्गाभावान्यो-न्याभावभेदात्। तत्र संसर्गाभावात्वमन्योन्योभावभिन्नं सत्यभावत्वम्। तत्रान्योन्या-

RajGuru Math, Shivala, Varanasi Collection: Equipment: Heritage Foundation, Jalgaon

). In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

भावघटयोरतिव्याप्तिवारणाय। विशेषणविशेष्ये। अन्योन्याभावत्वञ्च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। न च संयोगावच्छिन्नप्रतियोगिताकासंयोग्यत्यन्ताभावे संयोगितादात्म्यस्य संयोगरूपतया तत्रातिव्याप्तिरिति वाच्यम्, तदात्म्यत्वावच्छिन्नताजदाम्यनिष्ठा या संसर्गविधयादच्छेदकता तन्निरूपकप्रतियोगिताकाभावच्च विवक्षितत्वेनादोषात, घटो न पट इत्यादौ सः। आद्यस्त्रिधा-प्राभावप्रध्वंमाभावात्यन्ताभावभदात्। तत्र ध्वंसप्रतियोगित्वे सत्यभावत्वं प्रागभावत्वम्, ध्वंसघटयोरतिव्याप्तिबारणाय क्रमेण दलद्वयम्, घटो भविष्यतीत्याद्युदाहरणम्, प्रागभावप्रतियोगित्वं सत्यभावत्वं ध्वंसत्वम्। प्रागभावघटयोरतिव्याप्तिवारणाय क्रमेण दलद्वयम्, घटो नष्ट इत्याद्युदाहरणम् नित्यत्वे सति संसर्गाभावत्वमत्यन्ताभावत्नम्, ध्वंसादिवारणाय सत्यन्तम्। आकाशादिवारणाय विशेष्यदलम्, न च विशेष्योऽभावमात्रेण तत्रातिव्याप्तिनिरासे संसर्गेति व्यर्थमिति वाच्यम्। अन्योन्याभावेऽतिव्याप्तिवारणार्थे तत्सत्वात्। घूटो नास्तीत्यादौ सः। न चात्यन्ताभावस्य नित्यत्वे भूतलादौ घटानयनेऽपि घटाभावबुद्धिप्रसंग इति वाच्यम्। तत्कालीनं तत्तद्भूतलादिकं तत्तद्भावानां सम्बन्ध इत्यनेन दत्तोतरत्वात्। ननु घटकाले घटात्यन्ताभावबुद्धेरभावेऽपि तदुत्पत्तेः प्राक् तदत्यन्ताभावबुद्धिः स्यादेवेति चेन्न, ध्वंसप्रागभावाधिकारेत्यताभावानङ्गीकारात्। न चैवं रक्तरूपप्रागभावाधिकरणे श्यामघटे रक्तो नास्ति, श्यामरूपध्वंसाधिकरणे श्यामो नास्तीति प्रतीतिः कथमिति वाच्यम्। तयोः प्रतीत्योः प्रागभावध्वंसविषयत्वात्। वस्तुतस्तु ध्वंसप्रागभावयोरत्यन्ताभावेनवेन सह विरोधे मानाभावेन, तयोर्बुद्धरयोरत्यन्ताभावविषयत्वे बाधकाभावः। अत एव पूर्वमग्रेऽपि रक्ते मध्ये श्यामे घटे रक्तं रूपं नास्तीति प्रत्ययः, तस्य सामान्यभावविषयत्वात्। नन्वभावस्तु द्विधेति विभागोऽनुपपन्नः, तत्रैव मानाभावात्, न च घटो नास्तीन्यानवभावबुद्धिः प्रत्यक्षसिद्धेति वाच्य्, तद्धिः भूतलाद्यकिरणविषयत्वेनोपपत्तेरिति चेन्न, प्रतीतिनिर्वाहाय तस्यानन्ताधिकरणात्मकत्वकल्पनापेक्षयाऽभावातिरिक्तकल्पनाया लघीयस्त्वात्। न चाभावाङ्गीकारेऽपि तदधिकरणं तवापि सिद्धमेव तस्यैवाभावत्वेऽपि नास्ति गौरवमिति वाच्यम्। घटाभावभूतलयोरैक्ये घटाभाववद्भूतलमित्याधाराधेयभावानापत्तेः। नन्वभावाधिकरण-

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

काभावस्याधिकरणात्मकत्वं लाघवाद्भवता यथाङ्गीक्रियते, तथैवात्राप्युपपत्तिरिति चेन्न, येनेन्द्रियेण या व्यक्तिर्गृह्यते, तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेणेति सिद्धान्तेन शब्दाद्यभावानां तेनेन्द्रियेण ग्रहणप्रसङ्गात्, अत एव ज्ञानविशेषः, कालविशेषश्च न तत्प्रतीत्यनुपपत्तेरिति संक्षेपः।

प्रश्न ११-द्रव्यादिपञ्चानामामनेकत्वं समवायित्वञ्च साधर्म्यमवादि तथा गुणादेः गूणशून्यत्वं क्रियारहितत्वञ्च साधर्म्यमवादि, तत्र सर्वत्र साधर्म्यस्वरूपं तथा प्रतिपाद्यताम्, यथा क्वापि दोषो न प्रसज्येत?

उत्तरम्- "द्रव्यादयः पञ्च भावा अनेके समवायिनः" इत्यनेन द्रव्यादीनां पञ्चानां भावत्वं साधर्म्यमुक्तम्। भावत्वञ्च समवायकार्यान्तरप्रत्यासत्या सत्तावत्त्वम्। ननु अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तम्" इति ग्रन्थेन द्रव्यादीनां षण्णां साधर्म्यं लभ्यते, तत्कथं पञ्चानामेवोच्यत इति चेन्न, षण्णां भावत्वस्य स्पष्टतया विशेषतस्तदुक्तेः। ननु कारिकया भावान्तस्योद्देश्यत्वप्रतीत्या अनेकत्वमात्रमेव साधर्म्यं लभ्यते, न तु भावत्वमिति चेन्न, तत्र पञ्चान्तस्यैवोद्देश्यत्वयोः साधर्म्यलाभात्। ननु प्रागभावादिभेदेनाभावेऽप्यनेकत्वसत्वात्तत्रातिव्यातिप्तरिति चेन्न, अनेकत्वे सति भावत्वस्य विवक्षणेनादोषात्। नन्वनेकत्वस्य बहुत्वरूप्वं गुणादायव्याप्तिः, गुणादौ गुणाद्यनङ्गीकारात्। यत्किञ्चिदेकभिन्नत्वे तु समवायेऽति व्याप्तिइति चेन्न, भेदविशिष्टत्वे सति भाववृत्तिस्वस्य विवक्षणेनादोषात्। वै स्वप्रतियोगिवृत्तित्वस्वान्योन्य-वृत्तित्वोभयसम्बन्धेनं। नन्वाकाशघटादेः प्रत्येकमेकत्वात्तत्रयाप्तिरिति चेन्न, निरुक्तस्वरूपानेकभाववृत्तिपदार्थविभजकोपाधिमत्वस्य विवक्षितत्वेनादोषात्। न चानेकभाववृत्तिधर्मवत्वमिति वक्तव्ये तादृशोपाधिमत्वं निष्फलमिति युज्यते, भावत्वरूपमादाय समवायेऽतिव्याप्तिः। नन्वेवंकालिकसम्बन्धेन निरुक्तोपाधिमत्वं ध्वंसस्याप्यस्तीति चेन्न समवायस्वरूपान्यतरसम्बन्धस्य विवक्षणेन स्वरूपस्य च कालिकसम्बन्धभिन्नस्य च तत्वेन तत्रानतिव्याप्तेः। नन्वेवं मूलोक्तसमवायित्वस्य समवायसम्बन्धावच्छिन्नवृत्त्यधिकरणत्वस्य ग्रहणे सामान्यादावव्याप्तिस्तत्र तादृशसम्बधावच्छिन्नवृत्यधिकरणत्वाभावादिति चेन्मैवम्, तत्र षष्ठ्यर्थे मत्वर्थीयप्रत्ययस्वीकारेण समवायसम्बन्धेन सम्बन्धित्वस्य विवक्षितत्वेनोक्ता-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

पत्तेरभावादिति। समवाये तु न तत्त्वं तस्य समवायसम्बन्ध-सन्धित्वाभावात्। य च मुक्तावल्यां समवेतवृत्तिपदार्थविभाजकोपाधिमत्वमिति पाठोऽधिकस्तत्रे व्याख्येयम्समवायित्वस्य समवायसम्बन्धेन सम्बन्धित्वमिति व्याख्याने षष्ठ्य मत्वर्थप्रत्यये समवायसम्बन्धप्रतियोगित्वमर्थः सप्तम्यर्थे तदनुयोगित्वम्, आ परमाण्वाकशादावव्याप्तिस्तेषां सर्वदैवानुयोगित्वात् अन्त्ये सामान्यविशेषयोरव्याप्ति स्तयोः प्रतियोगित्वात् अतः ससवेतेत्यादिः- समवेतः समवायसम्बन्धानुपयो प्रतियोगी वातद्वृत्तिः पदार्थविभाजकोपाधिर्द्रव्यत्व-सामान्यत्वविशेषांदिस्तद्वत नित्यद्रव्यादावपि इति समन्वयः।

प्रश्नः १२- गुणादीनां किं साधर्म्यं तदतिप्रसक्तिश्च कथमुत्पत्ति कालीनघटादौ, तदानीं तेषां किमिति निर्गुणत्वम् तदुद्धारश्च कीदृशः?

उत्तरम्- '**गुणादिनिर्गुणक्रियः**' इत्यनेन निर्गुणत्वं निष्क्रियत्वं गुणादी साधर्म्यमुक्तम्। तत्र निर्गुणत्वं निष्क्रियत्वञ्च न गुणभिन्नत्वादिरूपं तथा सति गुणक्रिययोरन्योन्याभावमादाय द्रव्येऽतिव्याप्तेः किन्तु गुणक्रियात्यान्तभावत्वरूप नन्वेवं "उत्पन्नं द्रव्यं क्षणमगुणमक्रियञ्च तिष्ठति" इति तार्किकसि द्धान्तादुत्पत्तिकालीनघटादावव्याप्तिः न च गुणगुणिनोः सव्येतरविषाणव समानकालोत्पत्तिकत्वेन व्यर्थं तदानीं तेषां गुणशून्यत्वमिति चेन्न, घटादे स्वगतरूपादिकं प्रति समवायिकारणत्वसिद्धान्तान्यथानुपपत्त्या तदानीं तस निर्गुणत्वकल्पनात्। नन्वेवं चाक्षुषप्रत्यक्षे रूपस्य कारणतया घटादेराद्यक्षणं प्रत्य न स्यादिति चेन्न। तदानीं तदप्रत्यक्षस्येष्टत्वात्। ननु घटोत्पत्तिकाले रूपाङ्गीकारेऽ तत्पूर्वक्षणे तदभावेन संयुक्तसमवायरूपसन्निकर्षाभावेन न रूपप्रत्यक्षं सम्भवति कथमिष्टापत्तिरतः परमाणौ द्रव्यत्वादिप्रत्यक्षवारणाय चक्षुसंयुक्तेत्यादिसन्निक योग्यत्वविशेषणदाने द्वयणुकचाक्षुषव्यभिचारवारणाय संयुक्तसमवायस द्रव्यान्यद्रव्यसमवेतचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वेन घटादेरेव तेन सम्बन्धे प्रत्यक्षासम्भव इत्यभिप्रायात् तथा च तादृशघटादावतिव्याप्तिरिति चेन्न गुणवद्वृत्तिधर्मत्वस्य ग्रहणेनादोषात्। तथा हि गुणवद्द्रव्यं तद्वृत्तित्वं गुणत्वा न तु द्रव्यत्वदाविति समन्वयः। न चैवं क्रियाशून्यत्वं गगनादावतिप्रसक्तमि

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

चेन्न, कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्वस्य तदर्थत्वात्। कर्मवद् द्रव्यं तद्वृत्तिः, पदार्थविभाजकोपाधिर्गुणत्वादि तद्वत्वं गुणादीनाम्। नन्वेवं कर्मदवृत्त्युपाधिमत्वमित्येवोच्यताम्, पदार्थविभाजकेति व्यर्थमिति चेन्न, द्रव्यविभाजकाकाशत्वरूपोपाधिमादाय तत्रैवातिव्याप्तेरिति शिवम्।

प्रश्नः १३- "पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्" इति कारिकांशो व्याख्येयः?

अथवा- किन्नाम पारिमाण्डल्यं कथङ्कारं तस्याः कारणत्वम्?

उत्तरम्- "पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्" इति मूलम्, तत्र पारिमाण्डल्यं परमाणुपरिमाणमित्युक्तं तच्च द्व्यणुकपरिमाणस्याप्युपलक्षणम्। तथा च परमाणुद्व्यणुकपरिमाणभिन्नानां कारणत्वं साधर्म्यम्। ननु समवायिकरकगुणाः कार्यगुणानामसमवायिकरणमिति सिद्धान्तात् कथं तस्याः कारणत्वमिति चेत्तस्य कारणत्वे द्व्यणुकपरिमाणे अणुपरिमाणज्यत्वम्, त्र्यणुकपरिमाणे द्व्यणुकपरिमाणजन्यत्वञ्च स्यात्, तथा च परिमाणस्य स्वविभाजकरूपाणुत्वमहत्वादिरूपसाजात्यवदुत्कृष्टपरिमाणजनकत्वनियमात्, महदारब्धे महत्तरत्ववदणुजन्येऽणुतरत्वप्रसङ्गे त्र्यसरेणोरणुतमत्वे महत्वंभावेनाचाक्षुषत्वप्रसङ्गः। नन्वेवं द्व्यणुकत्र्यणुकपरिमाणयोः किमसमवायिकारणमिति चेत्, परमाणुद्वयगतद्वित्वसंख्या द्व्यणुके ततत्रिस्रतयगतत्रित्वसंख्या त्रयणुकें इति गृहाण। ननु परिणामस्य संख्याजन्यात्वे घटादिपरिमाणस्य कपालादिगतद्वित्वसंख्यैवोत्पत्तौ किमिति तत्र कपालपरिभाणं कारणं मन्यसे इति चेन्न, अणुद्वयर्गतद्वित्वसंख्यया द्व्यणुके महत्त्वोत्पत्तिभिया द्वित्वसंख्याया महत्त्वाजनकत्वनियमात्। ननु घटगतमहत्त्वं प्रति कपालगतमहत्वस्य कपालगतद्वित्वस्य वा हेतुत्वे विनिर्गमनाभाव इति चेन्न, कपालगतमहत्वोत्कर्षेण घटगतमहत्वोत्कर्षस्यानुभवसिद्धत्वात्। न च प्रचयस्तत्र कारणमिति वाच्यम्, तत्र तस्याप्यसम्भवात्। ननु योगिप्रत्यक्षविषयविधया पारिमाण्डल्यस्य कारणत्वात् तद्भिन्नानां कारणत्वं युक्तमिति चेन्न, तेषां योगजधर्मणातीतानागतविषयकप्रत्यक्षवत्तस्यापि तत्सम्भवात्। मूले पारिमाण्डल्येत्युपलक्षणं परममहत्परिमाणातीन्द्रियसामान्यविशेषणानामपि। ननु ज्ञायमानसामान्यस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रत्यासत्तित्वेन ज्ञायमानहेतोश्चानुमितिकरणत्वेन यस्य सामान्यलक्षणाजन्यज्ञानेऽनुमि च कारणत्वात्तस्याकारणत्वमयुक्तमितिसिद्ध्यर्थमनुमितौ लिङ्गज्ञानस्य हेतुत्वे चोक्ताप्तेरभावात्। एतेन मनस्त्वस्यातीन्द्रियजातेर्योगिप्रत्यक्षेसामान्य लक्षणप्रत्यासत्तिविधया कारणत्वम्-अयमचुरवन्तराद्भिन्नो विशेषादित्वनुमतौ विशेष कारणत्वशङ्कापि परास्ता: सामान्यज्ञानस्य लिङ्गज्ञानस्य च हेतुत्व वक्ष्यमाणत्वात्धूमादिहेतुपदं तज्ज्ञानपरं भाक्तम्। नन्वेवं विषयतया द्रव्यलौकिकप्रत्य समवायेन महत्त्वस्य हेतुत्वादात्मपरममहत्वस्यात्ममानसप्रत्यक्षे हेतुत्वात्तस्य कारणत्वमित्ययुक्तिमिति चेन्न, आकाशादिनिष्ठपरममहद्परिमाणस्याकारणत्व भिमतत्वात्। अथ कारणत्वञ्चायन्त्री पारिमाण्डल्यादिभ्य इति भाष्यम् आदिग्रहणात्परममहत्वं गृह्यते इत्याचार्यग्रन्थस्तत्र सामान्यत: परम महत्त्वस ग्रहणादात्मपरिमाणमपि न कस्यापि कारणमित्यलभ्यत इति चेन्न, "**कारणत्व ज्ञातृधर्मेतरभावकार्यापेक्षया**" इत्याचार्यग्रन्थेन ज्ञातृधर्मज्ञानादिभिन्नं भावका प्रत्येवात्मपरिमाणस्याकारत्वलाभादिति सर्वं सुपुष्कलम्।

प्रश्न: १४- सलक्षणोदाहरणं सामान्यविशेषं कारणं निरूपणीयम्

अथवा- "अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता..कारणत भवेत् इति कारिका सम्यक् समालोच्यताम्।

उत्तरम्- इत्यनेनान्यथासिद्धभिन्नत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेद कार्याधिकरणनियतपूर्ववृत्तिजातीयत्वं कारणत्वमिति लभ्यते, दण्डत्वादावतिव्या प्तिवारणाय सत्यन्तम्, रासभेऽतिव्याप्तिवारणाय नियतेति, अरण्यस्थदण्डेऽ व्याप्तिवारणाय जातीयेति। न च नियतपूर्ववर्तिजातीयत्वनिवेशे द्रव्यत्वादि घटपटादीनमपि कारणतापत्तिरिति चेन्न। दण्डत्वादिमत्वस्यैव नियतपूर्ववृत्ति स्वीकारेणादोषात्। ननु दण्डत्ववद् द्रव्यत्वस्यापि तत्त्वे तदेव किन्नेति चेन्न लघुनियतपूर्ववर्तितावच्छेदकस्य तेनाभिधानात्। नन्विदमेव लघ्विति कथमवगतमि चेदनन्तद्रव्येषु घटकारणत्वापत्तेः गौरवात्, तदपेक्षया तत्र लाघवात्। तच्च त्रिविधम्, समवाय्यसमवायिनिमित्तभेदात्। तत्र समवायसम्बन्धावच्छिन्नकार्यता निरूपिततादात्म्यसम्बन्धावच्छिन्नकारणतावत्वं समवायिकारणत्वम्, यथा घट

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रति कपालं स्वगतरूपादिकं प्रति घटः। समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वमसमवायिकारणत्वम्, यथा कपालसंयोगः घटं प्रति, घटरूपं प्रति कपालरूपम्। समवायिकारणेऽतिव्याप्तिवारणाय समवायिकारणेति, कपालत्वादावतिव्याप्तिवारणाय कारणेति। नन्वेवं तुरीतन्तुसंयोगस्यौ पटसमवायिकारणे तन्तौ प्रत्यासन्नत्वात्पतासमवायिकारणत्वापत्तिः, इष्टापत्तौ तुरीतन्तुसंयोगनाशे पटनाशापत्तिः, असमवायिकारणनाशस्य द्रव्यनाशजनकत्वात्। न च द्रव्यनाशे तत्समवायिकारणनाश एवं कारणमस्त्विति वाच्यम्, परमाणोर्नित्यतया तन्नाशाभावेन द्व्यणुकनाशान्यथानुपपत्त्या तत्रैव तत्कारणत्वकल्पनात्। नन्वेवं तन्तुनाशे विनैव समवायिकारणं पटस्य क्षणद्वयं स्थितिः स्यादिति चेन्न, इष्टत्वात्। ननु द्रव्यनाशे समवायिकारणनाशस्यापि पृथक् कारणत्वेन निर्वाहे इष्टापत्तिरयुक्तेति चेन्न कारणान्तरकल्पने गौरवादिति चेन्न, तुरीतन्तुसंयोगभिन्नस्य पटसमवयिकारणे प्रत्यासन्नस्यैव तदसमवायिकारणत्वस्वीकारात्। तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्यासमवायिकारणत्वात्तत्सामान्यलक्षणे तद्भिन्नत्वशङ्का न कार्या। एवं वेगादीनामभिघाताद्यसमवायिकारणत्वन्न तदसमवायिकारणे तद्भिन्नत्वनिवेशात्। नन्वेवं ज्ञानादेरिच्छादिकं प्रति तत्त्वं स्यादिति चेन्मैवम्, आत्मविशेषगुणानां कुत्राप्यसमवायिकारणभावेन तत्सामान्यलक्षण एवं तद्भिन्नत्वसन्निवेशात्। नन्वेवं समवायिकारणे प्रत्यासन्नत्वं तादात्म्यादिना ग्रहणे समवायिकारणस्यापि तत्त्वापत्तिरिति चेन्न। कार्यैकार्थकारणैकार्यान्यतरप्रत्यासत्तेस्तत्र विवक्षणात्। कार्यैकार्थं प्रत्यासत्तिः समवायसम्बन्धः, कारणैकार्थप्रत्यासत्तिः स्वसमवायिसमवेतत्वसम्बन्धःतथा च समर्ययिस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन समवायिकारणे प्रत्यासन्नत्वं सति, आत्मविशेषगुणभिन्नत्वे सति कारणत्वमसमवायिकारणत्वमिति निष्कृष्टलक्षणं पर्यवसन्नम्। उक्तोभयभिन्नत्वे सति कारणत्वं निमित्तकारणत्वम्, यथा घटम्प्रति कुलालचक्रचीवरादिकम्, आद्ययोरतिव्याप्तिवारणाय सत्यन्तम्, दण्डत्वादौ तद्वारणाय विशेष्यम्। तदुक्तं मूले यत्समवेतेत्यादिना, इत्येवं कारणसामान्यविशेषोदाहरणग्रन्थ इति।

प्रश्नः १५- कियन्तः केऽन्यथासिद्धा उच्यन्तान्ते समासतः?

अथवा– अन्यथासिद्धभेदाः कति? तेषां लक्षणानि उदाहरणानि च कानि?

उत्तरम्– अत्रायमभिसन्धिः– पारिमाण्डल्यभिन्नानामित्यत्र कारणत्वरूपं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

साधर्म्यमुक्तम्, तदपेक्षया पूर्वत्र ग्रन्थे समवायिकारणादिभेदेन तन्निरूपितम्, तत्र कारणसामान्यलक्षणेऽन्यथासिद्धशून्यस्येत्युक्तम्, तत्रान्यथासिद्धत्वजिज्ञासायां येन सह पूर्वभावमित्यादिना तल्लक्षणमुक्तम्। तत्राद्योऽन्यथासिद्धः तद्धर्मावच्छिन्ननियतपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नम्प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नम्प्रत्यन्यथासिद्धः, द्वितीयेऽन्यथासिद्धेऽतिव्याप्तिवारणाय सत्यन्तम्, कपालसंयोगे भटपूर्ववर्तित्वग्रहे कपाले विशेष्यतावच्छेदकत्वसत्वात्तत्रातिव्याप्तिवारणाय विशेष्यम्, यथा दण्डत्वादिकं घटम्प्रत्यन्यथासिद्धम्। न चैवं दण्डत्वमेव हेतुरस्तु, दण्ड एवान्यथासिद्धः कुतो नेति चेन्न। दण्डत्वस्य घटम्प्रति कारणत्वे स्वाश्रयजन्मभ्रमिजन्यभ्रमित्वरूपसम्बन्धे दण्डत्वस्यापि प्रविष्टत्वं गौरवात्, मम तु स्वजन्यभ्रमिजन्यभ्रमित्वसम्बन्धे दण्डत्वाप्रवेशे लाघवम्। द्वितीयम् स्वान्तत्र्येण यत्तत्कार्यनिरूपितान्वयव्यतिरेकशून्यत्वे सति तत्कार्यकारणावच्छिन्नस्वनिष्ठतत्कार्यनिरूपितनियमपूर्ववर्तित्वग्रहविशेष्यताक तत्कार्यम्प्रत्यन्यथासिद्धम्, कपालसंयोगेऽतिव्याप्तिवारणाय विशेषणम्, दण्डत्वादिवारणाय विशेष्यम्। अत्रायम्भावः—कार्यकारणयोरन्वयव्यतिरेकनियमस्तत्र दण्डरूपस्य घटम्प्रति कारणत्वं दण्डसंहितस्यैव रूपस्यान्वयव्यतिरेकौ, न तु रूपघटयोः; पटादिरूपसावेऽपि घटाद्युपपत्तेरदर्शनादिति, एवञ्च घटम्प्रति दण्डरूपाद्यन्यथासिद्धम्। यद्यपीतरान्वयव्यतिरेकशालित्वरूपेणाद्ययोः संग्रहस्तथापि तयोः प्रकारान्तरेण व्युत्पादनं प्रपञ्चार्थम्। तृतीयं यथा, फलाननुगुणमन्यम्प्रति नियतपूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यम्प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यप्रत्यन्यथासिद्धत्त्वम्; यथा घटादिकम्प्रत्याकाशस्य, तस्य घटम्प्रति आकाशत्वेन कारणता वाच्या, तत्त्वञ्च शब्दसमवायिकारणत्वम्, एवञ्च शब्दम्प्रति तत्र जनकत्वसिद्धावेव घटादिकम्प्रति सिध्यत्यतः तम्प्रति तदन्यथासिद्धम्। कुलालम्प्रति जनकत्वग्रहपूर्वकमेव कुलालपितुः, घटम्प्रति जनकत्वात्, अनेनैव तत् संग्रहस्तु न शङ्क्यः, तस्य घटानुगुणत्वाच्छब्दस्य चाननुगुणत्वात्। नन्वाकाशत्वस्य शब्दाश्रयत्वरूपत्वे स्वीकृते घटम्प्रति कारणत्वं स्यादेवेति

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

चेन्न, तथापि वक्ष्यमाणपञ्चमान्यथासिद्धेन तस्य ग्रहणात्। चतुर्थं यथा, यत्कार्यजनकम्प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यम्प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यम्प्रत्यन्यथासिद्धत्वम्, यत्कार्यजनकम्प्रतीत्यत्र फलानुगुणं यत्कार्यम्प्रतीत्यर्थः, तेन तृतीयेन नास्य संग्रहः, तथा च घटकार्यजनकं कुलालम्प्रति कुलालपितुर्जनकत्वं गृहीत्वेव घटम्प्रति जनकत्वेऽन्यथासिद्धत्वम्। ननु कुलालपितुरपि कुलालत्वात्कुलालमात्रस्य घटम्प्रति कारणत्वात्कथं तस्यान्यासिद्धत्वमिति चेन्न। कुलालत्वेन तस्य ग्रहणे घटम्प्रति कारणत्वेऽपि तम्प्रति कुलालपितृत्वेन तत्त्वे तस्यान्यथासिद्धत्वात्। पञ्चमञ्चावश्यक्लृप्तनियतपूर्ववर्तिभिन्नत्वं, यथा घटम्प्रति रासभादिः। यां व्यक्तिम्प्रति रासभस्य नियतपूर्ववर्तित्वमस्त्येव, स तत्र कारणं तत्कथं तस्यान्यथासिद्धत्वमिति चेन्न, घटत्वावच्छिन्नम्प्रति क्लृप्तदण्डादिनैव तस्याप्युत्पत्तिसिद्धौ तस्यापि तत्र कारणत्वेन मानाभावात्-ननु पाकजरूपप्रागभावेन गन्धोत्पत्तिसम्भवे रूपप्रागभावेन गन्धप्रागभावस्यान्यथासिद्धत्वं स्यात्तत्र रूपप्रागभावस्यावस्यक्लृप्तनियतपूर्ववर्तित्वात्, न च यत्कारणत्वमवश्यक्लृप्तमित्युक्तया निर्वाहस्तथा सति कारणत्वशरीरे कारणत्वे आत्माश्रयादिति चेन्न, लघुनियतपूर्ववर्तित्वरूपस्यावश्यक्लृप्तस्य विवक्षितत्वात्। नन्वन्यत्र क्लृप्तेति वक्तव्येऽवश्यपदं किमर्थमिति चेन्महत्त्वस्यानेकद्रव्यत्वादन्यत्र क्लृप्तनियतपूर्ववर्तित्वाभावेन महत्वेनानेकद्रव्यत्वस्यान्यथासिद्ध्यभावप्रसङ्गात्। अनेकद्रव्यत्वाच्च न तावदेकद्रव्यसमवेतत्वं, तथासति परमाणुद्वयारब्धद्व्यणुके तत्त्वेन तत्प्रत्यक्षापत्तेः। न च तस्य समवेतसमवेतत्वस्वरूपत्वे द्व्यणुकस्यातथात्वे न प्रत्यक्षमिति वाच्यम्। उक्तरूपानेकद्रव्यत्वाभावेनात्मनोऽप्रत्यक्षत्वापत्तेरिति चेन्न, अणुभिन्नद्रव्यरूपतत्स्वीकारेणादोषात्। न च निरुक्तरूपानेकद्रव्यत्मेव प्रत्यक्षे कारणमस्तु, तेन महत्त्वस्यान्यथासिद्धत्वं कुतो नेति चेन्न। महत्त्वस्य कारणत्वे महत्त्वस्य कारणतावच्छेदकत्वे तस्य जातिरूपत्वेन लाघवात्। ननूक्तरूपपञ्चमान्यथासिद्धेनैव सर्वसंग्रहात्तेषां भेदेनोपादानमनर्थकमिति चेदिष्टापत्तेरित्यन्यत्र विस्तरः।

प्रश्नः १६- "गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वम्" इति कारकांशो व्याख्येयः?

अथवा– असमवायिकारणं कस्य साधर्म्यम्?

उत्तरम्– मूले "गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वम्" इत्युक्तम्;

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

तत्र मात्रपदस्य कात्स्न्यार्थकतया यावतां गुणकर्मणामसमवायिकारणत्वमाया तच्चायुक्तम्, आत्मविशेषगुणानां सर्वत्रासमवायिकारणाभावस्य प्राङ्निरूपितत्वादि चेन्न, साधर्म्यस्य वैधर्म्ये, गुणकर्मपदस्य तद्भिन्ने लक्षणायामसमवायिकारणत गुणकर्मभिन्नानां वैधर्म्यमित्यर्थे तात्पर्येण दोषात्। ननु साधर्म्यप्रकरणे वैधर्म्यकथनमयु गुणकर्मणोस्तद्भिन्ने लक्षणाप्ययुक्तेति चेन्न, असमवायिकारणवृत्तिसत्ताभिन्नजाति मत्वस्य विवक्षितत्वात्। असमवायिकारणे गुणकर्मणी, तद्वृत्तिः सत्ताभिन्नजाति गुणत्वकर्मत्वरूपा तद्वत्त्वं गुणादीनाम्। सत्ताभिन्नदव्यत्वरूपजातिमादाय द्रव्येऽतिव्याप्तिवारणाय वृत्त्यन्तम्। सत्तामादाय तत्रैवातिव्याप्तिवारणाय सत्तभिन्नेति, दव्यगुणान्यतरत्वरूपधर्ममादाय तत्रैवात्तिव्याप्तिवारणाय जातिपदम् नन्वेवंकालिकसबन्धेनासमवायिकारणे गुणादौ वर्तमाना सत्ताभिन्ना द्रव्यत्वजातिरस्तीति तामादाय पुनस्तत्रातिव्याप्तिरिति चेन्न, वृत्तित्वस्य समवायेन विवक्षितत्वात् यद्यप्यसमायिकारणसमवेतसत्ताभिन्नजातिर्गुणत्वादिरूपा, सा च कालिके द्रव्येऽप्यस्ति, तथाप्यसमवायिकारणसमवेतसत्ताभिन्नजातेरपि समवायेनाधिकरण्यस्य विवक्षणान्न दोष इति शम्।

प्रश्नः १७– आश्रितत्वं कस्य साधर्म्यं तस्य समवायेन ग्रहे समवायाभावयोरव्याप्तिः-वृत्तित्वसामान्यविवक्षायां नित्यद्रव्येष्वति-व्याप्तिरिति शङ्का परिहरणीया?

उत्तरम्– अत्रेदं तात्पर्य्यं "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते" इति मूलम्, तत्रेहपदस्य पूर्वपरामृष्टद्रव्यार्थकत्वे नित्यद्रव्यव्यतिरिक्तद्रव्यत्वं लक्ष्यतावच्छेदकं लभ्यते तदयुक्तम्, गुणादावप्याश्रितत्वस्य सत्त्वादिति चेद्वेदान्तिमते नित्यज्ञानस्य नाश्रितत्वाङ्गीकारेण तत्रातिप्याप्तिवारणशङ्कानिरासाय न्यायसिद्धान्ते इत्यर्थकस्य तत्रेहशब्दस्य सत्वात्, तथा च नित्यद्रव्यभिन्नत्वमेव लक्ष्यतावच्छेदकं सिद्धम्, तथा च नित्यद्रव्यभिन्नपदार्थजातस्याश्रितत्वं साधर्म्यं लब्धम्। नन्वेवं गगनं सर्वदैवास्तीति प्रतीतेर्नित्यद्रव्येष्वपि कालिकसम्बन्धेनाश्रितत्व-सत्त्वात्तत्रातिव्याप्तिरिति चेन्न, समवायसम्बन्धेनाश्रितत्वस्य विवक्षितत्वेन कालिकादिसम्बन्धस्याग्रहणात्। नन्वेवं समवायाभावयोरव्याप्तिः समवायस्य

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

स्वात्मकस्वरूपसम्बन्धेनाभावस्यापि स्वरूपसम्बन्धेनाश्रितत्वादिति चेन्न। सर्वाधारतानियामक कालिकसम्बन्धातिरिक्तसम्बन्धमात्रस्य ग्रहणेनादोषात्। नन्वेवं संयोगेन परमाणोरपि वृत्तेस्तत्रातिव्याप्तिरिति वाच्यम्, पतनप्रतिबन्धकसंयोगस्यैव वृत्तिनियामकत्वेन तत्संयोगस्य वृत्त्यनियामकत्वेनादोषादित्यनवद्यम्।

प्रश्नः १८– क्षितिर्जलं तथा तेज इत्यादि कारिका व्याख्येया?

उत्तरम्– पृथिव्यप्तेजोवायुमनसां परत्वापरत्वमूर्तत्वक्रियावेगत्वं साधर्म्यम्। ननु मूले क्रियापदस्य सत्त्वात् "धात्वर्थो हि क्रिया ज्ञेयो भाव इत्यभिधीयते" इति हर्युक्तेः क्रियापदस्य धात्वर्थे प्रसिद्ध्या तत्रादिप्रसङ्ग इति चेन्न, अत्र क्रियापदेन कर्मणो ग्रहणात्। ननु यत्र भटादौ पदत्वन्नोत्पन्ने तत्रातिव्याप्तिः, न च द्रव्योत्पत्तिद्वितीयक्षणे गुणोत्पत्त्यङ्गीकारेण गणान्तरस्येव तत्र परत्वादेरुत्पत्तिर्नोचितैवेति वाच्यम्, यतः दैशिककालिकपरत्वयोरपेक्षाबुद्धिजन्यत्वेनापेक्षाबुद्धिरेव यत्र नोत्पन्ना सुतरां तत्र तयोरभावस्तथा च तत्राव्याप्तिरिति चेन्न, परत्वापरत्वसमवायाधिकरणद्रव्यत्वस्याप्यजातिमत्वस्य ग्रहणेनादोषात्। यत्र घटादौ परत्वादिकमुत्पन्नं स परत्वाद्यधिकरणं तद्वृत्तिद्रव्यत्वव्याप्यजातिः पृथिवीत्वं तद्वत्वं तस्यापि, आत्मन्यतिव्याप्तिवारणाय परत्वादिसामानाधिकरणेति, तत्रैव सत्तां गृहीत्वाधिव्याप्तिवारणार्थं द्रव्यत्वव्याप्येयि जातेर्विशेषणम्। नन्वेवं द्रव्यत्वव्याप्यजातित्वं द्रव्यत्वेऽपि तादृशजातिमत्वमाकाशेऽतिव्याप्तमिति चेन्न, द्रव्यत्वान्यद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्। मूर्तत्वञ्चापकृष्टपरिमाणवत्वम्। नन्वेवं परमाणुपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्तत्राव्याप्तिरिति चेन्न। अविभुवृत्तिपरिमाणवत्वमित्यर्थेनादोषात्। एवं कर्मवत्त्वमपि कर्मसमानाधिकरणद्रव्यत्वव्याप्य जातिमत्वम्। एवं वेगवत्त्वमपि बोध्यमिति दिक्।

प्रश्नः १९– पृथिव्यादि पञ्चभूतानां केषां साधर्म्यं तन्निरूप्यताम्?

उत्तरम्– "क्षित्यादि पंचभूतानी" ति मूलम्। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं साधर्म्यम्। तत्त्वञ्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्, बहिरिन्द्रियाणि श्रोत्रादीनि तद्ग्राह्यविशेषगुणाः शब्दायस्तद्वत्वमाकाशादीनाम्, आत्मन्यतिव्याप्तिवारणाय बहिष्पदम्। नन्वेवं पूर्वदिने यो घटो दृष्टस्तस्यैव परदिने प्रत्यक्षे ज्ञातो घट

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

इत्याकारकं ज्ञानं भवति, तत्र घटांशे चक्षुषः संयोगः सन्निकर्षस्तज्ज्ञानांशे च चक्षुषः-स्वयंयुक्तमनसंयुक्तात्मसमवायः सन्निकर्षः, एवञ्च घटतज्ज्ञानयोश्चाक्षुषमेव ज्ञानं लौकिकालौकिकम् घटांशे आद्यम्, ज्ञानांशे द्वितीयम्, लौकिकाप्रत्यक्षन्तु न ज्ञानस्य षडविधसन्निकर्षजन्यत्वाभावात्, तथा च बहिरिन्द्रियं चक्षुः, तद्ग्राह्यविशेषगुणो घटज्ञानम्, तद्वत्वमात्मनः, एवञ्च तत्रातिव्याप्तिरिति चेन्न, तत्र बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषतावद्विशेषगुणवत्वस्य विवक्षितत्वेनादोषात्। नन्वेवं प्रत्यक्षाविषयरूपादिमिति परमाण्वादावव्याप्तिरिति चेन्न, बहिरिन्द्रियजन्यलौकिकस्वरूपयोग्यप्रत्यक्षविषयतावच्छेदकधर्मवद्विशेषगुणवत्वस्य विवक्षितत्वेनादोषात्। तथा हि घटादिगतरूपनिष्ठवहिरिन्द्रियजन्य-लौकिकप्रत्यक्षविषयतावदवच्छेदको धर्मो रूपत्वादिस्तद्वान् विशेषगुणो रूपादिस्तद्वत्वं परमाण्वादेरपि। ननु निरुक्तलक्षणे विशेषपदमधिकं गुणवत्वमात्रेणेष्टसिद्धेरिति चेन्न, वहिरिन्द्रियग्राह्यजातीयसंयोगादिमति कालादावति व्याप्तिनिरासाय तदुपादानात्। संयोगस्य तु न विशेषगुणवत्वं किमर्थमिति चेत्कर्मत्त्वरूपतादृशधर्मवत्कर्मेति, तद्वति मनस्यतिव्याप्तिवारणाय तदिति गृहाण, ननु परमाण्वादेः संग्रहाय स्वरूपयोग्यत्वनिवेशेन परमाणुरूपादेर्योग्यत्वे तत्प्रत्यक्षापत्तिरिति चेन्न, लौकिकविषयतया द्रव्यसमवेतप्रत्यक्षे समानाधिकरणसम्बन्धेन महत्त्वस्य कारणतया तत्र तेन सम्बन्धेन तस्याऽभावेन तत्प्रत्यक्षाभावात्। नन्वेवं चक्षुरिन्द्रियादिगतरूपादिविशेषगुणानामनुद्भूतत्वेन बहिरिन्द्रियग्रहणायोग्यत्वाच्चक्षुरादावव्याप्तिरिति चेन्न, लक्षणे स्वरूपयोग्यत्वं विहाय बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयगुणत्वन्यूनवृत्तिजातिमद्यत्तद्वत्वविवक्षायां तथाविधरूपत्वादिजातेश्चक्षुरादिरूपेऽपि सत्त्वेन दोषाभावात्। नन्वेवं गौरवमिति चेदात्मावृत्तिविशेषगुणवत्वमेव तत्त्वम्, आत्मन्यतिव्याप्तिवारणायवृत्त्यन्तम्, दैशिकपरत्वमादाय मनस्यतिव्याप्तिवारणाय विशेषेति सर्वं सुपुष्कलम्।

प्रश्नः २०– "अथाकाशशरीरिणाम् अव्यावृत्तिः क्षणिको विशेषगुण इष्यते" इति कारिका सम्यक् समालोच्यताम्?

उत्तरम्– "अथाकाशशरीरिणाम् अव्याप्यवृत्तिः क्षणिको विशेषगुण

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इष्यते" इति मूलम्। तेनाकाशात्मनाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वञ्च साधर्म्यं लभ्यते। अव्याप्यवृत्तित्वन्नाम स्वसमानाधिकरणात्यन्तभावप्रतियोगित्वम्, स्वशब्दस्तत्समानाधिकरणात्यन्ताभाव एतद्देशावच्छिन्नाकाशे शब्दो नास्तीत्याकारकस्तत्प्रतियोगित्वं शब्दे, इति शब्दस्याव्याप्यवृत्तित्वमाकाशे, एवं ज्ञानस्याप्यात्मनोऽव्याप्यवृत्तित्वम्, शरीरावच्छेदेनैवात्मनि ज्ञानादेः सत्वात्, घटाद्यवच्छेदेन तदभावादात्मनश्च विभुत्वात्। तत्राव्याप्यवृत्तिगुणवत्वमात्रस्वीकारे संयोगादेरपि पृथिवीमव्याप्यवृत्तित्वात्तत्रातिव्याप्तिरतो विशेषपदम्। विशेषगुणत्वन्तु न संयोगादेः,

"बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः।
अदृष्टभावना शब्दा अमी वैशेषिका गुणाः"।।

इति वक्ष्यमाणेन बुद्ध्यादेरेव तत्वात्। पृथिव्यामतिव्याप्तिवारणायाव्याप्यवृत्तिरिति गुणविशेषम्, तत्र रूपादेरविशेषगुणस्य तत्त्वात्। ननु रूपादीनामपि कालिकादिनाऽव्याप्यवृत्तित्वात्कथं तद्वारणमिति चेन्न, दैशिकाव्याप्यवृत्तित्वस्ये विवक्षितत्वात्। न चेश्वरगुणानां व्याप्यवृत्तित्वात्तत्राव्याप्तिरिति वाच्यम्, अव्याप्यवृत्तिगुणत्वव्याप्यजातिमत्वस्य ग्रहणेनादोषात्, अव्याप्यवृत्तिर्गुणो जीवात्मनि ज्ञानं तद्वृत्तिगुणत्वाव्याप्यजातिर्ज्ञानत्वं तद्वत्त्वमीश्वरस्येति समन्वयः। न च स्वमते क्षणिकपदार्थानङ्गीकारात् क्षणिकविशेषगुणवत्वरूपं साधर्म्यकथनमयुक्तमिति वाच्यम्, तृतीयक्षणवृत्तिध्वंसम्प्रति योगित्वस्य क्षणिकेत्वेनाभिधानात्। यद्यपि तत्रान्तरे शब्दज्ञानयोर्नित्यत्वं यथापि स्वमते योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिविशेषगुणनाश्यत्वेन प्रथमशब्दस्य द्वितीयेन द्वितीयस्य तृतीयेन नाशात्, निरुक्तक्षणिकविशेषगुणवत्वमाकाशस्य। नन्वेवं स्वत्वस्य तत्तद्व्यक्तित्वरूपत्वे तत्तद्व्यक्तिनाशम्प्रति तत्तद्व्यक्तित्वेन कारणत्वेनन्तकार्यकारणभावकल्पनो गौरवमिति चेन्न, यत्र प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशस्तत्र स्वसामानाधिकरण्यस्वाव्यवहितपूर्ववर्तित्वसम्बन्धयोग्यविभुविशेषगुण इति कार्यकारणभावस्वीकारात्। न च प्रायश्चित्तादिनाऽधर्मनाशे व्यभिचार इति वाच्यम्, लौकिकसाक्षात्कारविषयनिर्विकल्पान्यतररूपयोग्यत्वस्य तत्राभावात्, पूर्वरूपेण

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

द्वितीयरूपनाशे व्यभिचारवारणाय विभुपदम्, संयोगनाशे तद्वारणाय विशेषेति। नन्वेवं कदाचिद्रूपादीनामपि तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति चेन्न, चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तेन विवक्षणात्। तथा हि चतुःक्षणवृत्तिजन्यं रूपादि; तद्वृत्तिर्जातिः शब्दत्वज्ञानत्वादिरूपा तादृशजातिमान् शब्दज्ञानादिविशेषगुणस्तद्वानाकाशादिरिति समन्वयः। ननु त्रिक्षणवृत्तित्वं विहाय किमिति चतुःक्षणवृत्तित्वोपादानम्, न च त्रित्वचतुष्टयोर्लाघवगौरवाभावे तदुपादाने इच्छैव नियामिकेति वाच्यम्, त्रित्वे प्रथमोपस्थितत्वरूपलाघवसंभवादिति चेन्न, अपेक्षाबुद्धेस्त्रिक्षणवृत्तित्वेन ज्ञानत्वस्यासंग्रहात्तद्वत्यात्मन्यव्याप्यापत्तेः। लक्षणे वृत्त्यन्तनिवेशात्, रूपत्वजातिमादाय रूपत्वजातिमद्विश्लेषगुणवद्घटादावतिव्याप्तेरभावः। नन्वेवं चतुष्पदोपादानेन रूपत्वादेर्व्युदासेऽपेक्षाबुद्धिगतज्ञानत्वमादाय दोषोऽपि वारित एव तत्किमिति जन्यपदोपादानेनेति चेन्न, ईश्वरज्ञानस्य नित्यतया चतुःक्षणवृत्तित्वात् तद्वृत्तिज्ञानत्वमादायात्मन्यव्याप्यापत्तेः, जन्योक्तौ तु न दोषस्तज्ज्ञानस्य नित्यत्वात्। वस्तुतस्तु मूले शरीरिपदोपादानेन जीवात्मनामेव साधर्म्यं प्रतीयतेऽतो जन्येति न देयम्। नन्वेवमीश्वरज्ञाने ज्ञानत्वसत्त्वात् तस्य चतुःक्षणवृत्तित्वाज्जीवात्मन्यव्याप्तिरिति चेन्न, द्वेषत्वादिमादाय लक्षणसमन्वयसम्भवात्। परममहत्त्वस्य चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वात्तदादाय कालादावतिव्याप्तिवारणाय विशेषपदम्। ननु जन्यपदानुपादाने परममहत्त्वस्य चतुःक्षणवृत्तित्वान्न कालादावतिव्याप्तिरिति चेन्न। द्वित्वादीनां चतुःक्षणे नाशाभ्युपगमातेषां निरुक्तजातिमद्विशेषगुणात्वात्तदादाय तत्रातिव्याप्तिवारणाय विशेषपदस्यावश्यकत्वात्। वस्तुतस्तु प्रथमोपस्थितत्वात्त्रिक्षणवृत्तित्वमेव वाच्यम्, इच्छात्वादिकमादाय लक्षणसमन्वयात्। वस्तुतस्तु कस्यचिन्मते शब्दस्य चतुःक्षणवृत्तित्वं प्रक्षतायामुक्तं तथा च चक्षुःक्षणवृत्तितच्छब्दत्ववृत्तिजातिमद्विशेषगुणवत्त्वमेव सम्यगिति सर्वं चतुरस्रमिति शिवम्।

प्रश्नः २१– रूपधत्वादिकं केषां साधर्म्यम्?

उत्तरम्– 'रूपत्वद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः' इत्युक्तम्, तेन

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

पृथिव्यप्तेजसां रूपवत्वं द्रवत्ववत्वं प्रत्यक्षविषयत्वञ्च साधर्म्यम्। ननु चक्षुरादौ भर्जनकपालस्थवह्नेरुष्मणश्च रूपवत्वन्नास्ति, सहसा तेषां रूपवत्वाभ्युपगमे तु चाक्षुषप्रत्यक्षापत्तिस्तेषां स्यादिति चेन्न। चक्षुरादिकं रूपवत् तेजस्त्वात् प्रदीपवदित्यनुमानेन तेषां रूपवत्वेऽपि तदीयरूपस्यानुदभूतत्वेन प्रत्यक्षाभावात्। एवं वाय्वानीतः पार्थिवादिभागो रूपवान् पृथ्वीत्वाद् घटादिवत्-इत्याद्यनुमानेन वाय्वानीतपृथ्वीजलतेजोभागानां रूपवत्वं बोध्यम्। ननु घटादौ पिण्डीभूते सुवर्णे द्रवत्ववत्मव्याप्तमिति चेन्न, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणेनादोषात्। द्रवत्ववद् घृतं तद्वृत्तिद्रव्यत्वव्याप्यजातिः पृथिवीत्वं तद्वत्वं घटादावेवं द्रुतसुवर्णमादाय तत्र समन्वयः। ननु प्रत्यक्षविषयत्वं परमाण्वादेर्नास्ति तत्र महत्त्वाभावात्—इति तत्राव्याप्तिः, रूपादौ चातिव्याप्तिस्तेषां प्रत्यक्षाविषयत्वादिति चेन्न। चाक्षूषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य ग्रहणेनादोषात्। चाक्षुषलौकिकप्रत्यक्षविषयो घटादिस्तद्वृत्तिर्द्रव्यत्वव्याप्यजातिः पृथिवीत्वं तद्वत्वं परमाण्वादौ। घटो वायुमानित्यत्र वाय्वंशे ज्ञानलक्षणप्रत्यासत्या घटविशेष्य-कचाक्षुषविषवायुवृत्तिद्रव्यत्वव्याप्यवायुत्वजातिमादाय वायावतिव्याप्तिवारणाय लौकिकेति। द्रव्यत्वव्याप्येत्यत्र द्रव्यत्वान्यद्रव्यत्वव्याप्यत्वं विवक्षितम्, तेन तद्व्याप्यद्रव्यत्वजातिमादाय तत्रैवातिव्याप्तिरिति ध्येयम्। इति साधर्म्यप्रकरणम्॥

प्रश्नः २२– पाषाणादीनां पार्थिवत्वमनुमानप्रणाल्या ग्रन्थदिशा संसाधनीयम्?

अथवा–निर्दुष्टं पृथिव्या लक्षणं किम्?

उत्तरम्– तत्र क्षितिर्गन्धहेतुरिति मूलम्, तेन गन्धहेतुत्वं तल्लक्षणं लब्धम्। ननु कार्यमात्रम्प्रति कालादेर्हेतुत्वेन तत्रातिव्याप्तिरिति चेन्न, गन्धसमवायिकारणत्वस्य तेनाभिधानात्। ननु सुरम्यसुरभिकपालारब्धनिर्गन्धघटे तथाप्यव्याप्तिरिति चेन्न, गन्धवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्; जलादावतिव्याप्तिवारणाय वृत्त्यन्तम्, तत्रैव सत्तामादाय तद्वारणाय जातेर्दव्यत्व-व्याप्यत्वं विशेषणम्, जलपृथिव्यन्तरत्वमादाय तद्वारणाय जातेर्द्रव्यत्वव्याप्यत्वं विशेषणम् जलपृथिव्यन्यतरत्वमादाय तत्रैवातिव्याप्तिवारणाय जातिपदम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

नन्वेवकालिकसम्बन्धेन गन्धवति समवायसम्बन्धावच्छिन्नवृत्तित्वज्जलत्वादिमति पृथिवीनिरूपिततत्सम्बन्धावच्छिन्नवृत्तित्ववज्जलवादिमति वा जलादावतिव्याप्तिरिति चेन्न, गन्धवत्ववृत्तित्वयोः समवायेन विवक्षितत्वात्। न चान्यत्रगन्धाभावेन गन्धवत्वमात्रलक्षणेनापत्त्यभावे हेतुपदं व्यर्थमिति वाच्यम्, समवायसम्बन्धावच्छिन्न-गन्धत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नक्षितिनिष्ठकारण-तावच्छेदकतया क्षितित्वजातेः सिद्ध्यर्थं हेतुपदोपादानात्। नअनुगतप्रतीत्यैव क्षितित्वजातिसिद्धौ किमिति प्रकारान्तरेण तत्साधनमिति चेन्न, परमाण्वादौ तथाप्रतीतेरभावेन तत्साधारणतत्साधनप्रयासस्य साफल्यात्, गन्धत्वावच्छिन्नम्प्रति हेतुत्वानङ्गीकारे गन्धत्वावच्छिन्नस्य नियतकारणानियम्यत्वापत्तेश्च। ननु गन्धवत्वस्य तल्लक्षणत्वे गन्धशून्ये पाषाणादावव्याप्तिरिति चेन्न, पांषाणादावपि पृथिवीत्वेन गन्धानुमानात्। पाषाणस्य पृथिवीत्वाभावेनालक्ष्यत्वादेव तत्र गन्धवत्वलक्षणं नाव्याप्तमिति चेन्न। पाषाणस्य पृथिव्यन्यद्रव्यताया अपसिद्धान्तत्वेन तस्यापि लक्ष्यत्वात्। ननु तत्र गन्धसत्त्वे तदुपलब्धिः कुतो नेति चेन्न, तत्र गन्धस्यानुद्भूतत्वेनानुपलम्भात्। ननु पाषाणं पृथिवीत्वमेव नास्ति कुतस्तेन तत्र गन्धसत्तानुमितिरिति चेन्न, पाषाणे पृथिवीत्वानङ्गीकारे पाषाणभस्मनि गन्धानुपलब्धिप्रसङ्गात्। ननु पाषाणभस्मनि गन्धोपलब्ध्या तत्र पृथिवीत्वमस्तु, पाषाणे तदनुपलब्ध्या तत्र तत्सत्त्वे मानाभाव इति चेन्न, यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्त्या महापटध्वंसजन्ये खण्डपटे महापटोपादानोपादेयत्वस्य दृष्टत्वेन च भस्मारम्भकपाषाणारम्भकपरमाणुनामेकंजातीयत्वात्पाषाणारम्भकपरमाणुषु पृथिवीत्वसिद्धौ पाषाणेऽपि तत्सिद्धेः। नन्वेवं दुग्धध्वंसजन्ये दध्नि दुग्धा-वयवजन्यस्वीकारे दध्नोऽपि दुग्धत्वापत्तिस्तथा च दुग्धावयवैर्दध्नो जन्यत्वाभ्युपगमे दध्नि व्यभिचार इति चेन्न, दध्ना द्व्यणुकातिरिक्त-दुग्धजन्यत्वस्वीकारात्। न च वाच्यम्, दध्नोऽपि दुग्धत्वापत्तिस्तत्परमाणुजन्यत्वात्, दुग्ध-परमाणौ दुग्धत्वाभावात्। न च परमाणौ दुग्धत्वाभावे मानाभाव इति वाच्यम्, द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वाभावात्। नन्वत्र नियामकाभावं इति चेत्; दधिद्व्यणुकस्य दुग्धपरमाणुजन्यत्वेन दध्नो दुग्धत्वापत्तिः, उभयोरपि परमाणुवृत्तित्वे दधित्वदुग्धत्वयोः

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सांकर्यप्रसङ्गात्। अत्रेमे प्रयोगाः—१. पाषाणभस्मपाषाणोपादानोपादेयम्, पाषाणध्वंसजन्यत्वात्, यद्द्रव्यं यद्द्रव्यध्वंसजन्यै तत्तदुपादानोपादेयम्, महापटध्वंसजन्यखण्डपटवत्-अनेन पाषाणपरमाणुषु भस्मारम्भकत्वं सिद्धम्। २. पाषाणपरमाणवः पार्थिवाः, गन्धवद्भस्मारम्भकत्वाद् घटाद्यारम्भकपरमाणुवत्, अनेन पाषाणपरमाणुषु पृथिवीत्वं सिद्धम्। ३. पाषाणः पार्थिवः पार्थिवपरमाणुजन्यत्वाद्घटवत्। ततश्च। ४. पाषाणो गन्धवान् पार्थिवत्वात् पुष्पवत्, इत्येवं प्रकारेण पाषाणे पृथिवीत्वगन्धवत्वयोः सिद्धिरित्यन्यत्र विस्तरः।

प्रश्नः २३– भेदप्रभेदप्रदर्शनपुरस्सरं सोपपत्तिकं निरूप्य पृथिवीत्वजातौ मानमुपस्थाप्यताम्?

उत्तरम्– कारिकायां नानारूपवतीमतेत्युक्तम्—तदयुक्तम्। तस्या नानारूपवत्लक्षणाङ्गीकारे नैकरूपाभावो यत्र तत्राव्याप्तेरिति चेन्न, रूपद्रयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य तेन ग्रहणेनादोषात्। तथा हि वैशेषिकाः पृथिवीपरमाणौ प्रथमं रूपनाशं तदनन्तरं रूपान्तरोत्पत्तिञ्च मन्यते, न त्ववयविन्यवेयवेनावष्टब्धे तस्मिन् तेज-प्रवेशासम्भवात् प्रवेशे वा घटादौ छिद्रप्रसङ्गात्, तथा च तेजः क्रियया परमाण्वन्तभङ्गे पाकेन परमाणौ रूपान्तरोत्पत्तौ पुनर्घटोत्पत्तिः सोऽयमिति प्रत्यभिज्ञातु सादृश्यादिति तेषां राद्धान्तः। नैयायिकास्तु अवयविन्यवयवे-उभयत्रापि पाकमिच्छन्ति, तथा चाद्यमते परमाणु गृहीत्वा, तद्वतीये घटादिकमादाय लक्षणसमन्वयः। जलत्वजातिमादाय जलेऽतिव्याप्तिवारणाय वृत्त्यन्तम्, द्रव्यत्वव्याप्यजलपृथ्व्यन्यतरत्वमादाय तत्रैवातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। नन्वेवसपेक्षाबुद्धिविशेषविषयत्वरूपघटितत्वेन निरूक्तलक्षणे गौरवमिति चेद्रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वमेव तदिति गृहाण, समन्वयपदकृत्ये पूर्ववज्ज्ञेये।

प्रश्नः २४– परमाणुसमूहस्य घटादिरूपत्वे को दोषः?

उत्तरम्– अयम्भावः—"नित्याऽनित्या च सा द्वेधा, नित्यास्यादणुलक्षणा, अनित्या तु तदन्यास्यात्सैवावयवयोगिनौ" इति मूलम्। पृथिवीद्विधा, नित्याऽनित्या च, तत्र परमाणुरूपा सा नित्या, द्व्यणुकादिरूपाऽनित्या, अनित्यैव पृथिव्यवयविनीति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

). In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

तदर्थः। अथावयवकदम्बातिरिक्तावयविनः सत्त्वे किम्मानम्? न चायं घट इति प्रतीतिरेव तत्र मानमिति साम्प्रतम्, परमाणुसमूहैरेव तत्प्रतीत्युपत्तेः, न चायं घट इति प्रतीतेः। परमाणुसमूहविषयकत्वे मृतपिण्डेऽपि तादृशप्रतीतिः स्यात्तत्रापि तत्सत्त्वादिति वाच्यम्, विलक्षणसंयोगविशिष्टपरमाणूनां तत्तद्विलक्षणप्रतीतिजनकत्वात्। यद्यपि परमाणुनामप्रत्यक्षत्वाद् घटादेरपि प्रत्यक्षानापत्तिस्तथाप्येकस्य तस्याप्रत्यक्षत्वेऽपि तत्पुञ्जस्य तत्सम्भवः, यथा दूरस्थस्यैकस्य केशस्य प्रत्यक्षाभावेऽपि तत्समूहस्य प्रत्यक्षम्। परमाणुनामनेकत्वादणुत्वाच्च, एको घटा स्थूल इति बुद्धिर्न स्यादिति चेन्न, धान्यनिष्ठसंख्याविशेषरूपधान्यसमूहस्यैकत्वादेकधान्यसंयुक्तापरधान्यसंयुक्तान्यधान्यप्रतियोगिकसंयोगस्य महत्त्वात्मकतया चैको महान् धान्यराशिरितिवदेको घट स्थूल इति बुद्धेरप्युपपत्तेरिति चेन्न। स्वभावतोऽयोगाप्तं परमाणुनां परस्परसंयोगमात्रेण योग्यत्वाभावे तत्समूहरूपघटादेरप्यप्रत्यक्षत्वप्रसङ्गात्। दूरस्थैककेशाप्रत्यक्षेऽपि तत्समूहप्रत्यक्ष-वदत्रापि स्यादिति चेन्न, सन्निधाने तस्यैवैकस्य केशस्य प्रत्यक्षदर्शनात्, तत्र दूरत्वस्य प्रतिबन्धकत्वेन स्वाभाविकातीन्द्रियत्वाभावेन दृष्टान्तवैषम्यात्। न च क्षणभङ्गवादिनां मते परमाणुनामुत्पत्तिस्वीकारेण घटादिप्रतीतिकाले दृश्यपरमाणुपुञ्जस्योत्पन्नत्वात्प्रत्यक्षसम्भव इति वाच्यम्, अदृश्यपरमाणुनां दृश्यपरमाणुत्पादकत्वाभावात्। न चादृश्ययस्य दृश्योत्पादकत्वमिष्टमेवेति वाच्यम्, चक्षुरुष्मादिसंततेरपि कदाचिच्चाक्षुपत्वप्रसङ्गात्, अथातितप्ततैलादावदृश्यवह्निना दृश्यवह्न्युत्पत्तिः कथं, तवादृश्येन दृश्यानुत्पत्तेरिति चेन्न, तत्रापि तदन्तर्वर्तिसूक्ष्मदृश्यदहनावयवैः स्थूलदहनोत्पत्तिस्वीकारात्, ननु तार्किकमते द्व्यणुकस्याप्यदृश्यत्वेन कथन्तेन दृश्यत्रसरेणोरुत्पत्तिरिति चेन्न, महत्त्वोद्भूतरूपालोकसंयोगकारणकलापसत्त्वे दृश्यत्वस्य तद्भावेऽदृश्यत्वस्य स्वीकारेण त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वस्य द्व्यणुकादेस्तदभावेन तदभावस्य स्वीकारात्, परस्परवियुक्तपरमाणुनां महत्त्वाभावेन प्रयक्षत्वाभावेऽपि संयुक्तानां तेषां प्रत्यक्षत्वं स्यादेव, न च महत्त्वाभावः प्रत्यक्षत्वबाधक इति वाच्यम्, तत्रान्योन्यविजातीयसंयोगरूपमहत्त्वस्य प्रत्यक्षसाधकत्वात्। ननु परमाणुनां नित्यत्वाद् घटादीनामपि नित्यत्वापत्तिरिति चेन्न, मन्मते पदार्थमात्रस्यैव

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

क्षणिकत्वेन परमाणुनामुत्पत्तिविनाशस्वीकारात्। न च परमाणुपुञ्जे घटत्वाङ्गीकारे कपालाद् घट इति प्रतीत्यनुपपत्तिरिति वाच्यम्, घटवत्कपालस्यापि परमाणुपुञ्जत्वेन पुञ्जात्पुञ्जोत्पत्तिस्वीकारात्। एवञ्चावयविनि मानाभाव इति चेन्न, घटादिप्रतीतेः परमाणुपुञ्जविषयकत्वे गौरवादतिरिक्तकल्पन एव लाघवात्। अत एव तत्प्रत्यक्षमप्युपपद्यते, अन्यथा, यावतामवयवानां चक्षुःसंयोगाद्यभावेन घटं पश्यामीत्यादिप्रतीत्यनुपपत्तिप्रसङ्गः, तत्सिद्धौ तदुत्पत्तिविनाशस्य प्रत्यक्षसिद्धत्वादवविनामनित्यत्वं सिद्धमित्यन्यत्र विस्तरः।

प्रश्नः २५– परमाणुसाधनरीतिः का?

अथवा– परमाणुसद्भावे का युक्तिः?

उत्तरम्– अयम्भावः—निरुक्तरीत्याऽवयविनः सिद्धौ तदवयवानामनन्तत्वेऽन्तवयवत्वेन मेरुसर्षपयोः साम्यप्रसङ्गात्, द्व्यणुकस्य सावयवारब्धत्वेन महत्त्वापत्तिप्रसङ्गाच्च, क्वचिद्विश्रान्तिकल्पनया विश्रामावधेर्नित्यत्वं सिद्धम्, न तस्यानित्यत्वमेव किन्नेति वाच्यम्, तथा सत्यसमवेतभावकार्योत्पत्तिप्रसङ्गे कार्यकारणभावव्यवस्थोच्छेदप्रसङ्गात्। ननु तस्य नित्यत्वसिद्धावण्युणत्वे किम्मानमिति चेत्, महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तिवदणुपरिमाणतारतम्यमस्यापि क्वचिद्विश्रान्तत्वाभ्युपगमे तद्विश्रामाश्रये परमाणुत्वसिद्धिः। न च त्रसरेणावेव विश्रामः किन्नेति वाच्यम् त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानेन तस्य सावयवत्वात्, हेतौ चाक्षुषपदमात्मनि व्यभिचारवारणाय, घटाभावे तद्वारणाय द्रव्यपदम्। न चोक्तानुमितौ चाक्षुषद्रव्यत्वमस्तु सावयवत्वं मास्त्विति युक्तम्, यतः चाक्षुषद्रव्यत्वं यदि सावयवत्वयभिचारि स्यात्तदा सावयवत्वव्याप्यानेद्रव्यत्वव्याप्यापकृष्टमहत्त्वव्याप्यं न स्यात्, यतः सावयवत्वव्याप्यानेकद्रव्यत्वव्याप्यापकृष्टमहत्त्वव्याप्यमतो न व्यभिचारोत्यनुकूलतर्कसद्भावात्। ननु तर्हि द्व्यणुक एव विश्रामोऽस्त्विति चेन्न, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तस्यापि सावयवत्वात्, नन्वेवं द्व्यणुकावयवाः सावयवद्रव्यारम्भकत्वात्कपालवदित्यनुमानेन परमाणुनामपि सावयवत्वं सिद्धिमिति चेन्न, तथा सत्यनवस्थाप्रसङ्गे निरुक्तदोषापत्त्या तस्या नित्यत्वस्वीकारात्। इत्थञ्च परमाणोर्नित्यत्वं चरमावयवत्वञ्च सिद्धम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रश्नः २६– सपदकृत्यं शरीरलक्षणं किम्? मानवशरीराणां पार्थिवत्वे किं मानम्? सति पार्थिवमात्रे कथं पञ्चभौतिकत्वव्यवहारः? वृक्षादीनां च शरीरत्वे किं मानम्?

उत्तरम्– अत्रायमाशयः—अनित्यपृथिव्या विभागोद्देशे देहेन्द्रियविषयभेदेन त्रैविध्यमुक्तम्, तत्र "योनिजादि भवेद्देह" इत्युक्त्या योनिजायोनिजभेदेन देहस्यापि द्वैविध्यम्, जरायुजाण्डजभेदेन योनिजस्यापि द्वैविध्यम्, तत्र जरायुजं मानुषादीनाम्, अण्डजं सर्पादीनाम्। अयोनिजोऽपि द्विविधः, स्वेजोद्भिज्जादिशरीरभेदात्। तत्र स्वेदजाः कृमिदंशाद्याः, उद्भिज्जास्तरुगुल्माद्याः, आदिनो देवनारक्यादिशरीपरिग्रहः, देवशरीरस्यायोनिजत्वे "ब्रह्मणो मानसा मन्वादयः पुत्रा" इत्यागमप्रमाणम्, योनिं विना न शरीरमित्यागमविरोधस्तु न, तत्र योनिपदस्य कारणमात्रपरत्वात्। नन्वेवं मानुषादिशरीराणां पार्थिवत्वे किम्मानम्? दृष्टक्षितेर्वैधर्म्यादिति चेन्न, गन्धशुक्लेतररूपवत्वस्यैव तत्र प्रमाणत्वात्। न च तत्र स्वेदोष्मादेरप्युपलब्धेर्जलीयादिकमेव किन्नेति वाच्यम्, एवं सति जलत्वपृथिवीत्वादिनां सांकर्य्यें तेषां जातित्वाभावप्रसङ्गात्। तथा हि जलत्वाभावसमानाधिकरणं क्षितित्वं घटादौ, क्षितित्वाभावसमानाधिकरणं जलत्वं गङ्गोदकादौ, तयोरेकत्र समावेशो मानुषादिशरीरे इति साङ्कर्य्यम्। ननूक्तसाङ्कर्य्यात्पृथिव्यादिसमुदितजन्यत्वं शरीरस्य माभूत् किमिति तत्पार्थिवमेव जलीयादिकमिति चेन्न, स्वेदादिनाशेपि शरीरत्वप्रत्यभिज्ञानात्तदानीमपि गन्धाद्युपलबधेश्च तस्य पार्थिवत्वसिद्धेः। ननु तस्य पार्थिवत्वे पाञ्चभौतिकत्वव्यवहारस्तत्र कथमिति चेत्, जलादीनामपि तत्र निमित्तत्वेन पृथिव्या उपादानत्वेन तादृशव्यवहारोपपत्तेः। ननु किन्तावच्छरीत्वम्? न च तज्जातिः पृथिवीत्वाभावसमानाधिकरणं शरीरत्वं वरुणलोकीयशरीरे, शरीरत्वाभावसामाधिकरणं पृथिवीत्वं घटादौ, तयोरेकत्र मानुषादिशरीरे सत्त्वेन साङ्कर्यात्, किन्तु चेष्टाश्रयत्वं शरीरत्वम्, चेष्टा च हिताहितहितप्राप्तिपरिहारानुकूला क्रियारूपा, चेष्टत इति प्रत्यक्षसिद्धा जातिः। ननु वृक्षादेस्तादृशचेष्टाश्रयत्वरूपशरीरत्वसत्त्वे किम्मानमिति चेत्, प्राणाख्यवायुसंयोगस्यैव मानत्वम्। ननु तत्र तादृशवायुसंयोग एव मानाभाव इति चेन्न, विभागविशेषविश्लिष्टावयवरूपभग्नक्षतसंरोहणयोस्सत्त्वेऽपि पुनस्संरोहणवृद्ध्यादिनां तत्संयोगानुमानात्। ननु शरीरस्य जीवभोगायतनत्वाद् वृक्षादौ च तदभावात्कृतं तत्र शरीरत्वसाधनायासेनेति चेन्न—

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

'नर्मदातीरसंजाता सरलार्जुनपादपाः।
नर्मदातोयसंस्पर्शात्तेऽपि यान्ति परां गतिम्''।।

इत्यादिस्मृतिप्रामाण्यात्तेषामपि भोगायतनत्वात्। नन्वेवं शरीरावयवे हस्तादौ तत्त्वापत्तिस्तस्यापि चेष्टाश्रयत्वादिति चेन्न, अन्त्यावयवित्वे सति चेष्टाश्रयत्वस्य ग्रहणेनादोषात्, अन्त्यावयवित्वञ्च द्रव्यानारम्भकद्रव्यत्वम्, तत्त्वञ्च न हस्तादौ शरीराम्भकत्वात्, नन्वेवं मृतशरीरे चेष्टाभावेनाव्याप्तिः, न च तत्रापि पूर्वं चेष्टासत्त्वान्नाव्याप्तिरिति वाच्यम्, यदा यस्य चेष्टावत्त्वं तदा तस्य शरीरत्वमिति तस्य लक्षणस्य कालघटित्वादिति चेन्न, मरणानन्तरं यत्र खण्डशरीरान्तरमुत्पन्नं यत्राव्याप्तेर्दुर्वारत्वादिति चेन्न, चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वेनादोषात्, घटादावतिव्याप्तिवारणाय चेष्टावदिति, नन्वेवं पुनरपि तत्रातिव्याप्तिश्चेष्टावदन्त्यावयवि चैत्रशरीरं तद्वृत्तिर्द्रव्यत्वव्याप्यजातिः, पृथिवीत्वं तद्वत्वाद्घटादेरिति चेन्न, अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्वस्य विवक्षितत्वेन पृथिवीत्वस्यन्त्यावयविमात्रवृत्तित्वाभावेन मनुष्यत्वचैत्रत्वाद्यादाय लक्षणसमन्वये-ऽव्याप्तेरभावात्। ननु क्रियारूपचेष्टाश्रयत्वात्। पुनरपि घटादावदिव्याप्तिस्तु न शङ्क्यः, तेषां निरुक्तरूपचेष्टाश्रयत्वात्। पुनरपि घटादावतिव्याप्तिस्तु न शङ्क्यः, तेषां निरुक्तरूपचेष्टाश्रयत्वाभावात्। ननु शरीरस्योपचयापचयादिभेदेना-नेकवृत्तित्वाच्चैत्रत्वादेर्जातित्वेऽपि नृसिंहस्य क्षणमात्रस्थायित्वेन नृसिंहत्वजातेरभावेन तदादाय लक्षणानुगमे नृसिंहशरीरे लक्षणाव्याप्तिः। न च देवत्वजातिमादाय लक्षणसमन्वयः शङ्क्यः, तेजस्त्वाभावसमानाधिकरणदेवत्वस्य वरुणादौ, देवत्वाभावसमानाधिकरणेतेजस्त्वं वह्न्यादौ, तयोरेकत्र सूर्ये सत्त्वेनैवंरीत्या सांकर्यात्, देवत्वस्य जातित्वाभावादिति चेन्न, कल्पभेदेन नृसिंहशरीरभेदात्, नृसिंहत्त्वजात्यैव तत्रापि लक्षणसमन्वयात्।

प्रश्नः २७– घ्राणेन्द्रियस्य पार्थिवत्वं संसाध्य तत्साधक-हेतुघटकपदव्यावृत्तिरभिधीयताम्?

उत्तरम्– मूले विषयशरीरेन्द्रियभेदेनानित्यपृथिव्यास्त्रैविध्यमुक्तम्, तत्र घ्राणेन्द्रियं पार्थिवम्। ननु घ्राणेन्द्रियस्य पार्थिवत्वे किम्मानमिति चेत्, घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धाभिव्यञ्जकत्वे सति तदितरानभिव्यञ्जकत्वात् कुंकुमगन्धाभिव्यञ्जकगोघृतवत्, घ्राणेन्द्रियस्य गन्धेतरगन्धत्वस्याप्यभिव्यञ्जकत्वात्,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

हेत्वप्रसिद्धिवारणाय हेतौ रूपादिषु मध्ये इति विशेषणम्। ननु दृष्टान्तस्य गोघृतस्य स्वकीयरूपाभिव्यञ्जकत्वेन तत्र हेतोरभावाद् दृष्टान्ताप्रसिद्धिरिति चेन्न, परकीयरूपाद्यव्यञ्जकत्वे सति गन्धाभिव्यञ्जकत्वादिति हेतोर्विवक्षितत्वेन तस्य स्वरूपाभिव्यञ्जकत्वेऽपि दृष्टान्तत्वसम्भवात्। नन्वेवं जले नवशराव-गन्धाभिव्यञ्जकत्वरूपहेतुसत्त्वात्, पार्थिवत्वरूपसाध्याभावात् साध्याभावाधि-करणवृत्तित्वेन निरुक्तहेतोर्व्यभिचारित्वमिति चेन्न। जलस्य सक्तुरसादेरप्यभिव्यञ्जकत्वेन गन्धेतराभिव्यञ्जकत्वात्। तत्र हेतोरेवाभावेन व्यभिचाराभावात्। न च यत्र जलेन न सक्तुरसाभियञ्जितस्तत्र जलविशेषे व्यभिचार एवति युक्तम्, परकीयरूपादिविषयक-साक्षात्कारस्वरूपायोग्यत्वस्य तेन विवक्षणात्। ननु हेतौ रूपादिषु मध्य इत्यत्रादिपदेन शब्दगन्धस्पर्शानां ग्रहणमेवञ्चैषां सर्वेषां परकीयत्वविशेषणदाने गौरवमिति चेद्वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवेन रूपादिविशेषणत्वेन परकीयानुपादानेऽपि क्षतिविरहात्। नन्वेवं घ्राणसंयुक्त-समवायरूपसंन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वेन तत्र साध्याभावाद्व्यभिचार इति चेन्न, द्रव्यत्वे सतीति विशेषणदानेनादोषात्, तथा च घ्राणेन्द्रियं पार्थिवं द्रव्यत्वे सति रूपादिषु मध्ये गन्धाभिव्यञ्जकत्वे सति तदितरानभिव्यञ्जकत्वाद्-वायूपनीतसुरभिभागवदिति निष्कृष्टानुमानेन घ्राणेन्द्रियस्य पार्थिवत्वं सिध्यति।

प्रश्नः २८– पृथिव्या विषयः कः तत्त्वञ्च किम्?

अथवा– पृथिवी द्व्यणुादि ब्रह्माण्डान्तरूपाः इत्युक्तं सम्यक् विविच्यताम्?

उत्तरम्– अयमत्राभिसन्धिः—द्व्यणुकादिब्रह्माण्डान्तरूपा पृथिवीविषय इत्युक्तम्। तत्र तावद्विषयत्वं न जातिः, सामान्यादावपि तत्सत्त्वात्; किन्तु सुखदुःखान्यतरसाक्षात्काररूपोपभोगसाधनत्वं तत्। ननु साक्षादुपभोगसाधनत्वं द्व्यणुकादावव्याप्तम्, साक्षात्परम्परासाधारण्यविवक्षायां परमाणावतिव्याप्तम्, तथा च द्व्यणुकादिब्रह्माण्डान्त इति ग्रन्थविरोध इति चेन्न, परमाणोरपि विषयत्वेन साक्षात्परम्परासाधारणभोगसाधनत्वस्य विवक्षितत्वात्। न च मूलग्रन्थविरोधः, कार्यरूपपृथिव्या एव प्रकारत्रयेण विभागात्। कार्यपृथिवीविषयपरत्वेन मूलग्रन्थस्य सत्त्वादेव सर्वस्यादृष्टाधीनत्वं तट्टीकायामुक्तं तत्र कार्यपदन्तु नोपादेयमेव। ननु कार्यमात्रप्रत्यदृष्टस्य समवायसम्बन्धेन हेतुत्वे समवायसम्बन्धेन घटाद्यधिकरणे

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

कपालादौ समवायेन तत्रादृष्टाभावाद्व्यभिचारः, न च स्वसमवायिसंयोगेनादृष्टस्य तत्र हेतुतेति वाच्यम्, उक्तसम्बन्धेन शब्दरूपकार्याधिकरणे गगनेऽदृष्टसमवाय्यात्मसंयोगाभावेन तत्र व्यभिचारादिति चेन्न, स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुत्वाङ्गीकारात्। स्वमदृष्टम्, तत्समवाय्यात्मा तत्संयुक्तो वाय्वादिस्तस्य संयोगो गगने, वस्तुतस्त्वदृष्टस्य न कार्यमात्रम्प्रति हेतुता साक्षात्, किन्तु तत्सामग्र्येव तत्कार्यजनिका, तथा च सामग्रीसम्पादकत्वेन परम्परया तदुपयोगः, क्वचित्तु मेघसंचारादौ साक्षादेव हेतुः। तदुक्तं---

"यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात्परम्परया वा जनयत्येवेति"।

नन्वेव सर्वस्यैव विषयत्वे शरीरादिभेदेन तस्यास्त्रैविध्यन्न स्यादिति चेन्न। शरीरेन्द्रियभिन्नत्वे सत्युपभोगसाधनत्वं विषयत्वमिति स्वीकारादिति शम्।

प्रश्नः २९– कथन्तावत्परमाणुसाधारणं जलत्वं सिध्यति?

अथवा– जलत्वजातिसिद्धौ ग्रन्थानुसारं सिद्ध्यतु?

उत्तरम्– अत्रेदं हृदयम्---पृथिव्या असाधारणगन्धगुणवत्— जलस्यापि तादृशस्नेहगुणसत्त्वात्—तद्वत्स्नेहसमवायिकारणत्वं जलत्वं—तल्लक्षणं निष्पन्नम्, तथा च समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्नस्नेहनिष्ठकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणता जलनिष्ठा तदवच्छेदकतया जलत्वजातिः सिद्धा। नन्वेवं स्नेहत्वं कार्यतावच्छेदकं तस्य परमाणावपि जलीये सत्वात्, तत्रत्यस्नेहस्य च नित्यत्वात्, एवञ्च जले तन्निरूपितकारणत्वविरहे पक्षाप्रसिद्धिरिति चेन्न, अधिकदेशवर्तित्वेन स्नेहत्वस्य केवलस्यावच्छेदकत्वाभावेऽपि जन्यत्वसमानाधिकरणस्नेहत्वावच्छिन्नकार्यतानिरू-पितकारणतायास्तत्र स्वीकारे तदवच्छेदकतया तत्सिद्धेरभ्युपगमात्। नन्वेवं जन्यस्नेहजनकतावच्छेदकतया जलत्वस्य सिद्धावपि न तस्य जातित्वसिद्धिः, शब्दसमवायिकारणताया जात्यवच्छिन्नत्वासम्भवादिति चेन्न, तत्र व्यक्त्येकत्वस्य बाधकत्वेन शब्दत्वस्य तत्त्वाभावेऽपि द्रव्यत्ववद्बाधकाभावेन जलत्वजातिसिद्धेः। नन्वेवं जलीयद्व्यणुकादिरूपजलस्यैव स्नेहसमवायिकारणत्वम्, न तु जलीयपरमाणोस्तेन स्नेहाजननात्, तथा च द्व्यणुकादौ जलत्वजातिसिद्धावपि परमाणौ सा न सिध्येदिति। ननु यथा फलानुपधायकेऽरण्यस्थदण्डे कारणतावच्छेदकधर्मवत्त्वरूपस्वरूपयोग्यत्वस्वीकारस्तथा जलीयपरमाणावपि तद्धर्मवत्वे बाधकाभाव इति चेन्मैवम्, तस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

नित्यत्वेन फलोपधायकत्वाभावेऽपि परमाणोर्नित्यत्वे तत्वप्रसङ्गादिति चेन्न, जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातिसिद्धिं विधाय परमाणोर्द्व्यणुकजनकत्वेन जन्यजलत्वावच्छिन्नतन्निष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नजलत्वावच्छिन्नकारणताया जलीयपरमाणुवृत्तितया तत्रापि जलत्वजातिसिद्ध्यभ्युपगमात्; न च बाध्यम्, जलान्तरजननायोग्यजलावयविनि जलत्वं न सिध्येत्तत्र कारतावच्छेदकस्य तस्याभावात्, जलमात्र एव जलान्तरसंयोगेन बृज्जलजननयोग्यतासत्त्वेन जलस्यान्त्यावयवित्वानभ्युपगमात्। ननूक्तरीत्या द्विविधं जलत्वं सिद्धम्, द्व्यणुकादिमहाजलपर्यन्तं जन्यजलवृत्तित्वविशिष्टं जलत्वं, परमाणुसाधारणं केवलं जलत्वम्, तथा च द्व्यणुकादौ द्वित्वविशिष्टं जलत्ववदिति ज्ञानं स्यात्तच्चाननुभवसिद्धमिति चेन्न, सामान्यविशेषजात्योः सम्बलनारूपदोषेण तादृशप्रीत्यभावात्। ननु समवायेन स्नेहवत्वंतल्लक्षणेन समवायेन जलत्वावच्छिन्नम्प्रति स्नेहे एव कारणतावच्छेदकमस्तु, तथा चातिरिक्ततत्वजातिकल्पना व्यर्थेति चेन्न, स्नेहवत्वेन स्पर्शवत्वेन वां कारणत्वकल्पनायां गौरवात्तस्या एव सिद्धेरिति शिवम्।

प्रश्नः ३०– वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलाविति कारिका व्याख्या?

अथवा– जले शुक्ल एव वर्णः, मधुर एव रसः, शीत एव स्पर्श इति त्रितयमेव सम्यक् प्रतिपाद्यताम्?

उत्तरम्– अत्रायमर्थः—जले शुक्लो वर्णस्तत्र मधुरो रसः शीतस्पर्शः ननूक्तरीत्या शुक्लरूपवत्वं जलस्य लक्षणं लभ्यते, तच्चायुक्तं स्फटिकादावतिव्याप्तेरिति चेन्न, जलस्य शुक्लरूपवत्वं ज्ञापयितुं तत्र तदुक्तेः, न तु तादृशलक्षणे तात्पर्यमित्याशयात्, तादृशं लक्षणमेवेत्याग्रहे तु नैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्याजातिमत्वं तललक्षणं गृहाण, नैमित्तिकद्रवत्वत्यौ तेजःपृथिव्यौ तद्वृत्तिर्या रूपवद्वृत्तिर्द्रव्यत्वसाक्षाद्व्याप्यजातिर्जलत्वरूपा तद्वत्वं जले-पृथिव्यामतिव्याप्तिवारणायाद्यं वृत्त्यन्तम्, तत्र रूपवद्वृत्तिद्रव्यत्वव्याप्यपृथिवीत्वजातिसत्त्वात्।

वायावतिव्याप्तिवारणाय द्वितीयं वृत्त्यन्तम् तत्र नैमित्तिकद्रवत्वद्वृत्तिद्रव्यत्वव्याप्यंवायुत्वजातेः सत्त्वात्, नैमित्तिकद्रवत्ववद्वृत्तिरू-

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

पवद्वृत्तिद्रव्यत्वव्याप्यजातिः पटत्वादिस्तदादाय पटादावतिव्याप्तिवारणाय साक्षादिति, द्रव्यत्वसाक्षाद्व्याप्यत्वं जातौ, द्रव्यत्वव्याप्याव्याप्यत्वरूपं तच्च पटत्वादौ नास्ति, नन्वेवं जलेऽव्याप्तिर्द्रव्यत्वव्याप्यत्वं मूर्तत्वे तद्व्याप्यत्वाजजलत्वस्येति चेन्न, मूर्तत्वस्य जातित्वानङ्गीकारात्, जलघटान्यतरं गृहीत्वा घटादावतिप्रसङ्गवारणाय जातीति। अथैवं लक्षणे शुक्लाप्रवेशे मूलविरोध इति चेन्न, अभास्वर-शुक्लेतररूपसमानाधिकरणान्न पृथिव्यामतिव्याप्तिारणाय जलत्वस्य शुक्लरूपसामाधिकरण्यादसम्भवः स्यादतः शुक्लेतरेति, तेजस्त्वमादाय तेजस्यतिप्रसक्तिवारणायाभास्वरेति, अन्यत्कृत्यं पूर्ववत्। ननु कथं जले शुक्लरूपं कालिन्दीजले नीलिमोपलम्भादिति चेन्न नीलरूपजनकतावच्छेदकपृथिवी-त्वजातेस्तत्राभावेन तत्र नीलरूपासम्भवात्। नन्वनुमानेन तत्र नीलरूपाभावेऽपि प्रत्यक्षतस्तदुपलब्धौ तद्बाध एव स्यादिति चेन्न, स्वसमवायिसंयोगसम्बन्धेन नीलरूपाश्रयपार्थिवभागगततद्रूपस्य कालिन्दीजले प्रतीतस्तद्बाधाभावात्, अत एव कौतुकादिना तज्जलस्य गगनप्रक्षेपे धवलिमोपलम्भः। ननु मधुररसवत्त्वं जललक्षणं शर्करादावतिप्रसक्तमिति चेन्न, तिक्तरसवद्वृत्तिमधुरवद्वृत्ति-द्रव्यत्वसाक्षाद्व्या-प्यजातिमत्वस्य तदर्थत्वात्। पृथिवीनिरासाय प्रथमं वृत्यन्तम्, तेजोनिरासाय द्वितीयम्, शेषं पूर्ववत्। ननु प्रत्यक्षेणाप्सु कस्यापि रसस्यानुपलब्धेस्तत्र मधुरो रस इति साहसमात्रम्। न चैवं वाच्यम्, नारिकेलादौ जले तादृशरसोऽस्तीति, तत्र स्वसमवायिसंयोगप्रत्यासत्त्या पार्थिवरसानुभूयमानत्वात्, अन्यथा जम्बीररसादावाम्लोपलम्भेन तादृशरसवत्वमपि तस्य स्यादिति चेन्न, हरीतक्यादिभक्षणेन तादृशरसस्य तत्रोपलब्धिस्वीकारात्। ननु पार्थिवहरीतक्यां जलोष्मसंयोगजपाकविशेषे माधुर्यमुपलभ्यते, न तज्जलीयमिति चेन्न, जलसंयोगस्यापि पृथिवीरसोत्पादकाङ्गीकारे कल्पनागौरवात्, न चास्तु जले मधुरो रसस्तथापि जम्बीरफले, आम्लोपलम्भात्तादृशरसस्य तत्र स्वीकारे बाधकाभाव इति चेन्न, तदीयजले तादृशरसस्याश्रयोपाधिकत्वस्वीकारात्, ननु शीतस्पर्शवत्वं तल्लक्षणं चन्दनादावव्याप्तमिति चेतशीतेतरस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वस्य विवक्षितत्वात्, पृथिव्यादावतिव्याप्तिवारणायाद्यं वृत्यन्तम्, आत्मन्यतिव्याप्तिवारणाय द्वितीयम्, असम्भववारणाय शीतेतरेति, शेषं कृत्यं पूर्ववत्। यत्तु कुत्रचिज्जले-ऽप्यौष्ण्यप्रतीतिः साश्रयौपाधिकीति सर्वमवक्षतम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

प्रश्नः ३१– "उष्णस्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्, नैमित्तिकद्रवत्वन्तु नित्यतादि च पूर्ववदि"ति कारिका व्याख्येया?

उत्तरम्– उष्णस्पर्शवत्वं तेजोलक्षणम्। उष्णत्वं स्पर्शवृत्तिजातिविशेषरूपमनुगतप्रतीतिसिद्धम् तथा च जन्योष्णस्पर्शत्वावच्छिन्नतेजोनिष्ठकारणतावच्छेदकतया तेजस्त्वजातिः सिद्धा, परमाणौ तु जन्यतेजस्त्वावच्छिन्नकारणतावच्छेदकतया जलत्ववत्सिध्यति, ननु सिद्धान्ते चन्द्रादेरपि तैजसत्वसत्त्वात्तदीयकिरणे शैत्योपलब्ध्या लक्षणमव्याप्तमिति चेन्न, तेजस्त्वेन तत्राप्युष्णस्पर्शानुमानात्। ननु तर्हि तत्रौष्ण्यप्रत्ययः कुतो नेति चेन्न, तदन्तर्गताधिकजलभागगतशीतस्पर्शेनौष्ण्यातिरोधानेन तदग्रहसम्भवात्, ननु रत्नकिरणादौ क्वा गतिरिति चेत्, तत्र पार्थिवस्पर्शेन, तदभिभवाङ्गीकार इति जानातु। नन्वेवं चक्षुरादिनिष्ठस्योष्णस्पर्शस्यान्येनानभिभूतत्वात्प्रत्यक्षानापत्तिरित्ति चेन्न, प्रत्यक्षे, उद्भूतत्वस्य हेतुत्वेन तदीयतादृशस्पर्शस्यानुद्भूतत्वेन तत्त्वाभावात्। भास्वरशुक्लरूपवत्वमपि तेजोलक्षणम्, न च वैश्वानरे मरकतकिरणादौ चातिव्याप्तिरिति वाच्यम्, पार्थिवरूपाभिभवेन तत्र शुक्लरूपाग्रहात्। ननु रूपाविषयकद्रव्यप्रत्यक्षस्यादृष्टचरत्वाद् वैश्वानरादेश्चाक्षुषानापत्तिरिति चेन्न, पित्तपितिम्ना शङ्खस्य पीतत्वेन भानवत्वापार्थिवरूपेणादि तस्य प्रत्यक्षत्वसम्भवात्, वह्नेः शुक्लरूपानभिभवेऽपि तदीयशुक्लत्वस्याभिभूतत्वेन तत्र शुक्लरूपाप्रतीतेश्च। नैमित्तिकद्रवत्ववत्त्वमपि तल्लक्षणान्तरम्, न च दहनादावव्याप्तं घृतादावतिव्याप्तञ्च तदिति वाच्यम्, पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वस्य विवक्षितत्वात्। पृथिव्यामतिव्याप्तिवारणाय प्रथमं वृत्त्यन्तम्, जले तद्वारणाय द्वितीयम्, वायुतेजोऽन्यतरत्वमादाय वायावतिव्याप्तिवारणाय जातीति। तेजोऽपि द्विविधम्, नित्यमनित्यञ्च, नित्यं परमाणुरूपमनित्यं द्व्यणुकादिरूपमवयवि च, शरीरेन्द्रियविषयभेदात्तस्यापि त्रैविध्यम्। शरीरमयोनिजमेव, तच्च सूर्यलोके प्रसिद्धमित्यन्यत्र विस्तरः।

प्रश्नः ३२– हेतुघटकपदोपादानफलमुपपादयता चाक्षुषस्तैजसत्वे प्रसाध्य प्रमाणदृष्टान्तत्वपक्षे द्वितीयपरकीयपदप्रयोजनमभिधीयताम्?

अथवा– चक्षुषस्तैजसत्वे का युक्तिः?

उत्तरम्– "इन्द्रियं नयनमिति" मूलम्, एतेन चक्षुरिन्द्रियस्य तैजसत्वमुक्तम्।

jGuru Math, Shivala, Varanasi Collection. Equipment Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

ननु तत्र किम्मानमिति चेत्, चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्, दृष्टान्तस्य प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणायाद्य परकीयेति, चक्षुषः परकीयरूपव्यञ्जकत्वादसिद्धिवारणाय स्पर्शादिति, उक्तरीत्या परकीयरूपव्यञ्जकजले व्यभिचारवारणाय हेतौ सत्यन्तम्, गगनादौ व्यभिचारवारणाय विशेष्यदलम्, घटादेः स्वकीयरूपव्यञ्जकत्वात्तत्र व्यभिचारवारणाय द्वितीयपरकीयेति, चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीत्यपि पूरणीयम्। विशेष्यदले रूपपदानुपादाने विशेषणदले स्पर्शादिपदेन पञ्चानामपि स्पर्शरूपरसगन्धशब्दानां ग्रहणे हेत्वप्रसिद्धिः, तद्व्यावृत्तये केषाञ्चिदेव तत्रत्यादिपदेन ग्रहणे गन्धेतरस्य तत्त्वे कुङ्कुमगन्धाभिव्यञ्जकगोघृतादौ व्यभिचारो रूपेतरस्यादिशब्देन ग्रहे प्रमाणाभावोऽपि च घटादेः परकीयस्पर्शाद्यव्ञ्जजकत्वेन परकीय आत्मनो गुणो ज्ञानं तस्य च विषयतया व्यञ्जकत्वाद् घटादौ व्यभिचारोऽतो रूपपदम्। वस्तुतस्तु प्रथमं परकीयत्र देयमेव, किन्तु द्रव्यत्वे सति स्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वादित्येव हेतुः। न च प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वाद् दृष्टन्तासिद्धिः, इदानीं प्रभाया दृष्टान्तत्वादिति शिवम्।

प्रश्नः ३३– पीतिमाश्रयस्यद्रुतत्वपक्षे द्रुतत्वकल्पे च सुवर्णस्य तैजसत्वं प्रसाध्य हेतुघटकपदव्यावृत्तिः का? इति समीक्ष्यताम्?

अथवा– सुवर्णस्य तैजसत्वे किं स्वरूपमनुमानम्?

उत्तरम्– कारिकायां "वह्निः स्वर्णादिर्विषयो मतः" इत्युक्तम्। तेन सुवर्णस्य तैजसत्वमापन्नम्। ननु सुवर्णं पार्थिवं नैमित्तिकद्रवत्ववत्वाद् घृतवदित्यनुमानेन तस्य पार्थिवत्वमेव सिद्धमिति चेन्न। सुवर्णं तैजसमसति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात्, यन्नैवं तन्नैवं यथा पृथिवीति निरुक्तानुमानेन तस्य तैजसत्वसिद्धेः। नन्वत्र कः पक्षः, न तावत्पीतरूपवद्द्रव्यम्, बाधात् तैजसरूपोऽपि न, अनुमानात्पूर्वं तस्यासिद्धेः सुवर्णपदवाच्यमपि न, धर्मशास्त्रे पीतद्रव्येऽपि तत्प्रयोगात्, तथा च पेक्षाप्रसिद्धिरिति चेन्न, अत्यन्तानलसंयोगेऽनुच्छिद्यमानद्रवत्वाधिकरणस्यैव सत्त्वात्। पक्षतावच्छेदकहेत्वभेदेन सिद्धसाधनन्तु न, अवच्छेदकावच्छेदेनानुमितिस्वीकारात्। हेतौ प्रतिबन्धकान्तं जलमध्यस्थघृतादौ व्यभिचारवारणाय, घृतादौ तद्वारणाय संयोग इति। न च सुवर्णेऽसतिप्रतिबन्धक इत्यादि हेतुरस्तु, साध्यं तैजसत्वं मास्त्विति युक्तम्,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

तादृशविशिष्टानुच्छिद्यकानद्रवत्वं तैजसत्वव्यभिचारि स्यात्, तर्हि पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्यात्यन्ताग्निसंयोगनाश्यत्वन्न स्यादित्ययस "अग्नेरपत्यं प्रथमं हिरण्यम्" इत्याद्यागमानुपपत्तेश्च तत्रानुकूलतर्कसत्वात्। ननु तदानीं पीतिमगुरुत्वाश्रयपार्थिवभागस्यापि द्रुतंतत्वेन हेतुसत्वात् साध्याभावेन तत्र व्यभिचार इति चेन्न, जलमध्यस्थमपीक्षोदे द्रवत्वाभावेऽपि तत्प्रतीतिवत्पार्थिवभागस्याद्रुतत्वेऽपि तादृशप्रतीतेर्भ्रमत्वात्। न च सुवर्णे द्रुते तत्र कश्चन भागेऽद्रुतः प्रत्यक्षसिद्ध इति कथं प्रतीतेर्भ्रमत्वमिति साम्प्रतम्, पीतिमाश्रयपार्थिवभागस्यात्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनेन तत्प्रतिबन्धकविजातीयद्रवद्रव्यस्य कल्पनया तस्य सुवर्णत्वसिद्धेः। अत्रायं प्रयोगः—अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्तातिसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वाज् जलमध्यस्थपीतपटवत् अग्निसंयोगस्य तेजः सुवर्णेऽपि सत्वादुक्तं पीतिमेति। अग्निसंयोगरहिते घटे पूर्वरूपविजातीयरूपानाधारे व्यभिचारवारणाय हेतौ सत्यन्तम्, जलपरमाणौ व्यभिचारवारणाय हेतौ पृथिवीत्वमपि देयम्। अप्रयोजकत्वशङ्कापि न, विरोधिद्रवद्रव्यसम्बन्धं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वात्। ननु सुवर्णे द्रवद्रव्यत्वसिद्धावपि तस्य तैजसत्वमेव कथं सिद्ध्यतीति चेन्न, तत्र गन्धाभावेन पृथिवीत्वाभावे सांसिद्धिकद्रवत्वाभावेन जलत्वाभावे रूपवत्वेन वायुत्वाद्यभावे च तस्य तैजसत्वसिद्धेरित्यन्यत्र विस्तरः।

प्रश्नः ३४– किं तावद् वायोर्लक्षणम्, तत्साधकानुमानञ्च किम्, तद्भेदाश्च के, त्वगिन्द्रियस्य वायवीत्वं कथमिति सर्वं निरूप्यताम्।

उत्तरम्– "अपाकजोऽनुष्णाशीतः स्पर्शस्तु पवने मतः" इत्युक्तम्, तेनापाकजानुष्णाशीतस्पर्शवत्वं तल्लक्षणं सम्पन्नम्। अनुष्णाशीतस्पर्शस्य पृथिव्यां सत्वात्तत्रातिव्याप्तिवारणायाऽपाकजेति। नन्वेवमपाकजस्पर्शवत्वमेव तल्लक्षणमस्तु, अनुष्णाशीतेति व्यर्थमिति चेन्न, जलतेजसोरप्यपाकजस्पर्शसत्वात्तत्रातिव्याप्तेः। नन्वेवमपाकजानुष्णाशीतस्पर्शवत्वं पदादावपि सत्वात्तत्रातिव्याप्तिरेवेति चेन्न, पाकजस्पर्शवद्वृत्त्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वस्य विवक्षितत्वेनादोषात्। एवञ्च, निरुक्तलक्षणेन वायवीयः स्पर्शः विजातीयः सिद्धः, तादृशस्पर्शत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नवायुनिष्ठकारणतावच्छेदकतया वायुत्वजातिः सिध्यति। ननु द्रव्यप्रत्यक्षे

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

रूपस्य कारणत्वात् तत्र च तदभावात्प्रत्यक्षप्रमाणाऽभावेन वायुर्द्रव्यं नास्त्येवेति चेन्न, अनुमानप्रमाणस्य तत्र सत्वात्। अत्रेमान्यनुमानानि-(१) योऽयं रूपवद्द्रव्यासमवेतः स्पर्शः, स क्वचिदाश्रितः स्पर्शत्वात्पृथ्वीसमवेतस्पर्शवत्, पृथिव्यादिस्पर्शे सिद्धसाधनवारणाय रूपवद्द्रव्यासमवेतेति स्पर्शविशेषणम्। (२) असति रूपवद्द्रव्याभिघाते योऽयं परमाण्वादिषु शब्दसन्तानः, स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः, अविभज्यमानावयवद्रव्यसम्बन्धिशब्दसन्तानत्वाद् दण्डाभिहतभेरीशब्दसन्तानवत्। अत्रापि पृथिव्यां सिद्धसाधनवारणायाभिघातान्तं पक्षविशेषणम्, विभागजशब्दे व्यभिचारवारणाय हेताववयवान्तं द्रव्यविशेषणम्। (३) नभसि तृणतूलस्तनयित्नुविमानादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका, अस्मदाद्यनधिष्ठितद्रव्यधृतित्वान् नौकाधृतिवत्, जलादिगततृणादौ सिद्धसाधननिरासाय नभसोति पक्षविशेषणम्, प्रयत्नवदात्मसंयोगहेतुकधृत्यादौ व्यभिचारवारणाय हेतावस्मदादीति विशेषणम्। (४) रूपवद्द्रव्याभिघातमन्तरेण तृणे यत्कर्म तत्स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजातीयकर्मत्वाद् नदीपूराहताकाशादिकर्मवत्, तदुक्तम्-स्पर्शादिलिङ्गक इति। नित्यानित्यभेदेन वायुर्द्विविधः, परमाणुरूपो नित्यः, शरीरेन्द्रियविषयभेदेनानित्यस्त्रिविधः, तत्र शरीरमयोनिजं पिशाचादीनां मरुल्लोके प्रसिद्धम्। ननु वायोस्ताल्वादिवाग्व्यापाराभावात् करचरणाद्यभावेन चाहरणविहरणाद्यभावाद् भोगायतनत्वं तस्य न स्यादिति चेन्न, जलीयतैजसवायवीयशरीराणामुपष्टम्भकस्य पार्थिवभागस्य सत्वेनोपभोगक्षमत्वात्, जलीयादिव्यवहारस्तु तत्र जलादीनां प्राधान्यात्। वायवीयमिन्द्रियं त्वक्, त्वगिन्द्रियं वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्, इत्यनुमानादत्रापि त्वगिन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति देयम्। विषयवस्तु प्राणादिमहावायुपर्यन्तः, प्राणस्तु यद्यप्येक एव, तथापि हृदादिभिन्नस्थानेवशान् मुखनिर्गमनादिक्रियाभेदाच्च भेदव्यपदेशः। तदुक्तम्—

'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः'।। इति शम्।

प्रश्नः ३५– विशेषणासिद्धि-विशेष्यासिद्धिनिराकरणपूर्वकं गगनसाधकानुमानप्रणाली कीदृशी?

उत्तरम्– "आकाशस्य तु विज्ञेयो शब्दो वैशेषिको गुणः"—इति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

मूलम्, तत्राकाशत्वन्न जातिरेकव्यक्तिवृत्तित्वात्। ननु किन्तर्हि तदिति चेच्छब्दाश्रयत्वरूपं तदिति गृह्यताम्। ननु कालस्य सर्वाश्रयत्वात्तत्रातिव्याप्तिरिति चेन्न, समवायेनाश्रयताया विवक्षणात्। नन्वेवं शब्दो गुण इति वक्तव्ये मूले वैशेषिक इति पदं व्यर्थमिति चेन्न, विशेषगुणान्तरव्यवच्छेदाय तदुक्तेः। ननु "सति कुड्ये सर्वं चित्रम्" इति न्यायेनाकाश एव मानाभावेन तन्निर्वचनमसङ्गतमिति चेन्न, शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः, अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात्। यन्नैव तन्नैवं यथा रूपादिः, न चायं तथा तस्मान्न तथेत्यनुमानेन शब्दाधिकरणत्वेन तत्सिद्धेः। ननूक्तानुमानेन शब्दाधिकरणत्वाद्गगनं द्रव्यं तदा सिध्यति, यदा हेतौ तस्य द्रव्याश्रितत्वं प्रमाणान्तरेण निश्चितम्, तदेवाद्यापि न सिद्धमिति निरुक्तानुमाने विशेष्यासिद्धिरिति चेन्न, शब्दो द्रव्यसमवेतः गुणत्वात्संयोगवदित्यनुमानेन विशेष्यासिद्धेः परिहारात्। नन्वेवं द्रव्यसमवेतत्व-साधकानुमाने पक्षे हेत्वभावरूपा स्वरूपा सिद्धिरद्यापि शब्दे गुणत्यस्यासिद्धत्वादिति चेन्न, शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात्स्पर्शवदित्यनुमानेन शब्दे गुणत्वसिद्धेस्तत्र स्वरूपासिद्धेरभावात्, घटादौ व्यभिचारवारणाय हेतावयोग्यान्तं विशेषणम्, आत्मनश्चक्षुर्ग्रहणायोग्यमन-इन्द्रियग्राह्यजातिमत्वात्तत्रातिव्याप्तिवारणाय बहिरितीन्द्रिये विशेषणम्, रसत्वादेश्च बहिरिन्द्रियचक्षुर्ग्रहणायोग्याबहिरिन्द्रियग्राह्यत्वात्त-त्रातिव्याप्तिवारणाय जातिमदिति।

अथैवं शब्दस्य पृथिव्याद्यष्टद्रव्याश्रितत्वे तावतापि विशेषणासिद्धिर्नापहृतेति चेन्न, शब्दो न पृथिव्यादिद्रव्यचतुष्टयविशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकत्वे सति प्रत्यक्षविषयत्वात् सुखवदित्यनुमानेन शब्दस्य पृथिव्यादिचतुष्टयगुणाभावसिद्धेः। "अपाकजस्तु स्पर्शान्ताः" इत्यादिना पाकजरूपादीनां कारणगुणपूर्वकत्वस्य गुणनिरूपणे वक्ष्यमाणत्वात्, पाकजरूपादेरकारणगुणपूर्वकत्वेन तत्र व्यभिचारवारणायाद्यं सत्यन्तम्, पटरूपादेरग्निसंयोगस्यामववायिकारणत्वाभावेन प्रत्यक्षविषयत्वेन च तत्र व्यभिचारवारणाय द्वितीयं सत्यन्तम्। अकारणगुणपूर्वकत्वञ्च गुणे स्वकारणगुणजन्यभिन्नत्वम्, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षविषयत्वादिति विशेष्यदलम्। नन्वेवं विशेषणासिद्धिरपहृता, शब्दस्य दिगादिद्रव्यत्रगुणाङ्गीकारे बाधकाभावादिति चेन्न शब्दो न दिगादिद्रव्यत्रयगुणो विशेषगुणत्वाद्रूपवदित्यनुमानेन शब्दस्य दिक्कालमनसां गुणाभावसिद्धेः। उक्तं

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

हि—"आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः" इति। ननु शब्दे विशेषगुणत्वसिद्धावेवोक्तत्रिकगुणाभावसिद्धिः स्यात्तत्रैव मानाभाव इति चेन्न, शब्दो विशेषगुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रियजन्यप्रत्यक्षविषयत्वाद् रूपवदित्यनुमानेनात्मविशेषगुणाभावसिद्धेः, ज्ञानादौ व्यभिचारवारणाय हेतौ बहिष्पदम्। इत्येवमनुमानत्रयेण विशेषणासिद्धिपरिहारे विशेष्यासिद्धेश्च। ततः पूर्वानुमानेन परिहारे च पारिशेष्याच्छब्दाधिकरणत्वेन नवमं गगनात्मकं द्रव्यं सिद्धम्। नन्वेवं वायवीयद्व्यणुकादिषु सूक्ष्मशब्दक्रमेण वायावेव कारणगुणपूर्वकः शब्द उत्पद्यताम्, तथा च पृथिव्यादिचतुष्टयगुणाभावसाधकानुमानेन स्पर्शवद्वायुगुणत्वेन तदभावसाधने बाधः, शब्दस्य कारणगुणपूर्वकत्वे स्वरूपासिद्धिश्चेति चेन्न, स्वाश्रयद्रव्यध्वंसप्रयोज्यध्वंसप्रतियोगित्वरूपयावद्द्रव्यभावित्वस्य शब्देऽभावेन वायोर्गुणस्य स्पर्शस्य सत्वेन च तत्र बाधस्वरूपासिद्ध्योरभावात्। नन्वाकाशे महत्त्वसत्त्वात्प्रत्यक्षे च तस्यैव हेतुत्वात्प्रत्यक्षमेव तत्र मानमिति चेन्न, उद्भूतरूपवत्वे सत्येव महत्त्वस्य तत्प्रयोजकत्वेन तत्र रूपादावेव चाक्षुप्रमाया अभावात्। नन्वेवमिह पक्षीति प्रतीतिर्न स्यादिहेति प्रतीतेर्गगनावगाहित्वादिति चेन्न, आलोकस्य तादृशप्रतीतिविषयत्वादिति शम्।

प्रश्नः ३६– कालस्य किं लक्षणम्, तस्य सद्भावे किं मानम्, कथं तस्यैकत्वे क्षणदिनादिव्यवहारश्च?

उत्तरम्– अत्रायमभिसन्धिः—"जन्यानां जनकः कालः" इत्यनेन कालस्य यावत्कार्यजनकत्वलक्षणं लब्धम्। नवेवं कार्यसामान्ये कालस्य समवायिकारणत्वासम्भवाद्द्रव्येऽसमवायिकारणत्वस्यासत्वाच्च कारणपर्यायवाचिमूलोक्तं जनकपदमसङ्गतमिति चेन्न, तस्य तृतीयकारणपरत्वेन कार्यत्वावच्छिन्नम्प्रति निमित्तकारणत्वं कालत्वमिति स्वीकारेणादोषात्। नन्वेवं दिगादीनामपि कार्यसामान्ये निमित्तकारणत्वेन तत्रातिव्याप्तिरिति चेन्न, कालिकसम्बन्धानछिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणत्वेन निमित्तत्वमिति तल्लक्षणेनादोषात्, सम्बन्धविशेषनिवेशान्न दिश्यतिव्याप्तिः, अधिकरणत्वेनेति निवेशाददृष्टादौ न सा। ननु कार्यमात्रम्प्रति तस्य निमित्तकारणत्वे मानाभाव इति चेन्न, अद्य घटो भविष्यति श्वः पटो भवितेत्यादिप्रतीतौ तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालस्य विषयतया "यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपीति" न्यायेन कार्यमात्रे तस्य तत्कारणत्वसिद्धेः। तत्सद्भावं दर्शयितुं मूले उक्तम्—"जगतामाश्रय" इति। कालः सर्ववानिति प्रतीत्या सर्वाधारत्वेन तत्सिद्धिरिति तदभिप्रायः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

ननु तादृशप्रतीतिर्दिग्विषयणी कथन्नेति चेन्न, इदानीं घट इति प्रतीते सूर्यपरिस्पन्दादेर्विषयिकरणेन घटादेः सूर्य्यपरिस्पन्दादिना सम्बन्धस्य वाच्यत्वे दिनकरक्रियया घटादेः संयोगाद्यभावेन "स्वाश्रयतपनसंयोगि संयोगरूपसम्बन्धसिद्धौ" तद्घटकतया कालस्य सिद्धेः। गगनमेव तद्घटकमास्तामिति चेन्न, गगनदिगात्मनां विनिगमनाविरहेणातिरिक्तकालस्य तद्घटकांगीकारात्। तस्यातिरिक्तसिद्धौ कालः सर्ववानिति प्रतीतेरतिरिक्तकालविषयत्वमेव सम्यक् अनुमानेनापि तत्सिद्धिः, तथा हि ज्येष्ठे परत्वप्रत्ययः, कनिष्ठेऽपरत्वप्रत्ययः, स च परत्वापरत्वगुणविशेषाधीनः, तथा च परत्वापरत्वे ससमवायिकारणके भावकार्यत्वाद् घटवदित्यनुमानेन किञ्चित्तयोरसमवायिकारणं सिद्धम्, तच्च कालपिण्डसंयोग एव।

ननु लाघत्वाकालस्यैकत्वे क्षणादिभेदव्यवहारो न स्यात्, न चैकस्मिन्नेव घटे घटकुम्भादिव्यव्यवहारवदत्रापि स स्यादिति चेन्न, एकस्मिन् विरुद्धनानाव्यवहारयोगादिति चेन्न, उपाधिभेदेनैकस्यापि तस्य विभिन्नव्यवहारविषयत्वसम्भवात्। तथा हि स्वविभागप्रागभावावच्छिन्नं कर्म, स्वं क्रिया तज्जन्यो यो विभागस्तस्य यः प्रागभावस्तदवच्छिन्नं कर्म, इत्येकोपाधिः। नन्वेवं प्रथमक्षणे तद्व्यवहारोपपादनेऽपि द्वितीयक्षणे विभागोत्पत्त्या तत्प्रागभावाभावात्तद्व्यवहारो न स्यादिति चेन्न, पूर्वसंयोगावच्छिन्नविभागरूपस्तत्र द्वितीयोपाधिस्वीकारात्, क्रियाजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभागरूपोपाधिरयम्, नन्वेवं तृतीयक्षणे पूर्वसंयोगस्यापि नाशे क्षणव्यवहारः कथमिति चेत्, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावरूपोपाधिस्तत्रेति गृहाण, पूर्वसंयोगध्वंसविशिष्टोत्तरसंयोगप्रागभावस्तदर्थः। नन्वेवं चतुर्थक्षणे पूर्वसंयोगध्वंसत्त्वेऽपि उत्तरसंयोगोत्पत्तौ तत्प्रागभावाभावात् कथं स व्यवहार इति चेदुत्तरसंयोगावच्छिन्नकर्मरूपचतुर्थोपाधिस्वीकारेण। अत्रायमभिसन्धिः- पूर्वं क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः, तत उत्तरदेशसंयोगः, ततः क्रियानाशः, तत्र क्रियाध्वंसात्प्रागुत्पत्तिकालिकक्रिया-तज्जन्यविभाग-तज्जन्यपूर्वसंयोगनाशतज्जन्योत्तरसयोगानां क्रमशश्चतुर्णामुपाधित्वमिति। न च क्रियानाशे पुनः क्षणादिव्यवहारो न स्यादिति वाच्यम्, क्रियान्तरमादाय तदुपपत्तेः। ननु महाप्रलये जन्यभावध्वंसरूपे क्षणादिव्यवहारो न स्यादिति चेन्न, तत्र क्षणादिव्यवहाराऽभावस्येष्टत्वात्। न च महाप्रलयोत्पत्तौ तल्लक्षणस्याव्याप्तिस्तदधिकरणक्षणा-वृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वरूपस्य

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तस्याभावादिति चेन्न, स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंससमयस्यैव तदानीं तदुपपादकत्वादित्यन्यत्र विस्तरः।

प्रश्नः ३७– दिशः सद्भावे किम्मानम्, तस्या एकत्वे प्राच्यादिभेदव्यवहारः कथमिति निरूप्यताम्?

उत्तरम्– "दूरान्तिकादि धीहेतुरेका नित्या दिगुच्यते" इति मूलम्, तस्यायमभिप्रायः—विप्रकृष्टे देशे परत्वप्रत्ययः, सन्निकृष्टदेशेऽपरत्वप्रत्ययः, स च परत्वापरत्वगुणविशेषाधीनः, तथा च परत्वमपरत्वञ्च ससमवायिकारणके; भावकार्यत्वात्, यद्यद्भावकार्यं तत्तत्समवायिकारणकम्, यथा घटादिस्तथा चेमे तस्मात्तथा, ध्वंसे व्यभिचारवारणाय हेतौ भाव इति, एवञ्च तादृशप्रत्ययम्प्रति परत्वापरत्वे निमित्ते तत्र दिक्पिण्डसंयोगस्तत्र दिगिति क्रमेण दिशस्तद्बुद्धौ परम्परया निमित्तत्वेन दिक् सिध्यति, तस्या बहुत्वे मानाभावेनैकत्वं विभुत्वञ्च सिद्धम्। ननु तस्या एकत्वे प्राच्यादिविरुद्धार्थकशब्दप्रयोगः कथमिति चेन्न उपाधिभेदेन तदुपपत्तेः। तथा च यन्मूर्तापेक्षयोदयगिरिसन्निहितं यन्मूर्तं सा ततः प्राची, तदपेक्षयोदयगिरिसन्निहितत्वञ्च तन्निष्ठोदयगिरिसंयुक्तसंयोगा-पेक्षयाऽल्पतरोदयसंयुक्तसंयोगवत्त्वम्, यन्मूर्तापेक्षयोदयगिरिव्यवहितं यन्मूर्तं सा ततः प्रतीची, तदपेक्षयोदयगिरिव्यवहितत्वञ्च तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षया बहुतरोदयगिरिसंयुक्तसंयोगवत्त्वम्, एवं यन्मूर्तापेक्षया सुमेरुगिरिसन्निहितं यन्मूर्तं तत उदीची, तथा यन्मूर्तापेक्षया सुमेरुगिरिव्यवहितं यन्मूर्तं सा ततोऽर्वाची, सन्निहितव्यवहितत्वे च पूर्ववद्बोध्ये। नन्वेवं सुमेरुगिरेर्दक्षिणस्यामेभिरुपाधिभिस्तथा व्यवहारसम्भवेऽपि तत उत्तरस्यां तथा व्यवहारः कथमिति चेन्न, "सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितिः" इति नियमेन तत्राप्युक्तोपाधेरेव तादृशव्यवस्थासम्भवादिति शम्।

प्रश्नः ३८– ईश्वरसाधारणमात्मत्वजातिं प्रसाध्यात्समद्भावे किम्मानमिति निरूप्यताम्?

उत्तरम्– अयम्भावः—

"बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा।
धर्माधर्मौ गुणा ह्येते आत्मनः स्युश्चतुर्दश"।।

इत्युक्तम्, तेन सुखदुःखादिसमवायिकारणमात्मेति लब्धम्, तथा च सुखदुःखादिसमवायिकारणतावच्छेदकतयाऽऽमत्वजातिः सिद्धा। नन्वहं सुखीत्यादिप्रतीत्याऽऽत्मत्वेनात्मनो विषयीकरणात्प्रत्यक्षमेव तत्र प्रमाणं किमित्यनुमानेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

तत्साधनमिति चेन्न, सकलात्मसाधारणानुगतप्रत्यक्षासम्भवेन तद्बिना तत्र जातित्वसिद्धेः। नन्वेवमपि सुखत्वावच्छिन्नम्प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वमस्तु, किमितित्तत्रात्मत्वेन तत्कल्पनेनेति, न चैवं घटादावपि सुखाद्यापत्तिरिति वाच्यम्, अदृष्टादेर्निमित्तकारणाऽभावेन तत्र तदापत्तेरभावादिति चेन्न, आत्मत्वापेक्षया तयोर्गुरुत्वेन तत्र कारणतावच्छेदकत्वकल्पनस्यान्याय्यत्वात्। नन्वात्मनिष्ठकारणतापि न फलोपधायकतारूपा त्वया गृह्यते इति द्रव्यत्वेन कारणतावादिनापि तस्या आत्मन्येव स्वीकारात्, स्वरूपयोग्यतारूपायाः कारणतावच्छेकरूपत्वेन नवद्रव्यवृत्तिक्लृप्त-द्रव्यत्वस्य तत्त्वेनापूर्वकल्पनाऽभावादिति चेन्न, आत्ममनः संयोगे सति ज्ञानोत्पत्तिस्वीकारेण मनसि तदुत्पत्तिवारणायात्मत्वेन ज्ञानत्वाद्यवच्छिन्नम्प्रति हेतुत्वावश्यकत्वात्। नन्वेवमात्मत्वजातेरीश्वरात्मसाधारण्ये न मानमिति चेन्न "आत्मा वाऽऽरे द्रष्टव्यः" इत्यादि श्रुतावात्मपदव्यवहारस्यैव मानत्वात्। नन्वेवमीश्वरे सुखाद्युत्पत्तिरपि स्यात्तत्र कारणतायाः सत्वादिति चेन्न, अदृष्टशरीररयोरपि तदुत्पत्तौ निमित्तत्वेनेश्वरे तदभावेन तदुत्पत्तेरभावात्। नन्वेवं नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमेनेश्वरस्य स्वरूपयोग्यत्वे कदाचित्तत्र सुखाद्युत्पत्तिः स्यादिति चेन्न जलपरमाणौ स्नेहानुपपत्त्या तादृशनियमे मानाभावात्। न चैवमीश्वरेऽदुष्ट कुतो न जायत इति वाच्यम्, मिथ्याज्ञानस्य तत्र हेतुत्वेन तत्र तदभावेन तदभावात्। मिथ्याज्ञानस्य तत्र हेतुत्वे किम्मानमिति चेत्, मुक्तात्मन्यदृष्टोत्पत्त्यभाव इति गृहाण, केचित्तु ईश्वरे आत्मत्वजातिं नाङ्गीकुर्वन्ति, न चेश्वरस्य दशमद्रव्यत्वापत्तिः, द्रव्यविभागे आत्मपदस्थाने ज्ञानवत्वेन विभागात्। वस्तुतस्तु इदं न युक्तं वैदिकात्मपदादेर्ज्ञानादिमति लक्षणापत्तेः, आत्मसद्भावे प्रमाणमनुमानम्, अचेतनं चेतनाधिष्ठितं कार्यं करोतीति व्याप्तिग्रहे शरीरेन्द्रियोरचेतनत्वेऽपि ज्ञानत्वदर्शनाद भवत्यनुमानमात्मास्तीति, तथा च प्रयोगः—इन्द्रियाणि शरीरञ्च ज्ञात्राधिष्ठितम्, अचेतने सति जनकतासम्बन्धेनावच्छेदकतासम्बन्धेन वा ज्ञानवत्वाद्वा स्यादि"ति, आत्मनि व्यभिचारवारणाय हेतौ सत्यन्तम्, तदुक्तम्मूले—"आत्मेन्द्रियाद्यधिष्ठातेति" किञ्च चक्षुरादीनीन्द्रियाणि रूपाद्युपलब्धौ सकर्तृकाणि कारणत्वात्, छिदादिक्रियाकरणवाल्यादिवदित्यप्यनुमानं तत्सद्भावे मानम् तदप्युक्तं—"करणं हि सकर्तृकमिति"। नन्वहं सुखीदुखीत्यादिप्रत्यक्षविषयत्वमेवात्मनस्तत्किमिति मानान्तरगतवेषणेनेति चेन्न, शरीरादेरात्मत्ववादिनां, तादृशप्रतीतिविषयस्तद्भिन्न त्वेति प्रतिपादनाय एवमनुमानेन, देहादिभिन्नस्य तस्य साधनात्।

jGuru Math, Srinivas, Varanasi. Collection. ... Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रश्नः ३९– मानवशरीराणां पार्थिवत्वे किं मानम्? कथं पाञ्चभौतिकत्वव्यवहारः इति समीक्ष्यताम्।

अथवा– शरीरस्य कर्तृत्वे किं दूषणम्?

उत्तरम्– अत्रेदं रहस्यम्-ननु समवायसम्बन्धावच्छिन्नज्ञानाद्यधिकरणमेव चैतन्यम्, तथा च तार्किककमते मुक्तात्मनां प्राणाभावेन न ज्ञानाधिकरणं चैतन्यं यथा, यद्वन् ममापि मृतशरीरस्य न चैतन्यमेवञ्च शरीरस्यैव चैतन्यमस्तु कृतं तद्भिन्नेनात्मना। न च तव मते मृतशरीरे चैतन्याभावः किन्निबन्धनः, मम मते तु प्राणविशिष्टात्मनोऽभाव एव तत्प्रयोजक इति वाच्यम्, तव तादृशविशिष्टात्माभावस्य प्राणाभावप्रयोजकत्वाऽपेक्षया केवलं मम लाघवात् प्राणाभावस्यैव तदभावप्रयोजकत्वादिति चेन्न, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावस्य दृष्टतया शरीरस्य चैतन्ये बाल्येऽनुभूतस्य स्थविरे स्मरणानुपपत्तेः, ननु बाल्यशरीरं तदास्त्येवेति चेन्न, अवयवोपचयापचयैः शरीराणामुत्पादविनाशाशालित्वेन तदानीं तच्छरीराभावात्, न च स्वप्रयोज्यसंस्कारवत्त्वसम्बन्धेन बाल्यशरीरसमवेतानुभवस्य वृद्धशरीरे सत्त्वान्नानुपपत्तिः स्मरणस्येति साम्प्रतम्, अनन्तसंस्कारकल्पना-पेक्षयैकात्मस्वीकारे लाघवात्। ननु फलमुखगौरवस्य दोषानाधायकत्वमिति चेन्न तथापि शरीरस्य चैतन्ये बालस्य प्राथमिकस्तन्यपाने प्रवृत्त्यनापत्तेः, न च प्रवृत्त्यभावे कारणाऽभाव इति शङ्क्यम्, इष्टसाधनताज्ञानस्य, तत्र हेतुत्वेन शरीरात्मवादिनां मते पूर्व तदभावेन वर्तमानशरीरे स्तन्यपानम्, इष्टसाधनमिति ज्ञानाभावेन स्त न्यपाने प्रवृत्त्यनापत्तेः। ननु प्रवृत्त्यन्यथानुपपत्तिस्तवापि तुल्येति चेन्न, मन्मते आत्मनोऽनादित्वाज्जन्मतरानुभूतेष्टसाधनत्वस्य तदानीम्मृत्या तत्र प्रवृत्त्युपपत्तेः। नन्वेवमिष्टसाधनत्वादन्यदपि स्मृतिरवगाहतामिति चेन्न, उद्बोधकमन्तरा स्मृत्यनुपपत्या तदभावेन पदार्थान्तरस्मरणाभावात्, नन्विष्टसाधनत्वस्याप्युद्बोधकाऽभाव इति चेन्न, जीवनादृष्टस्यैव स्तन्यपानप्रवृत्यनुकूलेष्टसाधनत्वस्य स्मृत्युपधायकत्वात्। ननु प्रथमजन्मनि तदुद्बोधकाभावे कथं तत्र प्रवृत्तिरिति चेन्न, संसारस्यानादित्वेन जन्मनि प्राथम्यस्य निर्धारणासम्भवात्, एवञ्चात्मनोऽनादित्वं सिद्धम्, नन्वनादेरति घटादिप्रांगभावस्य घटोत्पत्तौ नाशदर्शनादात्मनोऽपि ध्वंसप्रतियोगित्वापत्तिरिति चेन्न अभावरूपस्य प्रागभावस्य तत्वेऽपि अनादिभावस्या-कादेरिवात्मनोऽपि नाशासम्भवान्नित्यत्वञ्च तस्य सिद्धम्, तदुक्तम्—शरीरस्य न चैतन्यं मृतेषु व्यभिचारत इति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रश्नः ४०– इन्द्रियात्मवादं निराकृत्य मनसश्चैतन्यं खण्डय?

अथवा– बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति प्राच्यनव्यमतेन विविच्यताम्?

उत्तरम्– ननु शरीरस्य चैतन्यांगीकारे बालस्य स्तन्यपाने प्रवृत्त्यभावभयेन तस्यात्मत्वाभावेऽपि, अहं काण इत्यादि प्रतीत्येन्द्रियाण्येवात्लास्तु। न च तेषां जडत्वात्क्रियानुकूलकृतिमत्वं कर्तृत्वन्न सम्भवतीति वाच्यम्; इन्द्रियात्मवादिमते तदमिरिक्तस्यात्मयोऽभावेन तादृशकर्तृत्वस्य तत्रैवांगीकारात् न त सिद्धान्ते इन्द्रियातिरिक्तस्यात्मनः सत्वेनेन्द्रियाणां व्यापारवत्वे सति कारणत्वरूपं कणत्वं सम्भवति, तत्र चक्षुः संयोगादिरूपव्वापारवत्वस्य, चाक्षुषज्ञानाव्यवहित-पूर्वकालवृत्तित्वस्य च सत्वात्, त्वन्मते तेषानेव कर्तृत्वेन तदतिरिक्तकरणाभावेन ज्ञानाद्यनुत्पत्तिप्रसंग इति वाच्यम्, इन्द्रियात्मवादिना तत्रैव कर्तृत्वकरणत्वोभयांगीकारात्। न चैकस्यैव करणत्वे कर्तृत्वे कर्तृकरणादिभेदव्यवहारोऽनुपपन्न इति वाच्यम्, कर्तृत्वकरणत्वादि लक्षणोपाधेर्भेदादेकवैव कर्तृकरणादिव्यवहारोदोषोपत्तेरिति चेन्न, अनुभवस्मृत्योः सामानाधिकरण्यनियमेन पूर्वं चक्षुषाऽभूतस्य चक्षुर्विनाशे इन्द्रियान्तरेण स्मरणानुपपत्तेः नन्वहं काण इत्यादिप्रतीतेः का गतिरिति चेत्, ममेन्द्रियाणीत्यपि प्रतीत्या तत्प्रतीतेर्भ्रमत्वात्, अपि च तेषामात्मत्वपक्षे समुदितस्यात्मत्वे चक्षुर्विनाशेऽपि श्रोत्रेण रूपाप्रत्यक्षापतितः, एकस्यापि विनाशे तत्समुदायाभावेन मृतत्वव्यवहारापत्तिश्च, तेषां प्रत्येकमात्मत्वं तु परस्परवैयत्वे युगपद् विरुद्धक्रियाकर्तृत्वे शरीरोन्मथनप्रसङ्गः, सुन्दोपसुन्दन्यायेनाकाण्डकलहे सर्वेषां विनाशप्रसङ्गश्च, तत्मात्तदतिरिक्त आत्मेति सिद्धम्, तदुक्तम्—"यथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः" इति। नन्विन्द्रियाणां नानात्वादनित्यत्वाच्च निरुक्तदोषसद्भावेऽपि मनस आत्मत्वमस्तु, तस्यैकत्वं नित्यत्वञ्च तार्किकाणामपि सम्मतम्, तत्करणानि च चक्षुरादीनि सन्तु, तथा च नानुपपत्तिः स्मरणस्य, नाप्येकस्य तस्य केनापि विग्रह इति चेन्न, मनसोऽणुत्वेन प्रत्यक्षे च महत्वस्य हेतुत्वेन तत्प्रत्यक्षाभाव तद्धर्धज्ञानसुखादीनामपि प्रत्यक्षाभावप्रसङ्गात्। ननु तवातिरिक्तात्मनो विभुत्ववन्ममापि मनसो विभुत्वमेव किन्नेति चेन्न "अयौगपद्याज्ज्ञानानां तस्यागुणत्वमिहोच्यते" इत्यनेन तस्याणुत्वस्य वक्ष्यमाणत्वात्, तस्मान्न मन आत्मेत्यन्यत्र विस्तरः।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रश्नः ४१– आत्मनः क्षणिकविज्ञानरूपत्वे को दोषः?

अथवा– आत्मत्वजातिसाधनप्रणाली कीदृशी?

अथवा– क्षणिकविज्ञानवादि-बौद्धानां मतमुपन्यस्य निराक्रियताम्?

उत्तरम्– अत्रेदमाकूतम्-योगाचारो बौद्धः पदार्थमात्रं विज्ञानस्वरूपं मन्यते, इत्यादिप्रवृत्तिविज्ञानम्, अहमित्याकारकमालयविज्ञानम्, तदेवात्मा। ननु विज्ञानस्य बुद्धिरूपत्वात्तस्याश्च जडत्वात्कथमात्मत्वमिति चेन्न, स्वपरव्यवहारे स्वभिन्नप्रकाशानपेक्षत्वरूपवतः प्रकाशत्वस्य तत्र सत्वेनोक्तदोषाभावात्। न च ज्ञानसुखादेरतिरिक्तस्यानुभवाद्वस्तुमात्रस्य विज्ञानरूपत्वं त्वन्मते न सम्भवतीति वाच्यम्, ज्ञानसुखादेरपि विज्ञानस्याकारविशेषस्वीकारात्। ननु वस्तुमात्रस्य विज्ञानत्वे त्वन्मते तस्य क्षणिकत्वाद् घटादेश्चिरप्रतीतिर्न स्यादिति चेन्न, यत्सत्तत्क्षणिकमिति व्याप्त्या विज्ञानस्य भावत्वेन तस्य क्षणिकत्वाङ्गीकारात्।

ननु क्षणिकविज्ञानस्यात्मत्वे सुषुप्तावात्मा न सिद्ध्येत्, पूर्वोत्पन्नविज्ञानस्य क्षणिकत्वेन नाशाद्विज्ञानान्तरस्य तदानीमुत्पादकाभावादिति चेन्न, पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने कारणत्वात्सुषुप्तावप्यहमाकारालयविज्ञानधारायाः सत्वाभ्युपगमात्। ननु विज्ञानस्य क्षणिकत्वेन तदीयसंस्कारस्यापि तत्त्वात्कालान्तरे स्मरणानापत्तिरिति चेन्मैवम्, एकत्र वसने स्थितस्य मृगमदस्य तत्तत्पटभेदपरम्परया सर्वत्र गन्धसंक्रान्तिवत्पूर्वपूर्वविज्ञानजन्यसंस्काराणां स्वोत्तरोत्तरविज्ञानसंक्रान्तत्वेन स्मृत्युपपत्तिसम्भवादतो विज्ञानमेवात्मेति चेन्न, विज्ञानस्य सर्वविषयकत्वे सर्वेषां सर्वज्ञत्वापत्तेः, न च यत्किञ्चिद्विषयकमेव तदिति साम्प्रतम्, विनिगमकाभावात्। ननु यस्य यद्विषयकमनुभवसिद्धन्तस्य तद्विषयकं विज्ञानमङ्गीक्रियते इति चेन्न, ज्ञानस्य सविषयत्वात् सुषुप्तावपि विषयभानप्रसङ्गात्।

ननु सुषुप्तौ निर्विषया विज्ञानधारा प्रवर्तत इति चेन्न, ज्ञानत्वस्य विषयिताव्याप्यत्वान् निर्विषयायाश्चित्सन्ततेस्तदानीमभावात्, प्रमाणभावेऽपि तत्र ज्ञानत्वं स्वीक्रियत इति चेत्, घटादिविषयाणामपि विज्ञानत्वापत्तिः। ननु मम विज्ञानातिरिक्तवस्तुनोऽभावाद् घटादेर्विज्ञानत्वमिष्टमेवेति चेन्न, घटत्वादिना तदनुभवस्यापह्नवाशक्यत्वात्। ननु घटादयोऽपि विज्ञानाकारविशेष एवेति चेन्न, आकारस्य विज्ञानाद्भेदे तदतिरिक्तवस्तुसिद्धौ त्वत्सिद्धान्तभङ्गापत्तेः। ननु घटादयो न विज्ञानाद्भिन्ना इति न सिद्धान्तभङ्ग इति चेन्न, नानाधर्मावगाहिज्ञानरूपसमूहा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri and Sarayu Trust. Funding IKS-MoE-Gra

लम्बनज्ञाने "तदभिन्नाभिन्नस्य तदभिन्न" मिति न्यायेन नीलाकारस्यापि पीताकारापत्तेर्विज्ञानस्वरूपस्याभेदात्। ननु नीलाकारपीताकारावभिन्नावेव भेदप्रतीतिर्नीलत्वपीत्वयोर्भेदात्। न च तयोरपि विज्ञानस्वरूपत्वादभेदः किन्नेति चेन्न, नीलत्वादेरपारमार्थिकस्य पारमार्थिकविज्ञानेनाऽभेदासम्भवादिति चेन्न, नीलत्वादेर्विरुद्धस्यैकत्र विज्ञाने समावेशासंभवात्। विरुद्धानामपि नीलत्वादीनां सामानाधिकरण्ये का क्षतिरिति चेन्न, विरोधिनिश्चयस्यैवाशक्यत्वात्। ननु समूहालम्बने पार्थक्येन नीलाकारादिर्नाभ्युपेयते, किन्तु चित्राकार एवेति नोक्त दोष इति चेन्न, पूर्वविज्ञानवासनाया उत्तरविज्ञाने संक्रमासंभवात्, धर्मिणोर्धर्ममन्तरेणानवस्थानात्, अन्यथा मातृपुत्रयोरपि तस्याः संक्रमप्रसङ्गात्। ननूपादानेनानुभूतमुपादेयेन समर्यते इति नियमान् मातृपुत्रयोरुपादानीपादेयत्वाऽभावेन नोक्तदोष इति चेन्न तावतापि निरुक्तप्रकारेणं तस्याः संक्रमासम्भवात्। ननूत्तरविज्ञानमुत्पत्तिकालेः एव प्राक्तनविज्ञानसंस्कारेण सहैव जायत इत्येव संक्रमपदार्थ इति चेन्न, उत्तरविज्ञानोत्पत्तिकाले पूर्वविज्ञानस्य नष्टत्वादुत्पादकाऽभावोनोत्तरत्र वासनानुत्पत्तेः। अथोत्तरविज्ञानमुत्पद्यमानं स्वयमेव वासनामुत्पादयतीति मतम्, तर्हि विज्ञानानामेव तदुत्पादकत्वे तेषामानन्त्यात् संस्कारानन्त्यप्रसङ्गः। न च क्षणिकविज्ञाने शक्तिविशेषोऽस्ति, येन पूर्वविज्ञानानुभूतमप्युत्तरत्र स्मृतिं जनयतीति साम्प्रतम्, अतिशयविशेषे प्रमाणाभावात्। अतः क्षणिकविज्ञानं नात्मा, किन्तु नित्यो ज्ञानवानात्मेति सिद्धम्। एतयैव युक्त्या क्षणिकशरीरेष्वेव चैतन्यं वदन्तः परास्ताः। ननु क्षेत्रस्थबीजादङ्करोत्पत्तिर्न कुसूलस्थादिति तथा चाङ्कुरत्वावच्छिन्नम्प्रति कुर्वद्रूपत्वेन हेतुत्वन्त्वयाङ्गीकृतं तदिव क्षणिकशरीरेषूत्तरोत्तरशरीरनिष्ठासनोत्पादकत्वं मया वाच्यमिति चेन्न, तत्रापि धरणीसलिलसंयोदिसहकारिसमवधानासमवधानाभ्यां निर्वाहे ममापि कुर्वद्रूपत्वस्याकल्पनादिति शम्।

प्रश्नः ४२– आत्मनो नित्यविज्ञानरूपत्वं कुतो न?

अथवा– सत्यं ज्ञानमनन्तं ब्रह्म, तत्त्वमसि, मनोब्रह्मेति, सर्वे आत्मनः समर्पिताः, ब्रह्मविद् ब्रह्मैव भवति, निरञ्जनः परमं साम्यमुपैति, यः सर्वज्ञः स सर्वविद्, नित्यं विज्ञानमानन्दं ब्रह्म; इत्यादि महावाक्यानि निरूप्यताम्?

उत्तरम्– अथात्मनः क्षणिकविज्ञानत्वे वासनाऽसंक्रमादिदोषेण

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri Sarayu Trust. Funding IKS-MoE-Gran

तदनङ्गीकारेऽपि नित्यविज्ञानात्मनः स्वीकारे पूर्वोक्तदोषाभावेन नित्यविज्ञानमेवात्मास्तु, न च वाच्यं तस्य नित्यत्वे विज्ञानत्वे च मानाभावः, अविनाशी वारेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म, इत्यादिश्रुतेस्तत्रं मानत्वादिति चेन्न, आत्मनो विज्ञानरूपत्वे सर्वेषां सर्वज्ञत्वापत्तेः, यत्किञ्चिद्विषयकत्वे विनिगमनानाऽभावात्। नापि निर्विषयविज्ञानरूपः सः, निर्विषयस्य विज्ञानत्वे मानाभावात्, ननु जीवस्य न जगद्विषयकत्वं न वा नियतत्किञ्चिद्विषयकत्वम्, किन्तु यद्विषयकत्वं यत्र जीवेऽनुभवसिद्धं तत्र तद्विषयकत्वमिति चेन्न, आत्मनो ज्ञानरूपत्वे ज्ञानात्मनोः पर्यायत्वाद् घटविषयकज्ञानमितिवत्, घटविषयकोऽहमित्यनुभवापत्तेर्घटज्ञानवानहमिति सर्वानुभवस्यापलापापत्तेश्च, तस्माज्ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्, सत्यं ज्ञानम्- इति श्रुतिरेवात्मनो ज्ञानरूपत्वे मानमिति चेन्न, तस्या ब्रह्मपरत्वात्। ननु वेदान्तिनां जीवब्रह्मणोरैक्याद् ब्रह्मपरत्वे तस्या जीवपरत्वमपि सिद्धमेवेति चेन्न, ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानामपि भेदस्यानुभवाज्जीवब्रह्मणोर्भेदस्य सुतरां सिद्धत्वात्। नन्वेकस्मिन्नेव ब्रह्मणि जीवोपाधीनामनन्ततया तत्तदन्तःकरणावच्छेदेन विलक्षणसुखित्वाद्यनेकानुभवेनास्ति विरोध एकत्रैव गगने नानाकर्णशष्कुल्यवच्छेदेन विरुद्धशब्दतदभावयोरनुभवादिति चेन्न, चैत्रमैत्रात्मनोरीश्वररूपयोरैक्यादेकस्य बन्धमोक्षयोस्तदितरस्यापि तदापत्तेः।

नन्वेवं जीवब्रह्मणोरैक्यबोधिकाया "तत्त्वमसि" इत्यादिश्रुतेरप्रामाण्यापत्तिरिति चेन्न, तयोर्भेदेऽप्युपासनायां "मनो ब्रह्मेति" श्रुत्या मनसि ब्रह्मबुद्धिवदभेदभावनयैवोपासितव्यमित्यत्र तत्तात्पर्यात्, तयोर्भेदादेव "सर्वे आत्मनः समर्पिताः" इति श्रुतिरपि संगच्छते। ननु मोक्षकाले जीवात्मनां ब्रह्मणा सहाभेद उत्पद्यत इति चेन्न, तयोर्भेदस्य नित्यत्वेन नाशासम्भवात्। नन्वस्माकं ब्रह्मातिरिक्तसर्वस्याऽनित्यवान् मोक्षकाले तयोर्भेदस्यापि ध्वंस इति चेन्न, भेदनाशेऽपि तदानीं व्यक्तिद्वयात्मत्वेन तयोरवस्थानात्। ननु तदानीं द्वित्वस्यापि नाशात् कथं व्यक्तिद्वयस्यावस्थितिरिति चेन्न, एवमेवेति श्रुत्या निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि तस्य सत्यस्वरूपाङ्गीकारवद् द्वित्वाभावेऽपि तयोर्व्यक्तिद्वयात्मकत्वस्यापि वक्तुं शक्यत्वात्। नन्वभावस्याधिकरणात्मकत्वान्मिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मरूपत्वान्निर्धर्मकत्वं स्वभिन्नधर्मशून्यत्वं नानुपपन्नमिति चेन्न, एकत्वसंख्या अभावस्वरूपस्य व्यक्तिद्वयात्मकद्वित्वस्यापि सुवचत्वात्। ननु कथमेकत्वाधिकरणे तदभावरूपं द्वित्वमिति चेत्प्रत्येकं सर्वासु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

व्यक्तिष्वभेदरूपैकत्वसत्वेऽप्युभयंनैकमिति भेदसाधकसर्वानुभवसिद्धप्रत्यय-स्यापलापाऽसम्भवो यथा पृथिव्यां गन्धसत्वेऽपि पृथिवीजलयोर्न गन्ध इति व्यवहारः। ननु मोक्षे "ब्रह्मविद् ब्रह्मैव भवति" इति श्रुत्या तयोरभेदः प्रमाणसिद्ध इति चेन, सम्पदाधिक्ये पुरोहितेऽपि राजत्वव्यवहारवन्निर्दुःखत्वाज्जीवस्येश्वरसाम्यबोधने तत्तात्पर्यात्। अत एव "निरञ्जनः परमं साम्यमुपैति" इति श्रुतिः संगच्छते।

ननु न जीवस्य ज्ञानरूपत्वं ब्रूमः, किन्त्वीश्वरस्यैवेति चेन्न, यः सर्वज्ञः सः सर्ववित्" इति श्रुतेरेकवाक्यतया "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतावपि, अर्श आदित्वादचि प्रत्यये तस्यापि ज्ञानसुखाद्यश्रयत्वाङ्गीकारात्। नन्वानन्दवित्यर्थस्त्वन्मते न संगच्छते, ईश्वर आनन्दाभावादिति चेन्न, भारापगमे सुखित्वप्रतीतिवद् दुःखाभाव आनन्दशब्दस्य भाक्तत्वात् लक्षणाकल्पनमेव तव दोष इति चेन्न, "असुखम्" इति श्रुतेस्तत्रानन्दसत्वेऽपि तस्यानन्दरूपत्वानङ्गीकारात्। नन्वसुखमित्यत्र न विद्यते सुखं यस्येति बहुव्रीहिणा तस्य सुखरूपत्वं सिद्धमिति चेन्न, बहुव्रीहावन्यपदार्थे शक्तिकल्पने गौरवात्प्रकरणादिविरोधाच्चेत्यन्यत्र विस्तरः।

प्रश्नः ४३– आत्मनिरूपणप्रस्तवे सांख्यमतं कया युक्त्या निरस्तं विश्वनाथेन?

अथवा– प्रकृतेः कर्तृत्वं पुरुषस्य च चैतन्यमिति सांख्यकृन्मत-मुपपाद्य सयुक्तिकं खण्ड्यताम्?

उत्तरम्– इदमत्र हृदयम्-सांख्याः कर्तृभूतान्तःकरणप्रकृतित्वरूपकर्तृत्ववती प्रकृतिः यथा पद्मपत्रम्भसा लिप्तन्न सम्भवति तद्वत्पुरुषाः कर्तृत्वाद्याश्रयो न, तथा च प्रयोगः पुरुषः कर्तृत्वाभाववान् कारणत्वाभावाद् यन्नैवं तन्नैवं तन्नैवं यथा प्रधानम्, न चायं तथा तस्मान्न तथा। ननु तत्र कारणत्वसत्वाद्धेत्वसिद्धिरिति चेन्न, पुरुषस्य घटादिकारणत्वे घटादिकार्यस्यापि नाशो न स्यात्कार्यकारणयोरभावादिति तस्याकारणत्वसिद्धेः। न चैतादृशपुरुषसत्वे न मानमिति शङ्क्यम्, अन्यत्र प्रसिद्धस्यैव चैतन्यस्य बुद्धावारोपसम्भवात्तत्र चैतन्यान्यथानुपपत्त्या तत्कल्पनात्। ननु बुद्धिः कस्य कार्यमिति चेत्, मूलप्रकृतेः परिणाममवेहि। ननु महत्त्वमन्तःकरणं किन्ततो भिन्नमिति चेन्न, तस्या एव तयोः पर्यायत्वात्। ननु बुद्धेः किं कार्यमिति चेत्, बुद्धेरिन्द्रियद्वारा स्वपरिणामेन घटादिज्ञानेन सम्बद्धो घटादिर्विषयः स्वकार-ज्ञानपरिणामिबुद्ध्याऽगृहीतभेदकत्वसम्बन्धेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन तस्य

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

संसारसम्पादकत्वम्, बुद्धिनाशे सति परिणामस्य ज्ञानास्याऽभावाद् विषया-वच्छेदकाभावात् कैवल्यावस्थानरूपस्य मोक्षस्य सम्पादकत्वम्, इत्येव तत्कार्यं गृहाण।

ननु पुरुषे साक्षात्सम्बन्ध एव विषस्यास्तु संसारव्यवहारनियमाकोऽपि तत्र स एवेति किन्नाभ्युपेयत इति चेन्न, इन्द्रियप्रणालिकया बौद्धपरिणामेन ज्ञानेन घटादेः साक्षादेव सम्बन्धाङ्गीकारात्। ननूदासीने पुरुषे कर्तृत्वप्रतीतिर्बुद्धौ चैतन्यप्रतीतिः कथमिति चेत्, बुद्धिपुरुषयोर्भेदाग्रहेण तत्प्रीतिसम्भवः। ननु बुद्ध्युपलब्ध्योः पर्यायत्वात्कथं तत्परिणामोपलब्धिरिति चेन्न, तयोर्भेदात्, तथा हि ममेदं कर्तव्यमित्यत्र मदंशेदमंशव्यापारांशानां त्रयाणां प्रत्ययस्तत्राद्यः पुरुषसम्बन्धः, दर्पणस्य यथा मुखसम्बन्धः प्रतिबिम्बमात्रन्न तु तात्त्विकस्तथा बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपराग इत्युच्यते, द्वितीय इन्द्रियद्वाराऽयं घट इत्यादिज्ञानरूपः परिणाम एव विषयघटादिना बुद्धेः सम्बन्धस्तात्त्विको निश्वासाभिहतदर्पणस्य मलिन्निमेव, तृतीयस्तु पुरुषोपरागविषयोपरागाभ्यां कर्तव्यघटादेर्भासस्तेन कर्तव्यमित्यध्यवसाय इत्येवमंशत्रयवती बुद्धिस्दीयपरिणामेन ज्ञानेन पुरुषस्य योऽतात्विकः सम्बन्धः, स उपलब्धिरित्युच्यते, दर्पणस्य मलिन्नेव मुखस्य सम्बन्धो यथा एवं ज्ञानस्य बुद्धितो भेदे तद्धर्मत्वे च सुखदुःखेच्छाद्वेषधर्माधर्म्मा अपि तस्या एव गुणाः, करोमीति कृत्याश्रये तेषामपि प्रतीतेः। ननु बुद्धेर्नित्यत्वमेव किन्नेति चेन्न, अनित्यवधर्माश्रयत्वेन तस्या अप्यनित्यत्वादिति प्राहुस्तन्न, कृतिसामानाधिकरण्ये नादृष्टं जनयति, तच्च तेनैव सम्बन्धेन भोगमित्येवं परम्परया सामानाधिकरण्यप्रमावाच्चेतनोऽहं करोमीति सामानाधिकरण्येन प्रतीतेश्चैतन्याश्रयातिरिक्तबुद्धेरभावात्। न च चेतनोऽहमिति प्रत्यये चैतन्यांशे भ्रमस्तथा च प्रयोगः "कृत्याश्रयो न चेतनः जन्यधर्माश्रयत्वाद् घटवदि" ति वाच्यम्, बुद्धिः कृत्यभाववती जन्यधर्माश्रयत्वाद् घटवदिति बुद्धेः कृत्यनाश्रयत्वबोधकानमानस्य सत्वेन कृत्यंश एव भ्रमसिद्धेः। ननु कर्तृचेतनयोर्भेद एवास्त्विति चेन्न, बुद्धेरनित्यत्वे तत्पूर्वमसंसारापत्तेः। नित्यत्वे मोक्षाभावप्रसङ्गाच्च। न च वाच्यं जडप्रकृतिकार्यत्वाद् बुद्धिरचेनेति कार्यकारणयोरभेदादिति, बुद्धेः प्रकृतिकार्यत्वाभावात्, कर्तृत्वस्य जन्यत्वव्यापकत्वेऽप्रयोजकत्वात्। कर्तृनित्यत्वेऽपि मानाभाव इति चेन्न, सरागस्य जन्मदर्शनादित्यर्थकस्य "वीतरागजन्मादर्शना" दिति सूत्रस्यैव तत्र मानत्वात्, अनादिभावस्य नाशासम्भवादात्मनो नित्यत्वम्। ननु प्रकतेः क्रियमाणानि" इति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization ... Sarayu Trust. Funding IKS-MoE-Gra

स्मृतिविरोधः प्रकृत्याद्यकल्पने इति चेन्न, तत्रापि प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिरिति तदर्थाभ्युपगमात्, अत एव तदग्रेऽधिष्ठानादीनां कर्तृत्वमङ्गीकृत्य "तत्रैवं सति कर्तारमात्मानं केवलन्तु यः" इति वाक्येन पञ्चानां कर्तृत्वमङ्गीकृतं न तु प्रकृतेरित्यन्यत्र विस्तरः।

प्रश्नः ४४– बुद्धिः कतिविधा अनुभूतिश्च कतिविधा, कानि च तस्या करणानि? प्रत्यक्षलक्षणं च सोदाहरणं सभेदं प्रदर्शयत।

अथवा– ईश्वरसाधारणं प्रत्यक्षलक्षणं निरूप्यानुमित्यादेरपि लक्षणमुच्यताम्?

उत्तरम्– इदमत्र तात्पर्यम्—बुद्ध्यादिगुणक आत्मेत्युक्त्वा स्मृत्यनुभवभेदेन बुद्धेर्द्वैविध्यं निर्दिश्य प्रत्यक्षानुमित्युपमितिशाब्दबोधत्वधभेदाद् अनुभूतेश्चातुर्विध्यमुक्तम्। अनुभूतेश्चातुर्विध्यं चतुर्विधकरणजन्यत्वात्। तथा च सूत्रम्—"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति" तत्रेन्द्रियजन्यत्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम्, इन्द्रियरूपादाविन्द्रियन्यत्वादतिव्याप्तिरतो विशेष्यम्, ज्ञानत्वस्यानुमित्यादावपि सत्वात्तत्रातिव्याप्तिवारणाय सत्यन्तम्। नन्वेवं तत्रा- तिव्याप्तिस्तदवस्थैवं मनोरूपन्द्रियजन्यत्वादिति चेन्न, इन्द्रियत्वावच्छि-न्नजनकतानिरूपितजन्ताशालिज्ञानत्वमिति तल्लक्षणे विवक्षितेऽनुमित्यादौ मनसत्वेन तस्य कारणत्वेऽपीन्द्रियत्वेनाऽतत्वे तत्रादिव्याप्तेरभावात्। नन्विन्द्रियजन्यत्वाभावादीश्वरप्रत्यक्षेव्याप्तिरिति चेन्न, तत्प्रत्यक्षस्यालक्ष्यत्वात्।

ननु जीवात्मप्रत्यक्षस्यैव लक्ष्यत्वेनेश्वरप्रत्यक्षस्येत्यत्र मानाभाव इति चेत् "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति" सूत्रे इन्द्रियपदोपादानेनेश्वरप्रत्यक्षस्यालक्ष्यत्वात्, तत्प्रत्यक्षस्यापि लक्ष्यत्वमित्याग्रहे तु ज्ञानाकरणकज्ञानं प्रत्यक्षमिति तल्लक्षणमिति गृहाण। ज्ञानाजन्यं ज्ञानं प्रत्यक्षमिति तु न, विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वात्तत्राव्याप्तेः। आद्ये ज्ञानेत्युक्त्याऽनुमित्यादौ नातिव्याप्तिः व्याप्तिज्ञानादेस्तत्र करणत्वात्। ननु योगिप्रत्यक्षेव्याप्तिस्तत्र मननादिज्ञानकारणत्वादिति चेन्न, ज्ञानत्वाद्यघटितधर्मावच्छिन्नकरणकत्वाभाववत्वे सति ज्ञानत्वमिति तल्लक्षणेनादोषात्। नन्वेवं विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेऽव्याप्तिः, विशेषणतावच्छेदकप्रकारकनव्यापारनिर्विकल्पकस्य तत्र करणत्वादिति चेन्न, ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वस्य तल्लक्षणत्वेनादोषात्, तादृशी

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

जातिरनुमितित्वादिरेव। वस्तुतस्त्वनुमित्यादावपि मनसः करणत्वम्, तथा च ज्ञानाकरणकत्वं प्रत्यक्षप्रमाणलक्षणं तत्राव्याप्तमती यत्किञ्चित्प्रत्यक्षमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्वं प्रत्यक्षप्रमाया लक्षणमिति सारमिति प्रत्यक्षलक्षणम्। परामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम्, परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपस्थता च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानमनुमितिः, वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं तज्जन्यं पर्वतो वह्निमानिति ज्ञानमिति समन्वयः।

ननु परामर्शप्रत्यक्षमपि परामर्शजन्यमिति तत्रातिव्याप्तिरिति चेन्न, परामर्शाजन्यत्वे सति हेत्वविषयकत्वे सति ज्ञानत्वमनुमितित्वमित्यङ्गीकारेणादोषात्। न च धूमवान्पर्वतो वह्निमानित्यनुमितावव्याप्तिरिति शङ्क्यम्, परामर्शजन्यज्ञानवृत्त्यनुभवत्व्याप्यजातिमत्वमित्यङ्गीकारे तत्रापि तादृशजातिमत्त्वेनाऽव्याप्तेरभावात्। जातिमत्वञ्च समवायसम्बन्धेन ग्राह्यम्, तेन कालिकसम्बन्धेन तज्जातिमति काले नातिव्याप्तिः। ननु पक्षधर्मतायाः प्रवेशे गौरवमिति चेद्व्याप्तिज्ञानकरणकं ज्ञानमनुमितिरिति गृहाण। ननु तत्र व्याप्तिज्ञानत्वेन न करणत्वम्, किन्तु मनस्तेनैवोपमित्यादावपि तथैव, न च वाच्यं करणैक्ये कार्यवैजात्यं न स्यादिति, साभग्रीवैलक्षण्येन तदुपपत्तेः। चतुर्विधप्रमाणासिद्धिरिति चेन्न क्रियाविशेषाद्विभागोपपत्तैरिति चेत्पर्वतो वह्निमानित्यादि या काचिदनुमिति-व्यक्तिस्तद्व्यक्तिवृत्तिजातिमत्वमनुमितित्वम्। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पदंज्ञानकरणकं ज्ञानं शाब्दबोध इति शिवम्।

प्रश्नः ४५— कियतां पदार्थानाञ्चाक्षुषप्रत्यक्षन्तत्र चोद्भूतरूपस्य कारणतानुपगमे का क्षतिः?

उत्तरम्— अयम्भावः—प्रत्यक्षं षड्विधं घ्राणजरासनचाक्षुषस्पार्शनश्रौत्रमानसभेदात्तत्र रूपादीनाञ्चक्षुषप्रमा भवति। तथा हि—उद्भतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथकत्वसंख्ये, विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम्। क्रियाञ्जातिं योग्यवृत्तिं समवायञ्च तादृशम्, गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोरिति'' चाक्षुषप्रत्यक्षे आलोकसंयोगोद्भूतरूपयोः कारणत्वमन्यतराभावे तदनापत्तेः। अन्धकारे चाक्षुषापत्तिवारणायालोकसंयोगस्य हेतुत्वम्, पिशाचादीनाम्प्रत्यक्षत्ववारणायोद्भूतरूपस्य कारणत्वम्, ग्रीष्मोष्मचूर्णप्रविष्टतेजसां चाक्षुषप्रत्यक्षापत्तिवारणाय रूपे उद्भूतत्वविशेषणम्। तत्र द्रव्यचाक्षुषम्प्रति तयोः समवायसम्बन्धेन कारणत्वम्। द्रव्यसमवेत-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रूपादिप्रत्यक्षम्प्रति तयोः स्वाश्रयसमवायसम्बन्धेन हेतुत्वम्, स्वन्तदुभयं तदाश्रयो द्रव्यं तव समावायो रूपादेः, द्रव्यसमवेतरूपत्वादिप्रत्यक्षम्प्रति तयोः स्वाश्रयसमवेतसमवायसम्बन्धेन, हेतुत्वम्, स्वन्तदुभयन्तदाश्रयो द्रव्यं तत्समवेतं रूपादि तत्र समवायेन रूपत्वमिति, तथा चोद्भूतरूपवद्द्रव्यपृथक्त्व-संख्याविभागसंयोगपरापरत्वस्नेहद्रवत्वपरिमाणयोग्यव्यक्तिवृत्तिक्रियाजातिसमवाया एते चाक्षुषप्रत्यक्षविषया इति शम्।

प्रश्नः ४६– बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षसामान्यम्प्रति किङ्कारणमत्र च प्राच्यनव्यमतेन विविच्यताम्?

उत्तरम्– "रूपान्यच्चक्षुषो योग्यं रूपमात्रापि कारणं, द्रव्याध्यक्षे" इत्यनेन त्वाचप्रत्यक्षेऽपि रूपस्य कारणत्वमुक्तम्, एवञ्च घ्राणरसनश्रोत्रेन्द्रियैर्द्रव्यप्रत्यक्षाभावेन बहिश्चक्षुस्त्वगिन्द्रियेणैव द्रव्यप्रत्यक्षस्य सिद्धतया चाक्षुषत्वाचप्रत्यक्षयोश्च रूपस्य हेतुत्वाद्, बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणं सिद्धमिति प्राचीनमतम्, चाक्षुषप्रत्यक्षे रूपे हेतुता त्वाचप्रत्यक्षे च स्पर्श इत्येवान्वयव्यतिरेकसिद्धो हेतुरिति नव्याः। ननु कार्याभावे कारणाभावस्य प्रयोजकत्वाद् गगनादेर्बहिरिन्द्रियजन्यप्रत्यक्षाभावे रूपाभावस्पर्शाभावयोः प्रजोकत्वकल्पने गौरवमननुगमश्च, रूपस्य कारणत्वे तु रूपाभावस्य तत्वे लघवमिति चेन्न, तत्रात्मावृत्तिशब्दभिन्नविशेषगुणवत्व-रूपानुगतप्रयोजकत्वाङ्गीकात्, आत्मनश्चक्षुरादिना प्रत्यक्षवारणाय वृत्त्यन्तम्, आकाशस्य तद्वारणाय शब्दभिन्नेति, कालादेस्तद्वारणाय विशेषेति। ननु रूपस्य बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षकारणत्वे लाघवमिति चेन्न, वायौ रूपाभावेन तस्य त्वाचप्रत्यक्षानापत्तेः। न च वायोरप्रत्यक्ष इष्ट एवेति वाच्यम्, उद्भूतस्पर्शस्य लाघवात्तत्र हेतुत्वेन तत्प्रत्यक्षसिद्धेः। ननु प्रमायां निरुक्तहेतुत्वाभावात्तस्याः प्रत्यक्षानापत्तिरिति चेन्न, तत्र वायोरप्रत्यक्षवन्मम प्रमायास्तत्वाशावस्येष्टत्वात्, तथा चोभयोः प्रत्यक्षसत्त्वादुद्भूतरूपतादृशस्पर्शयोरुभयत्रापि हेतुत्वं सिद्धम्।

ननु त्रसरेणोस्त्वाचप्रत्यक्षानङ्गीकारात् तत्स्पार्शनवारणाय स्पर्शान्यद्रव्य-समवेतस्पार्शनप्रत्यक्षम्प्रति त्वक्संयुक्तस्पार्शनवद् द्रव्यसमवायत्वेन हेतुत्वस्य वाच्यतया वायोस्त्वाचप्रत्यक्षाङ्गीकारोऽनुचित इतरथा तद्गतसंख्यापरिमाणयोरपि त्वाचप्रसङ्ग इति चेन्न, तद्गतैकत्वादेः प्रत्यक्षस्येष्टत्वात्। नन्वेकत्वसंख्याया साधारण्यादाकाशादिगतैकत्ववदप्रत्यक्षमेव किन्नेति चेन्न, बाह्यवायुव्यजनानिलादौ द्वित्वप्रत्यक्षस्यानुभवसिद्धत्वात्। ननु सजातीयसंवलने भूयोऽवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षाभावे च वायुपरिमाणसंख्ययोः कथमग्रह इति चेत्, सजातीयसंवलनादिदोषेण तदग्रह इत्यवधार्य्यतामित्याहुः। अत्रायं निष्कर्षः–रूपस्य

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

वाह्यप्रत्यक्षे कारणत्ववादिनां प्राचां मते वायुप्रत्यक्षं न, त्वाचप्रत्यक्षन्तु तदीयस्पर्शगुणं विषयीकरोति, नव्यमते पृथककारणत्वेन वायोः प्रत्यक्षं भवत्येवेति शम्।

प्रश्नः ४७– "त्वचो योगो मनसा ज्ञानकारणम्" इति कारिकांशो व्याख्यायताम्?

अथवा– ज्ञानसामान्ये किं कारणम्? सप्रमाणं प्रतपादयत?

अथवा– जन्यज्ञानसामान्ये किं कारणमिति सोपपत्तिकमुपपाद्यताम्?

उत्तरम्– अत्रेदमाकूतम्—"त्वचो योगो मनसा ज्ञानकारणम्" इत्यनेन ज्ञानसामान्यम्प्रति त्वङ्मनः संयोगस्य कारणत्वमुक्तम्। ननु नित्यज्ञाने तस्याकारणत्वादिदमसंगतमिति चेन्न, जन्यज्ञानसामान्यम्प्रत्येवं तस्य कारणत्वाङ्गीकारात्। न च मानाभावस्तत्र शङ्क्यः, सुषुप्तौ पुरीतति वर्तमानेन मनसा ज्ञानाजननस्यैव मानत्वात्। ननु सुषुप्तिकालेऽनुभवसामग्र्यभावान्नानुभवः स्यात्तद्यथा आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षम्, तथा च तदानीं चक्षुरादिना मनोयोगाभावान्न प्रत्यक्षम्। ननु माभूद्बहिरिन्द्रियजन्य-प्रत्यक्षम्मानसप्रत्यक्षं स्यादेवेति चेन्न तदानीं ज्ञानादेरभावेन तत्प्रत्यक्षस्याप्यसम्भवात्। नन्वात्मनो विभुत्वान्मनः संयोगस्य तदानीमपि सत्वादात्मप्रत्यक्षं स्यादिति "चेन्न अध्यक्षो विशेषगुणयोगतः" इत्यनेन ज्ञानादेरभावे तत्प्रत्यक्षाभावस्योक्तप्रवात् ननु। मा भूत्प्रत्यक्षमनुमितिस्तु स्यादिति चेन्न, व्याप्तिज्ञानाभावेन तस्या अप्यभावात्, सादृश्यज्ञानपदज्ञानयोरभावा-न्नोपमितिशाब्दबोधावित्येवमनुभवसामग्र्यभावः, मा भूदनुभवः स्मृतिस्तु स्यादेवेति चेन्न, तदानीं स्मरणस्यानुभवसिद्धत्वाभावेन फलवलकल्प्योद्‌बोधकाभावसत्वेन तस्याप्यभावात्, अतस्तदानीं ज्ञानसामग्र्य भावेनैव न किमपि ज्ञानं भवति, तत्कथं तदानीं तदभावेन त्वङ्मनोयोगस्य तत्प्रति कारणत्वं कल्प्यत इति चेन्न, स्वप्नावस्थानन्तरं जायमानसुषुप्तौ तत्प्राक्कालोत्पन्नज्ञानादेस्तदुत्पत्तिकालेऽपि तत्सत्त्वेन तत्प्रत्यक्षापत्तेः तत्संयोगा-दात्मनोऽपि प्रत्यक्षापत्तेश्च।

ननु सुषुप्तिप्राक्कालीनज्ञानस्य निर्विकल्पकरूपत्वात् तदतीन्द्रियत्वमुभयेषां समानमेवेति चेन्न, तस्य निर्विकल्पकत्वे मानाभावात्तस्य निर्विकल्प-कत्वाभावेऽप्यतीन्द्रियत्वमिति चेन्न, तत्रापि मानाभावात्। ननु त्वङ्मनःसंयोगस्य ज्ञानसामान्ये हेतुत्वे रासनचाक्षुषादिप्रत्यक्षकालेऽपि स्पार्शनप्रत्यक्षं स्यात्, न च तस्मामग्र्यभावः, विषयत्वकसंयोगत्वङ्मनःसंयोगयोः सत्वात्। ननु चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वादेवन स्यादिति चेन्न, विनिगमनाविरहेण त्वाचसामग्र्या अपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

चाक्षुषादिप्रतिबन्धकत्वापत्तेरिति चेन्न, निरुक्तदिशा त्वङ्मनः संयोगस्य ज्ञानहेतुत्वे सिद्धेऽनुभावानुरोधेन चक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धत्वकल्पनात्, युगपत्सर्वमेव ज्ञानन्तु न, ज्ञाने मनःकारणत्वेन तस्याणुत्वादेकदैव सर्वेन्द्रियसम्बन्धाऽभावात्, नापि सुन्दोपसुन्दन्यायेन परस्परप्रतिबन्धकत्वम्, प्रदीपादिवद्विरोधिनामपि भोगवैचित्र्येण बाध्यबाधकत्वाभावात्। वस्तुतस्तु सुषुप्तौ ज्ञानाभावानुरोधेन जन्यज्ञानसामान्यम्प्रति चर्ममनःसंयोगस्यैव हेतुत्वम्, परस्परप्रतिबन्ध्यप्रतिबन्धकभावशङ्कापि न चाक्षुषादिप्रत्यक्षप्रनितिकाले त्वङ्मनोयोगाभावेन त्वाचप्रत्यक्षाभावादित्यन्यत्र विस्तरः।

प्रश्नः ४८– निर्विकल्पज्ञानस्यावश्यकता का? तस्य किं स्वरूपम्? तस्य किं लक्षणम्? तत्प्रत्यक्षं भवति न वा? तत्स्वीकारे का युक्तिरिति विविच्यताम्?

उत्तरम्– अयम्भावः—निर्विकल्पसविकल्पकभेदेन प्रत्यक्षादिज्ञानं द्विविधम्, तत्र प्रकारताशून्यत्वे सति ज्ञानत्वम्, विशेष्यताशून्यत्वे सति ज्ञानत्वम्, संसर्गताशून्यत्वे सति ज्ञानत्वमिति विनिगमनाविरहेण लक्षणत्रयं निर्विकल्पकज्ञानस्य। ननु निर्विकल्पस्य निर्विषकत्वापत्तिरिति चेन्न, तस्य तुरीयविष्यतास्वीकारेणाऽदोषात्। न च तत्सद्भावे मानाभाव इति वाच्यम्, अयं घट इति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टाज्ञानत्वाद् दण्डीतिज्ञानवदित्यनुमानस्यैव तत्र मानत्वात्। न च व्यभिचारः शङ्क्यः, विशिष्टबुद्धिम्प्रति विशेषणज्ञानस्य कारणत्वात्, तथा हि घटचक्षुःसंयोगानन्तरं घटत्वप्रकारकतद्वद्विशेष्यकमयं घट इति विशिष्टज्ञानं न भवितुमर्हति, तज्ज्ञानात् प्राग् घटत्वज्ञानाऽभावात्।

ननु मा भूत्तज्ज्ञानं विशिष्टज्ञानं जायतामिति चेन्न "नागृहीतविशेषणां बुद्धिर्विशिष्ट उपजायते" इति नियमेन विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वात्। एवञ्च प्रथमं घटघटत्वयोर्विशेष्यताविशेषणतासंसर्गत्वानवगाहिज्ञानं जायते, तदेव निर्विकल्पकमुच्यते। तत्प्रत्क्षन्तु न, तथा हि प्रथमं निर्विकल्पकं ज्ञानम्, ततः सविकल्पकम्, ततोऽनुव्यवसायः, ज्ञानविषकं ज्ञानमनुव्यवसाय इत्युच्यते, तत्र घटमहं जानामीत्यनुव्यवसाये, आत्मनि ज्ञानम्, तत्र घटः, तत्र घटत्वं प्रकारतया भासते, ज्ञानविशेषणीभूते घटे यद्विशेषणं घटत्वं तद्विशेषणतावच्छेदकमित्युच्यते, विशेषणतावच्छेदकप्रकारकं ज्ञानमयं घट इति, तद्घटमहं जानामीति विशिष्टवैशिष्ट्यात्मकेऽनुव्यवसाये कारणं भवति, निर्विकल्पके च घटत्वादेर्न प्रकारतया भानम्, ततो घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति। ननु विशेषणाविषयीकृत्यैव घटादिविशिष्टज्ञानं जायतामिति चेन्न,

jGuru Math, Shivala, Varanasi Collection. Equipment Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

जात्यखण्डोव्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमेन तादृशज्ञान्यऽसम्भवात्। ननु विशेष्ये विशेषणमिति रीत्यैव निर्विकल्पकानुव्यवसायो भवत्विति चेन्न, रक्त पटा घटोद्रव्यमिति समूहालम्बनानान्तरं रक्तं घटं जानामीत्यनुव्यवसायापत्त्या विशिष्टवैशिष्ट्यविषयताशून्यज्ञानानुव्यवसायानङ्गीकारात्, तत्सिद्धं निर्विकल्पकस्य न प्रत्यक्षमिति, "तदुक्तं ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते;" इति शुभम्।

प्रश्नः ४९– षड्विधप्रत्यक्षे महत्त्वस्य केन सम्बन्धेन हेतुत्वमिति विविच्यताम्?

उत्तरम्– अयमभिसन्धिरत्र–"महत्त्वं षड्विधे हेतुः" इत्यनेन चाक्षुषादिषड्विधप्रत्यक्षे महत्त्वस्य हेतुत्वमुक्तम्। नन्विदमसंगतं श्रोत्रघ्राणरसनेन्द्रियैर्गणादेरेव प्रत्यक्षत्वेन, तत्र च महत्वस्याऽभावः, गुणादौ गुणानङ्गीकारादिति चेन्न, महत्त्वस्य द्रव्यसमवेतप्रत्यक्षं प्रत्यपि हेतुत्वेन तज्जन्यतावच्छेदकं द्रव्यसमवेतप्रत्यक्षत्वं तत्र च श्रावणाद्यन्यद्रव्यसमवेतप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वकल्पने गौरवात्, तत्र विषयतया द्रव्यप्रत्यक्षम्प्रति समवायसम्बन्धेन महत्त्वस्य हेतुत्वम्, द्रव्यसमवेतगुणकर्मसामान्यानां प्रत्यक्षम्प्रति स्वाश्रयसमवायसम्बन्धेन तस्य हेतुत्वम्, स्वं महत्त्वं तदाश्रयो द्रव्यं तत्र समवायो गुणादीनाम्, द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षम्प्रति स्वाश्रयसमवेतसमवायसम्बन्धेन तस्य हेतुत्वम्, स्वं महत्त्वं तदाश्रयो द्रव्यं तत्समवते गुणकर्मणी तत्र गुणत्वादेः समवाय इत्येवं महत्वस्य प्रत्यक्षे हेतुत्वमिति शिवम्।

प्रश्नः ५०– इन्द्रियत्वं कथन्न जातिः? किं च तस्य सपदकृत्यं लक्षणम्?

उत्तरम्– चाक्षुषादिषड्विधप्रत्यक्षे "इन्द्रियं करणमि" त्युक्तम्, तत्रेन्द्रियत्वन्न जाति, पृथिवीत्वाऽभावसमानाधिकरणेन्द्रियत्वं रसनादाविन्द्रियत्वाभावसमानाधिकरणं पृथिवीत्वं घटादौ, तयोर्घ्राणेन्द्रिये सत्वेन सांकर्य्यात्, किन्तर्हीन्द्रियत्वमिति चेच्छब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानगमनः संयोगाश्रयत्वं तत्त्वमिति गृहाण। आत्मादेर्ज्ञानकारणमनः संयोगाश्रयत्वादिति। व्याप्तिवारणाय सत्यन्तम्, उदभूतविशेषगुणस्य शब्दस्य सत्त्वात्तत्राव्याप्तिवारणाय शब्देतरेति। नन्वेवं शब्देतरविशेषगुणानाश्रयत्वे सतीति वक्तव्ये विशेषगुणस्योद्भूतत्वविशेषणं व्यर्थमिति चेन्न, चक्षुरादौ विशेषगुणस्यानुद्भूतरूपादेः सत्वेन तत्राव्याप्तिवारणाय तत्र तद्विशेषणस्यावश्यकत्वात्। नन्वेवं चक्षुरादौ ...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

गुणविशेषणं विशेषपदं किमर्थमिति चेत्, संयोगादिमादायाऽसंभववारणाय तत्सार्थक्यमित्यवेहि, तथा हि शुक्लत्वाभावसमानाधिकरणमुद्भूतत्वमुद्भूतगन्धे, उद्भूतत्त्वाऽभावसमानाधिकरणं शुक्लत्वं रसनेन्द्रियादिरूपे तयोरेकत्र शङ्खादौ सत्त्वेन सांकर्य्यादुद्भूतत्वन्न जातिः।

ननु शुक्लत्वव्याप्यं नानैवोद्भूतत्वं तथा च शुक्लत्वव्याप्यं यदुद्भूतत्वं तत्र शुक्लत्वाभावसमानाधिकरणमिति न साङ्कर्य्यमिति चेन्न, तथा सति चाक्षुषप्रत्यक्षम्प्रति शुक्लत्वादिव्याप्यनानोद्भूतत्वस्य कारणतावाच्छेदकत्वेऽनुगतकारणतानापत्तेः, तत्कल्पनेऽपि व्यभिचाराच्च, किन्तर्ह्युद्भूतत्वमिति चेच्छुक्लत्वादिव्याप्यमनुद्भूतत्वं नानातदभावपरश्चोद्भूतत्वम्, तच्च संयोगादावप्यस्ति, एवञ्च शब्देतरोद्भूतगुणः संयोगादिस्तदाश्रयत्वमेव चक्षुरादौ न त्वनाश्रयत्वमिति। नन्वेवं विशेषणांशेनैव निर्वाहे विशेष्यांशो व्यर्थ इति चेन्न, शब्देतरोद्भूतविशेषगुणानाश्रयत्वेन कालादावतिव्याप्तेः, तत्रैवातिव्याप्तिवारणाय विशेष्यदले ज्ञानकारणेति च, इन्द्रियावयवविषयावयवसंयोगस्यापि प्रत्यक्षे कारणत्वात्तत्राऽतिव्याप्तिवारणाय मनःपदप्रयोजनम्, नव्यमते न तत्प्रयोजनम्, तैस्तादृशकारणतानङ्गीकारात्, तथापि तन्मते कलादौ रूपाभावप्रत्यक्षे विशेष्यविशेषणभावरूपसन्निकर्षघटकतया कारणीभूतचक्षुसंयोगाश्रयस्य कालादेर्वारणाय मनःपदम्; न चात्मान्यत्वे सतीत्यनेनैवात्मन्यतिव्याप्तिवारणसंभवे किं पुनर्गुरुतरेण शब्देतरोद्भूतविशेषणदानेनेति वाच्यम्, तथा सति चर्ममनःसंयोगस्य ज्ञानमात्रम्प्रति हेतुत्वमिति मते तत्रातिव्याप्तिवारणाय तत्सार्थक्यादित्यन्यत्र विस्तरः।

प्रश्नः ५१– षोढा सन्निकर्षः सोदाहरणा निरूप्यन्ताम्?

उत्तरम्– अयम्भावः—षड्विधप्रत्यक्षे इन्द्रियं करणमुक्तं वा "विषयेन्द्रियसम्बन्धो व्यापारः" इत्युक्तम्, तत्र कारणत्वं व्यापारवत्वे सत्यसाधारणकारणत्वरूपं तद्घटकव्यापारत्वञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वरूपम्, यद्यपि श्रोत्रशब्दसम्बन्धरूपे समवाये तन्नास्ति समवायस्य नित्यत्वात्तथाप्यत्र व्यापारः सन्निकर्ष इत्युच्यते, ते च संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावश्चेति, क्रमशः द्रव्यद्रव्यसमवेतंद्रव्यसमवेतसमवेतशब्दशब्दसमवेतसमवायाभावप्रत्यक्षेषु कारणानि सदृशम्—

jGuru Math Shivala Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

"द्रव्यग्रहस्तु संयोगात संयुक्तसमवायतः।
द्रव्येषु समवेतानां त..ा तत्समवायतः।।
तत्रापि समवेतानां शब्दस्य समवायतः।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।।
विशेषणतया तद्वद्भावानां ग्रहो भवेत्"।। इति।

तथा हि द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षम्प्रति संयोगः सन्निकर्षो हेतुः, एवं 'द्रव्यसमवेतजातिगुणकर्मप्रत्यक्षम्प्रति संयुक्तसमवायः, द्रव्यसमवेतगुणत्वकर्मत्वप्रत्यक्षम्प्रति संयुक्तसमवेतसमवायः, शब्दप्रत्यक्षम्प्रति समवायः, शब्दत्वप्रत्यक्षम्प्रति समवेतसमवायः समवायाभावप्रत्यक्षम्प्रति विशेष्यविशेषणभावः। ननु द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन हेतुत्वे त्वक्प्रभासंयोगाच्चाक्षुषापत्तिः, अन्धकारे घटचक्षुःसंयोगात् स्पार्शनापत्तिश्चेति चेन्न, द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषप्रत्यक्षम्प्रति चक्षुःसंयुक्तसमवायस्येत्यादि विशिष्यकार्यकारणभावेनादोषादिति शिवम्।

प्रश्नः ५२– पार्थिवपरमाणुनीले नीलत्वस्य पार्थिवपरमाणौ पृथिवीत्वस्य वायौ तदीयस्पर्शादौ सत्तायाः पृष्ठत आलोकसंयोगेऽग्रतश्चक्षुःसंयोगे च चाक्षुषप्रत्यक्षं कुतो न?

अथवा–पृथिवीपरमाणोः पृथिवीत्वस्य, वायौ सत्तायाश्च चाक्षुषप्रत्यक्षापत्तिः कथम्? कथञ्च तत्परिहारः?

उत्तरम्– अत्रेदमाकूतम्—नन्वात्मप्रत्यक्षानुरोधेन मनःसंयोगस्य ज्ञानादिप्रत्यक्षानुरोधेन मनःसंयुक्तसमवायस्य च प्रत्यासत्तित्वेऽपि चक्षुरादिसंयोगतत्संयुक्तसमवायोस्तत्वे मानाभावः। च चैवं त्र्यणुकादेस्तदीयरूपादेश्चाक्षुषानापत्तिरिति वाच्यम्, चक्षुःसंयुक्तसमवेतसमवायेनैव तत्प्रत्यक्षसम्भवात्, चक्षुःसंयुक्तः परमाणुः तत्र समवेतो द्व्यणुकः तत्र त्रसरेणोः समवायात्, एवञ्चक्षुः संयुक्तो द्व्यणुकस्तत्समवेतस्त्रसरेणुस्तत्र रूपस्य समवाय इति चेन्न, तथा सति पृथिवीपरमाणुनीले नीलत्वस्य पाथिवपरमाणौ पृथिवीत्वस्य च चाक्षुषप्रत्यक्षापत्तेः। ननु तत्रोद्भूतरूपमहत्वसम्बन्धयोरभावान्न चाक्षुषमिति चेन्न, परस्परया तयोरपि तत्र सत्वात्। तद्यथा घटनीले परमाणुनीले च नीलत्वजातिरेकैव वर्तते, तथा च घटवृत्तिमहत्वं स्वाश्रयसमवेतसमवायसम्बन्धेन परमाणुनीलनीलत्वेऽप्यस्त्ये-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

स्वं महत्वं तदाश्रयो घटस्तत्समवेतो नीलरूपं तस्य समवायो नीलत्वे परमाणुनीलनीलत्वे उद्‌भूतरूपन्तु परमाणुघटोभयमादाय तत्रास्ति, स्वमुद्‌भूतरूपं, तदाश्रयौ परमाणुघटौ तत्र समवेतं नीलरूपं तत्र समवायेन नीलत्वम्, एवं परमाणौ पृथिवीत्वेऽपि घटमादाय महत्वसम्बन्धः, स्वं महत्वं तदाश्रयः कपालं तत्र समवेतो घटस्तत्र पृथिवीत्वसमवायस्तथा परमाणुघटोभयमादायोद्‌भूतरूपसम्बन्धो निरुक्तसम्बन्धेन, एवं वायौ सत्तायास्तदीयस्पर्शादौ तस्याश्चाक्षुषं स्यात्, निरुक्तदिशा घटादिमादाय तदुभयसत्वादिति चेन्न, उद्‌भूतरूपावच्छिन्नमहत्वावच्छिन्नो यश्चक्षुःसंयोगस्तदाश्रयसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे कारणत्वेन परमाणौ चक्षुः संयोगस्तदाश्रयसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे कारणत्वेन परमाणौ चक्षुःसंयोगस्य महत्वावच्छिन्नत्वाऽभावेन तद्वृत्तिपृथिवीत्वस्य चाक्षुषत्वाऽभावात्, एवञ्च त्रसरेणौ महत्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायाऽभावात्तच्चक्षुषानुपपत्तिरतश्चक्षुः संयोगस्य प्रत्यासत्तित्वमावश्यकम्। नन्वेवं चक्षुः संयुक्तसमवायः सन्निकर्षः चक्षुः संयुक्तसमवेतसमवायेनाऽयथासिद्ध इति चेन्न, द्रव्यसमवेतसमवेत्तचाक्षुषम्प्रति निरुक्तरूपावच्छिन्नो यश्चक्षुःसंयोगस्तदाश्रयसमवेतसमवायस्य कारणत्वेन पार्थिवपरमाणौ महत्वांच्छिन्नचक्षुःसंयोगाऽभावेन तदीयनीलवृत्तिनीलत्वादेश्चाक्षुषत्वाभावात्, एवञ्च त्रसरेणुरूपे महत्वाच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्याभावेन तत्प्रत्यक्षानुपपत्त्या चक्षुःसंयुक्तसमवायेऽपि प्रत्यासतितत्वस्यावश्यकत्वात्। पार्थिवपरमाणौ नीले नीलत्वादेरिव वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषत्वाभावोऽपि, तत्र चक्षुः संयोगस्य सत्वेऽपि रूपावच्छिन्नत्वाऽभावेन बोध्यः। नन्वेवं यत्र घटस्य पृष्ठावच्छेदेनालोक-संयोगश्चक्षुसंयोगश्चाग्रावच्छेदेन तत्र घटप्रत्यक्षं स्यादुद्भूतरूपावच्छिन्न-महत्वावच्छिन्नचक्षुःसंयोगस्यालोकसंयोगस्य च घटे सत्वादिति चेन्न, आलोकसंयोगाऽवच्छिन्नोद्‌भूतरूपावच्छिन्नचक्षुःसंयोगस्य द्रव्यप्रत्यक्षे हेतुत्त्वेन तत्र चक्षुःसंयोगस्यालोकसंयोगाऽवच्छिन्नत्वाभावेन घटप्रत्यक्षाभावादिति शम्।

प्रश्नः ५३– समवायसन्निकर्षसद्भावे का युक्तिः?

उत्तरम्– अत्रेदं तत्त्वम्-यद्यपि सांख्यैरहंकारोपादानकत्वमिन्द्रियाणामङ्गीक्रियते, तन्मते श्रोत्रेन्द्रियस्यात्यहंकारोपादानकत्वाच्छब्देशं गत्वैव श्रोत्रं

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

शब्दं गृह्णाति, चक्षुषो द्रव्यदेशं प्राप्य द्रव्यादिप्रत्यक्षवत्; तथापि स्वमते इन्द्रियाणां भूतोपादानकत्वेन श्रोत्रस्य कर्णशष्कुल्यवच्छिन्ननभःप्रदेशरूपत्वान्नभसि कर्माभावाच्छब्दरूपगुणस्यापि कर्मवत्त्वाऽऽभावाच्छब्दप्रत्यक्षासम्भवेन वीचीतरङ्ग-न्यायेन शब्दजशब्दाङ्गीकारेण श्रोत्रदेशे उत्पन्नस्य शब्दस्य प्रत्यक्षं भवति, तदर्थः समवायः सन्निकर्षोऽभ्युपगम्यते। शब्दत्वप्रत्यक्षार्थे समवेतसमवायोऽपि सन्निकर्षः। किञ्च, श्रोत्रावच्छिन्नशब्दस्य गुणत्वाच्छ्रोत्रस्य च गगनरूपत्वात्तयोः संयोगः सन्निकर्षो न सम्भवति। न च कर्णशष्कुल्यवच्छिन्ननभसो निरवच्छिन्ननभसश्च संयोगेन तत्समवेतशब्दस्य प्रत्यक्षं श्रोत्रसंयुक्तसमवायेन सन्निकर्षेण स्यादिति साम्प्रतम्, एकस्यैव द्रव्यस्य सोपाधिकनिरूपाधिकभेदेन भिन्नस्य संयोगासम्भवान्नहि घटाऽऽकाशमहाकाशयोः संयोगं केचिन् मन्यन्ते, तथा च समावायसन्निकर्षोऽव-श्यमाश्रयणीयः। नन्वेवं सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिः शब्दस्य श्रोत्रस्य समवायस्य च सत्वादिति चेन्न, श्रोत्रावच्छिन्नसमवायस्य विवक्षितत्वेन यावत्वपुरुषीयश्रोत्रावच्छिन्न-समवायाभावेनादोषात्। शब्दसमवेतशब्दत्वश्रावणप्रत्यक्षम्प्रति श्रोत्रावच्छिन्नसमवेतसमवायः सन्निकर्ष इति सर्वं चतुरस्रमिति शिवम्।

प्रश्नः ५४– वैशेषिकमते समवायप्रत्यक्षाऽभावं कथं कथञ्च मतान्तरे तत्प्रत्यक्षम्?

उत्तरम्– अत्रायमभिसन्धिः—समवायाभावप्रत्यक्षसिद्धये इन्द्रियसम्बद्ध-विशेषणतासन्निकर्षो हेतुरङ्गीक्रियते। तदुक्तम्-"प्रत्यक्षं समवायस्य विशेषणतया भवेत्। विशेषणतया तद्वदभावानां ग्रहो भवेदिति।" घटसमवायवत्कापालं पश्यामीति प्रत्यक्षे चक्षुःसंयुक्तं कपालं तद्विशेषणं समवाय इति, अत्र वैशेषिकानुयायिनः सम्बन्धप्रत्यक्षम्प्रति यावदाश्रयप्रत्यक्षस्य हेतुत्वात्, समवायस्यैकतयैकदा भाविभूतसकलाश्रयव्यक्तीनां ज्ञानासम्भवान्न तत्प्रत्यक्षम्उक्तनियमानभ्युपगमे घटाकाशसंयोगस्यापि प्रत्यक्षापत्तिस्तत्रोक्तसन्निकर्षस्य सत्वादित्याहुः। नैयायिकास्तु यावदाश्रयप्रत्यक्षस्य न सम्बन्धप्रत्यक्षत्वं- कार्यतावच्छेदकम्, सम्बन्धत्वस्य निर्वचनाशक्यत्वात्। न च सांसर्गिकविषयतावत्वमेव सम्बन्धत्वमिति वाच्यम्, तादृशसम्बन्धत्वस्य घटत्वादिसाधारण्येन तत्प्रत्यक्षे व्यभिचारापत्तेः, किन्तर्हि यावदाश्रयप्रत्यक्षस्य कार्यतावच्छेदकमिति चेदनुभवानुरोधेन संयोगप्रत्यक्षत्वमेवेति गृहाण, तथा च समवायप्रत्यक्षे बाधकभावात्तत्प्रत्यक्षार्थमपीन्द्रियसम्बन्ध-विशेषणतासन्निकर्षोऽङ्गीकार्य्यं इत्याहुः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रश्नः ५५– अभावप्रत्यक्षे चरमसन्निकर्षे सङ्गमय्य तत्प्रत्यक्षे योग्यानुपलब्धेर्हेतुत्वं कथं का च सा?

उत्तरम्– अभावप्रत्यक्षे-इन्द्रियसम्बद्धविशेषणतासन्निकर्षो हेतुः। तथा हि घटाभाववद्भूतलं पश्यामीति प्रत्यक्षे चक्षुःसंयुक्तं भूतलं तद्विशेषणं घटाभावः, रूपाऽभाववदेकत्वविशिष्टं घटं पश्यामीति प्रत्यक्षे चक्षुसंयुक्तो घटस्तत्समवेतमेकत्वं तत्र विशेषणं रूपाऽभावस्तथा चात्र संयुक्तसमवेतविशेषणतासन्निकर्षः, रूपाऽभाववदेकत्वविशिष्टघटप्रत्यक्षे संयुक्तसमवेतसमवेतविशेषणता सन्निकर्षः चक्षुःसुयुक्तो घटस्तत्र तत्र समवेतत्वमेकत्वं समवेतमेकत्वं तद्विशेषणं रूपाभावः, शब्दाभावप्रत्यक्षम्प्रति केवलश्रोत्रावच्छिन्न विशेषणता सन्निकर्षः, खत्वाद्यभावविशिष्ट-कादिप्रत्यक्षम्प्रति श्रोत्रावच्छिननसमवेतविशेषणता सन्निकर्षः, गत्वाभाव विशिष्टकत्वाद्यवच्छिन्नाभावप्रत्यक्षम्प्रति श्रोत्रवच्छिन्नविशेषणता सन्निकर्षः, पटाभाववान् यो घटाभावस्तद्वद्भूतलमिति प्रत्यक्षे चक्षुःसंयुक्तविशेषणविशेषणता सन्निकर्षः।

नन्वेवं विशेषणताबाहुल्याद्विभागोद्देशे सन्निकर्षस्य षड्विधत्वकथन-मसङ्गतमिति चेन्न, विशेषणतात्वेन रूपेण विभागग्रन्थे तस्या एवत्वस्येष्टत्वात्। ननु विशेषणतायाः प्रत्यासत्तित्वन्नाभ्युपेयते, न चाऽभावप्रत्यक्षानुपपत्तिरिति वाच्यम्, अनुपलब्ध्या तत्प्रत्यक्षोपगमात्। न च वाच्यम्, समवायप्रत्त्यक्षानुरोधात् सापि स्वीक्रियत इति, तन्त्रान्तरे समवायाङ्गीकरात्। अत एवाभावप्रत्यक्षे इन्द्रियं न करणं किन्तु योगनुपलब्धिरेवेति मीमांसका आहुरिति चेन्न, अभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वेऽपि करणत्वानभ्युपगमात्। न च योग्यानुपलब्धेरभावप्रत्यक्षे हेतुत्वे मानाभाव इति वाच्यम्, भूतलादौ घटादिभ्रमानन्तरं घटाभावादिप्रमाऽभावस्या-ऽनुभवसिद्धतयाऽभावोपलब्धौ प्रतियोग्युपलम्भाभावस्य कारणत्वकल्पनात्।

ननु जलपरमाण्वादौ पृथिवीत्वाभावप्रत्यक्षं स्यात्तत्र प्रतियोगिनः पृथिवीत्वस्योपलम्भावादिति चेन्न, प्रतियोगिनि योग्यताया अप्यपेक्षणात्, तत्र योग्यता च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जिप्रतियोगिकत्वरूपा, प्रतियोगिनो घटादेः सत्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य तस्य भावस्तत्वम्। तद्यथा-आलोकसंयोगादिसत्वे यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादनशक्यत्वेन तत्र घटाभावादेः प्रत्यक्षं भवति, तमसि तादृशापादनासंभवान्न घटाऽभावप्रत्यक्षम्, स्पार्शनप्रत्यक्षन्तु स्यादेव, घटस्यालोकसंयोगाऽभावेऽपि तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वस्य तु न प्रत्यक्षम्, अयोग्यत्वेन तत्प्रत्यक्षपादनाशक्यत्वात्। वायावुद्भूतरूपाभावस्य, पाषाणे सौरभाभावस्य, गुडे तिक्ताभावस्य,

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

वह्नावनुष्णत्वाभावस्य, श्रोत्रे शब्दाभावस्य, आत्मनि सुखाद्यभावस्य तत्तदिन्द्रियैः प्रत्यक्ष जायत एव, तत्तत्प्रत्यक्षापादनस्य तत्र शक्यत्वात्। त्रिविधसंसर्गाऽभावप्रत्यक्षे प्रतियोगिनः प्रत्यक्षयोग्यतापेक्षिता, अत एव द्व्यणुकाद्ययोग्यानां प्रागभावप्रध्वंसाऽभावात्यन्ताभावानामप्रत्यक्षम्, पिशाचात्यन्ताऽभावस्यापि न प्रत्यक्षं प्रतियोगिनि पिशाचे योग्यताविरहात्। नन्वेवं संसर्गाऽभाववत् स्तम्भे पिशाचान्योन्याभावस्य प्रत्यक्षन्न स्यादिति चेन्न, अन्योन्याभावप्रत्यक्षे तदनुयोगिनि प्रत्यक्षयोग्यताया अपेक्षणात्, स्तम्भस्य च योगयत्वात्पिशाचान्योन्याभावस्य चाक्षुषप्रत्यक्षं भवत्येवेति शम्।

प्रश्नः ५६– अलौकिकसन्निकर्षः कतिविधस्तदस्वीकारे कानुपपत्तिः?

उत्तरम्– अत्रेदं रहस्यम्—प्रत्यक्षन्तावद्द्विविधम्, लौकिकालौकिकभेदात्। तत्राद्ये षोढा संयोगादिसन्निकर्षा निरूपिताः द्वितीये तु त्रिविधः सन्निकर्षः सामान्यलक्षणज्ञानलक्षणयोगजधर्मभेदात्। उक्तञ्च—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा।। इति।

ननु धूमत्वादिरूपसामान्यलक्षणाया इन्द्रियजन्यत्वाभावात्तस्य मूलोक्तव्यापारत्वकथनमयुक्तमिति चेन्न, तस्य सन्निकर्षपरत्वात्। नन्विन्द्रियप्रतियोगिकत्वाभावात्तदप्ययुक्तमिति चेन्न, संयोगस्येन्द्रियप्रतियोगिकत्वेन तद्घटितस्यापि तत्त्वसम्भवात्, तत्र च लक्षणपदेन स्वरूपग्रहे बहुब्रीहिणा सामान्यस्वरूपाप्रत्यासत्तिरित्यर्थः, सामान्यस्वरूपञ्चेन्द्रियसम्बन्द्धेविशेष्यकज्ञानप्रकारीभूतमिति, तथा हि यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तज्ज्ञाने धूमत्वं प्रकारस्तथा च धूमत्वेन सन्निकर्षेण सकलधूमविषयक "धूमा" इत्येवं ज्ञानमुत्पद्यते। ननु लाघवादिन्द्रियसम्बद्धं सामान्यं प्रत्यासत्तिरित्येव कुतो नेति चेन्न, धूलीपटले धूमभ्रमोत्तरं सकलधूमविषयकज्ञानानुपपत्तेः, धूमत्वेन सह तत्रेन्द्रियसम्बन्धविरहात्। निरुक्तलक्षणसत्वे त्विन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र धूमत्वप्रत्यासत्तेः सत्वात् सकलधूमविषयकज्ञानोपपत्तिः।

नन्वेवं चक्षुःसन्निकर्षेण धूमज्ञाने जाते चक्षुःसंयोगविगमेऽपि तादृशज्ञानमादाय तज्जज्ञानप्रकारस्य धूमत्वादेर्धूमान्तरे सत्वात्तेषां तया प्रत्यासत्त्या ज्ञानापत्तिः। न च वाच्यम्, तदा नेन्द्रियसम्बद्धे धूमः, ज्ञानलक्षणात्मकप्रत्यासत्तेर्धूमे सत्वात्। क्षणैके तत्र सामान्यलक्षणाजन्यज्ञानस्वीकारे नो हानिरिति चेन्न, तन्मूलकज्ञानधारापत्ते-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रनिवार्य्यत्वादिति चेन्न, लौकिकेन्द्रियसम्बन्धस्य विवक्षणेनादोषात्। नन्वेवं सामान्यलक्षणया तदिंन्द्रियेण ज्ञाने जननीये तदिन्द्रियजन्यतदिन्द्रियालौकिक-सन्निकर्षवद्विशेष्यकज्ञानप्रकारीभूतं सामान्यमिति विवक्षायामणुत्वेन यत्किञ्चिदणूपस्थितावणुत्वसामान्यलक्षणया सकलाणुगोचरीबोधो न स्यादिति चेन्न, बहिरिन्द्रियेण तया ज्ञाने जननीये एव लौकिकत्वस्य विवक्षणात्। नन्वेवं सामान्यस्य जातिरूपत्वेन धूमत्वलक्षणप्रत्यासत्त्या निखिलधूमज्ञानेऽपि एकस्य घटस्य संयोगेन भूतले समवायेन वा कपाले ज्ञाने तदनन्तरंतद्घटवतां भूतलकपालादीनां ज्ञानानापत्तिः घटस्य सामान्यत्वाभावादिति चेन्न, सामानां भाव इति विग्रहनिष्पन्नसामान्यशब्दस्य नित्यानित्योभयपरत्वेनादोषात्। नन्वेवं तथा प्रत्यासत्त्यां समवायेन तद्घटवतां भूतलानां, संयोगेन तद्वतां कपालानाञ्च प्रत्ययः कुतो नेति चेन्न, येन सम्बन्धेन सामान्यज्ञानं तेनैव सम्बन्धेनाधिकरणानां प्रत्यासत्तित्वस्वीकारात्।

न च यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यस्य घटस्य तदानीमभावेन सर्वेषां तद्घटवतां भावानापत्तिः, पूर्वदिने इन्द्रियसम्बद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्रेन्द्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्वात् परदिने तादृशज्ञानापत्तिश्चेति चेन्न, लक्षणशब्दस्य विषयपरत्वेन सामान्यं लक्षणं विषयो यस्येत्यर्थे, सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति स्वीकारेणापत्त्य-नुपपत्त्यभावात्। तदुक्तम्—"आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यत" इति सामान्यज्ञानमाश्रयाणां धूमत्वादिसामान्याश्रयाणां धूमादीनां प्रत्यासत्तिः सन्निकर्ष इति। इन्द्रियसम्बद्धविशेष्यकसामान्यप्रकारकं ज्ञानं प्रत्यासत्तिरिति निष्कर्षः। ननु यत्र चक्षुःसंयोगादिकं विनापि सामान्यस्मृत्यादिस्तत्रापि सकलघटादीनामलौकि-कचाक्षुषप्रत्यक्षापत्तिरिति चेन्न, इन्द्रियसम्बद्धविशेष्यकसामान्यप्रकारकतदिन्द्रिय-जन्यज्ञानं प्रत्यासत्तिरिति स्वीकारेण ज्ञाने तदिन्द्रियजन्यत्वाभावेनापत्तेरभावात्। नन्वन्धकारादावपि चक्षुरादिना तादृशज्ञानं जायतामिति चेन्न, तत्र ज्ञाने चक्षुःसंयोगालोकसंयोगादिरूपसामग्र्या अप्यपेक्षणात्। तदुक्तम्....... "तदिन्द्रियजतद्धर्मबाधसामग्र्यपेक्षत" इति। इति सामान्यलक्षणप्रत्यासत्तिः।

प्रश्नः ५७– सामान्यलक्षणज्ञानलक्षणप्रत्यासत्योः को भेदोऽन्त-रेणापरस्यागतार्थत्वं कुतो नेत्यवान्तरप्रश्नः?

उत्तरम्– अत्रेदं तत्वम्—सामान्यलक्षणप्रत्यासत्तेरन्ततः सामान्यविषयकं ज्ञानमेव रूपम्, ज्ञानलक्षणप्रत्यासत्तेरपि ज्ञानं लक्षणं स्वरूपं यस्या इति विग्रहेण

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

ज्ञानरूपं सिद्धन्तथा चान्यतरस्यैव सर्वेष्टसिद्धावलमपरया प्रत्यासत्त्येति चेन्न, सामान्यलक्षणप्रत्यासत्त्या सामान्याधूमादेर्ज्ञानजननम्, ज्ञानलक्षणप्रत्यासत्त्या घटवद्भूतलमित्यादौ यद्घटादिविषयकं ज्ञानं तस्यैव घटादेर्न तु देशोन्तरीया-देर्ज्ञानजननमित्युभयोर्भेदात् तदुक्तम्—"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः" इति यस्य घटवद्भूतलमित्यादौ घटादेर्विषयी ज्ञानं तस्यैव घटादेः सामान्यस्य व्यापारः सन्निकर्षो ज्ञानलक्षणाप्रत्यासत्तिरित्यर्थः।

ननु सामान्यलक्षणप्रयासत्तिस्वीकारे किं बीजमिति चेदुच्यते, प्रत्यक्षविषयतायाः सन्निकर्षाश्रयत्वव्याप्यत्वात् सन्निकर्षमन्तरा प्रत्यक्षप्रमीयविषयता न सम्भवति, तथा चैकस्मिंन्नेव धूमे चक्षुःसन्निकर्षो न धूमान्तरे तत्कथं 'धूमा' इति ज्ञानमतो धूमत्वलक्षणप्रत्यात्यैव सकलधूमत्प्रतीत्युपपत्तिरेवं वह्नित्वलक्षणप्रत्यासत्त्या सकलवह्नीनाम्। ननु सकलधूमवह्निज्ञानाभावेऽपि क्षत्यभावे किमिति तदुपपाद्यत इति चेन्न, प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वात्, देशान्तरीयस्य तस्य प्रत्यक्षाभावात् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तिप्रसङ्गात्, सन्देहस्य चानुभवसिद्धत्वात्, सामान्यलक्षणस्वीकारे तु तया सकलधूमोपस्थितौ देशान्तरीयकालान्तरीयधूमे वह्निव्याप्यत्वसंशय उपपद्यते। नन्वेवं प्रमेयत्वेन पदार्थजातस्योपस्थितौ सर्वे सर्वज्ञाः स्युरिति चेन्मैवम्, प्रातिस्विकरूपेण सकलतत्तत्पदार्थाज्ञात्यत्त्तवेन प्रमेत्वेन सकलप्रमेयज्ञानेऽपि सार्वज्ञापत्तेरभावात्।

नन्वस्तु तर्हि सामान्यलक्षणा ज्ञानलक्षणास्वीकारे मानाभाव इति चेन्न, सुरभिचन्दनखण्डमिति ज्ञाने तदस्वीकारे चन्दनखण्डांशे लौकिकचाक्षुषप्रत्यक्ष-स्वीकारेऽपि सौरभांगे योग्यवृत्तित्वविशिष्टचक्षुःसन्निकर्षाऽभावेन तत्प्रत्यक्षनापत्तेः, तत्स्वीकारे तु स्वसंयुक्तमनःसंयुक्तात्समवेतज्ञानविषयत्वसम्बधेन सौरभांशेऽपि चक्षुःसन्निकर्षसत्वात्तत्प्रत्यक्षोपपत्तिः स्वं चक्षुः शेषं स्पष्टम्। ननु सुरभिचन्दनमिति प्रत्यक्षे सौरभत्वप्रकारकज्ञाने सामान्यलक्षणप्रत्यासत्त्यैव सौरभत्वाश्रयसौरभमानं संभवति, तत्किं ज्ञानलक्षणास्वीकारेणेति चेन्न, प्रमेयत्वादिसामान्यलक्षणया प्रमेयत्वादिना सौरभत्वभानसंभवेऽपि ज्ञानलक्षणानङ्गीकारे स्वरूपतः सौरभत्व-भानासम्भवात्, धूमत्वेन धूलीपटले ज्ञाने तदनन्तरमनुव्यवसाये "मनः संयुक्तात्म-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

समवेतज्ञानविषयत्वसम्बन्धेन'' धूलीपटलस्य भानार्थन्तस्या आवश्यकत्वाच्च, अन्यथा तत्र धूमत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसम्बन्धेन धूलीपटलेऽभावेन सामालक्षणयाऽनुव्यवसाये धूलीपटलभानासम्भवः स्यादिति शिवम्। इति ज्ञानलक्षणप्रत्यासत्तिः।

प्रश्नः ५८– योगजसन्निकर्षः कतिविधस्तस्य कुत्र पदार्थेऽन्तर्भाव इत्यवान्तरप्रश्नः?

उत्तरम्– अत्रायमभिसन्धिः-योगिभिरहङ्कारोपादानकत्वमिन्द्रियाणां मन्यतेऽहंकारस्य च व्यापकत्वाद्देशान्तरेऽपि सत्त्वं ततो योगीन्द्रियाणां सर्वत्रैव सत्वात् सर्वत्र सर्वदा प्रत्यक्षं, न च वाच्यं योगिवत् सर्वेषां सर्ववस्तुभानप्रसङ्ग इति, योगिनां योगमहिम्ना सत्वाविर्भावेन तमोनिरासेन तत्संभवेऽपि तदितरेषां तमोबाहुल्यप्रतिबन्धकवशात् तयाभानासम्भवात्। उक्तं हि योगभाष्ये— ''कार्येन्द्रियप्रकृतयश्च स्वं स्वं विकारमनुगृह्णन्त्यापूरेण धर्मादिनिमित्तमपेक्षमाणा'' इति। स्वमते चेन्द्रियाणाम्भौतिकत्वाद् देशान्तरेऽसत्वात्तत्रत्यपदार्थानाम्भानाप्रसक्तिरतो योगजोऽपि सन्निकर्षोऽङ्गीक्रियते तार्किकैः, स च चित्तवृत्तिनिरोधात्मकयोगाभ्यासजनितो धर्मविशेषरूपः-श्रुतिपुराणादिप्रतिपाद्यः, सोऽपि युक्तयुञ्जानयोगिद्वैविध्याद् युक्तयुञ्जानरूपो द्विविधः। तत्र मनोजन्यधर्माश्च संयोगो द्रव्यप्रत्यक्षे कारणम्, द्रव्यत्वादिप्रत्यक्षे तदाश्रयसंयुक्तसमवायः, रूपत्वादिप्रत्यक्षे च तदाश्रयसंयुक्तसमवेतसमवाय इत्यादि, यद्यपि न योगमात्रः सन्निकर्षस्तथापि तद्घटितत्वात्तेन शब्देन व्यवह्रियते सामान्यलक्षणादिव, तथा चोक्तम्—''योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः'' इति। तत्र युक्तयोगिनो ध्यानाद्यभावेऽपि युक्तरूपयोगतो धर्मेण सन्निकर्षेण विषयभानं भवति, युञ्जानयोगिनो ध्यानादिसचिवेन युञ्जानसन्निकर्षेण सर्वविषयभानं तदप्युक्तम्.......''युक्तस्य सर्वदा भानं चिन्तोसहकृताऽपर'' इति योगजसन्निकर्षस्य योगमाहात्म्यलभ्यत्वाद्यागादिभिरदृष्ट इव योगजन्योऽदृष्ट धर्मरूप एवेति गुणेऽन्तर्भावो न पदार्थान्तरमिति सिद्धम्।

॥ श्रीसाम्बशिवार्पणमस्तु ॥

।। इति प्रत्यक्षखण्डः ।।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

. Digitization by eGangotri/Sarayu Trust. Fu

a, Varanasi Collection. Equipment: Heritage

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अमर

श्योर सीरीज

100%

निश्चित सफलता

50.00

भारतीय विद्या संस्थान
सी. २७/५९, जगतगंज, वाराणसी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon